Barcode : 5010010087022
Title - muulagadaaghariiye sabdakhanad'a
Author - khaan'chii prativaadibhayan'karaanantaachaayena
Language - Hindi
Pages - 380
Publication Year - 1904
Barcode EAN.UCC-13



SASTRAMUKTAVALI- 23.

SABDAKHANDA.

(First voluem)

By

Mahamahopadhyaya Gadadhara Bhatta Charya,

With-Mani

Or

Sri Gangesopadhyaya

Edited by

P. B. ANANTHA CHARIAR

Printed and Published By the Proprietor Of

SRI SUDARSANA PRESS

CONJEEVERAM.

1904

(*Copyright registered*)

मूलगदाधरीये—शब्दखण्डः ।

(शब्दप्रामाण्य पूर्वपक्षग्रन्थपर्यन्तम्)

महामहोपाध्याय श्रीगदाधर भट्टाचार्य विरचितः ,

श्रीमद्गंगेशोपाध्याय विरचितैन, मणिना सह

श्रीकांची प्रतिवादिभयंकरानन्ताचार्येण

परिशोधितः ,

श्री सुदर्शन मुद्राक्षरशालाया ममुद्यत ।

॥ श्रीकाञ्ची ॥

(प्रथमसंपुटम्)

अस्य पुनर्मुद्रणादिषु मुद्राशालाधिप एवाधिकारीति

1904

इदानीमस्य मूल्यम् ०-२-० -०

श्रीरस्तु ।

शास्त्रमुक्तावली

श्रीमते हयग्रीवाय नमः ।

तत्त्वचिन्तामणौ शब्दखण्डः ।

(गदाधरीयेन सहितः ।)

अथ शब्दो निरूप्यते ।

गदाधरीय

अथ श्रीमद्देवासुरमकुटमणिक्षपानिकर
स्रजावल्गद्दन्तावळवदनपादाम्बुजयुगम् ।
अशेषप्रत्यूहप्रकरशमनैकान्तनिपुणम्
सदा भक्ताभीष्टप्रसरनवकल्पद्रुमदळम् ॥ १ ॥

निजगुरुहरिरामनामभूमीसमुदितभास्कर वाङ्मयूखयोगात् ।
स्फुरदमलवितर्ककान्तिगुम्भं परममणिं विवरीतु मुद्यतोस्मि ॥ २ ॥

निबन्धाः प्राचीनै श्चतुरुदधिपर्यन्तविचर
द्यशोहंसै स्सद्भि र्भुवि विरचिता स्सन्त्यपि यदि ।
तथाप्येषा काचि द्वचनपरिपाटी निजगुणै
र्गभीरा धीराणां सपदि मुद माधास्यतितराम् ॥ ३ ॥

प्रत्यक्षानुमानोपमानात्मकं प्रमाणत्रयं क्रमेण निरूपितं, तूरीयं प्रमाणं निरूपयितुं शिष्यावधानाय प्रतिजानीते (अथ शब्दो निरू. पयत इति ·) इहाथशब्द स्तत्प्रमाननिरूपणानन्तर्यपरः, तस्य प्रक्रान्त

क्रियानन्तर्यघाचकत्वात् । चैत्रेण पच्यते अथ भुज्यते । पाकानन्तर्यस्य भोजनादौ प्रतीतेः । प्रकृते च पूर्वग्रन्थस्थेन मानं निरूप्यत " इत्यनेनोपमाननिरूपणस्य प्रक्रान्तत्वात् ।

अथ उपमाननिरूपणाद्यात्मकावध्युपरक्तानन्तर्यस्याथशब्दवा शक्त्यानन्त्यप्रसंगः, तदनुपरागेणानन्तर्यमात्रस्य वाच्यत्वे उ निरूपणाद्युपरक्तानन्तर्यप्रतीत्यनुपपत्तिः; नच " उपमानं निरूप इत्यादिपूर्वग्रन्थादिस्थवाक्यानुषगा • त्तदुपस्थापितोपमाननिरूप प्रकृताथशब्दार्थानन्तर्यावधित्वेनान्वया दवधिविशेषोपरक्तान लाभसम्भव इति वाच्यम्, आख्यातार्थविशेषणतयो पस्थि निरूपणादे रत्रधे रथशब्दार्थानन्तर्यविशेषणत्वेना न्वयासम्भवा एकत्र विशेषणतयोपस्थितस्या न्यत्र विशेणत्वेनान्वये आकांक्षा दात्; " उपमानं निरूप्यत " इत्यादितो निरूपणकर्मत्वादे मानादौ बोधेन उपमानकर्मकत्वादि विशेषितनिरूपणाभानेन ता निरूपणादे रानन्तर्यावधित्वेन भानासम्भवा च्चेति चेन्न;- अव भूतोपमाननिरूपणान्तर्भावेणैवाथशब्दशक्त्यभ्युपगमात् । पूर्ववाक्य धातुतात्पर्यविषयतावच्छेदकत्वे नोपलक्षणीभूतानुगतधर्मेण तत्तद् यागतविशेषरूपाणा मनुगमा च्छक्त्यैक्यसम्भवात् । बुद्धिविशेषवि यतावच्छेदकस्वरूपोपलक्षणीभूतानुगतधर्मेण • घटत्वपटत्वादिरूपे नामबोध्यतावच्छेदकविशेषधर्माणां सर्वनामशक्यतावच्छेदक तदीयशक्त्यैक्यवत् । सामान्यतः पूर्वत्वस्या व्यावर्तकतया स्वपूर्व मेत्वानुगमकथर्मं निवेश्य मिति स्वपदार्थाननुगमा च्छक्त्यैक्यासम्भ दोष स्सर्वनामशक्तिरथेऽपि सामान्यतो बुद्धिविषयतावच्छेदकत्वस्य व्यावर्तकतया स्वप्रयोगानुकूलबुद्धित्वेनैव निवेशनीयतया स्वत्वानु गमदोषव त्कथंचि त्परिहरणीयः । " उपमानं निरूप्यतं " इत्य दितः उपमाननिरूपणत्वादिना निरूपणादिक्रियाया शाब्दबोधे ऽभा

नेपि शाब्दबोधोत्तरं तादृशरूपेण तत्तत्क्रियाबोधात्, तादृशरूपस्यापि तत्तद्वाक्यस्थधातुतात्पर्यविषयतावच्छेदकताया अनुमानलभ्यतावच्छेदकत्वद्वयस्वीकारे धूमोस्तीत्यादि वाक्यतात्पर्यविषयतावच्छेदकतया तत्सम्भवो बोध्यः । निरूपणयोः पौर्वापर्यकथनेन्तु सिद्धसाध्यसमभिव्याहारस्थले यस्य यदपेक्षया प्राक्कालीनत्वरूपं सिद्धत्वं प्रतीयते, असतिबाधके तस्य हेतुत्वं; यस्य यदपेक्षया उत्तरकालोत्पत्तिकत्वं यत्समानकालीनप्रागभावप्रतियोगित्वरूपं साध्यत्वं प्रतीयते, तस्य तद्धेतुकत्वं प्रतीयत इति व्युत्पत्तिः; पक्त्वाभुङ्क्ते पाथसिपीते तृषाशाम्यतीत्यादितः पाकभोजन पाथःपानतृषाशान्त्योः पौर्वापर्यस्य लाभात् । चैत्रो पाक्षीदिदानीं भुङ्क्ते इत्यादौ पाकभोजनाद्यो र्मिथः पौर्वापर्यस्य साक्षाच्छब्दतो यद्यपि न लाभः, पाककृतौ वर्तमानकालापेक्षया तीतत्वस्य भोजनकृतौ वर्तमानकालवृत्तित्वस्यैव शब्देन बोधनात्; तथापि यद्वर्तमानकृतिजन्यं तद्वर्तमानकालापेक्षया ऽतीता या कृतिस्तज्जन्योत्तरमिति व्याप्त्यर्थतो मिथः पौर्वापर्य लाभः ।

यत्तु "निरूप्यत" इत्यस्य वर्तमानार्थकलट्प्रत्ययान्तत्वेन शब्दनिरूपणस्य साध्यतयोपस्थितेरिति तुच्छै रुक्तम् । तत्र साधु, आनन्तर्यं वाचकाथशब्दत उपमानशब्दनिरूपणयोः पौर्वापर्यरूप सिद्धत्वसाध्यत्वयो र्बोधनात् तयो र्हेतुहेतुमद्भावलाभसम्भवेन वर्तमानकालोत्तरकालीनस्वरूपसाध्यत्वबोधस्या नर्थकलट्प्रत्ययान्तताया अनुपयोगा, द्वर्तमानार्थकलट्प्रत्ययं विनापि पक्त्वाभुक्तवानित्यादौ पाकभोजनाद्यो र्हेतुहेतुमद्भावबोधेन सर्वत्र तदपेक्षाया असम्भवाच्च ।

हेतु हेतुमद्भावश्च यद्यपि नोक्तस्थलेषु शाब्दधीविषयः, तदुपस्थापकपदाभावात्; तथापि सिद्धसाध्यसमभिव्याहारेणा भिधानस्य हेतुहेतुमद्भावघटकतायाः औत्सर्गिकत्वा त्तत्परत्वानुमानलभ्य एवा साविति यदोषः । तदवाचकादेव पदात् लक्षणयैववा तुच्छाद्बोधः

यद्यपि निरूपणयोः कार्यकारणभावो न संगतिः, निरूप्ययोरेव तथाभावस्य तल्लक्षणाक्रान्तत्वात्; प्रकृतेतस्य बाधेपि, उपमानम-निरूप्यापि शब्दनिरूपणसम्भवात; एतेन निरूपणयोः कार्यकारण भावस्य संगतित्वविरहेपि क्रमनियामकाकांक्षया तत्प्रदर्शन मित्यपि परास्तं, निरूप्ययो रुपमानशब्दयोश्च सिद्धसाध्यभावेन प्रकृते ऽनुपस्थित्या नतयो र्हेतुहेतुमद्भावो व्युत्पत्तिलभ्यः; तथापि निरूपणयो स्तदवधारणे " सविशेषणेही " ति न्यायेन निरूपणविशेषणयो स्तल्लाभइतिपूर्वापरग्रन्थैक .वाक्यताप्रतिपत्तये संगत्यात्मकताप्रदर्शनम् ।

यद्यपि फलद्वारा शब्दप्रमाणस्य ज्ञानकरणतापक्षे स्वरूपतोपि पदशक्तिग्रहात्मकोपमितिरूपशाब्दप्रमाकरणस्य शक्तिग्रहात्मकोपमानो पजीवकतावत उपमानस्यापि, फलद्वारा ऽतिदेशवाक्यार्थज्ञानस्यो पमितिकरणत्वे स्वरूपतोप्यतिदेशवाक्य ज्ञानाधीनतया प्रमाणयो रुपजीव्यो पजीवकभावेन नतान्निरूपणयोः पौर्वापर्यनियमः, तथापि तन्निय मस्य संगतित्वा प्रयोजकतया न क्षतिः । संगतिप्रदर्शने प्रयोजना न्तरसत्त्वेन क्रमनियामकाकांक्षाशान्ते स्तत्प्रयोजनत्वविरहेपि न दोषः ।

मिश्रास्तु अन्यूनविषयकप्रमित्युपजीवकतायाः प्रमित्यन्तरनिष्ठायाः प्रमाणान्तराभिधान प्रयोजकत्वं निरपवादं, गवयो गवय पदवाच्य इत्युप मिते स्तादृशशाब्दबोधान्यूनविषयकत्वात्, तदुपजीव्यत्वाच्च शाब्दप्रमितौ स्वान्यूनविषयकोपमित्युपजीवकत्व सत्त्वा त्तादृशोपमित्युजीव्यातिदेशवा-क्यार्थज्ञानस्य गवयत्वविशिष्टाविषयकत्वेन न्यूनविषयकतयोपमितौ स्वान्यू नविषयकशाब्दप्रमित्युपजीवकत्वाभावात । वस्तुतो मानतावच्छे-दकधर्मावच्छिन्नोपजीव्यतानिरूपित, मुपजीवकत्व मानन्तर्याभिधान प्रयोजकम् । शक्तिपरिच्छित्तिरेवोपमानफलं, नतु कारणतापरिच्छि-त्तिरपीति उपमानैमात्रस्यैव शब्दोपजीव्यता, अतिदेश वाक्यातिरिक्त शब्दस्य च नोपमानोपजीव्यत्वमिति न कश्चि द्दोषइत्याहुः ।

प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यः शब्दः प्रमाणम् ।

स्वजातीयविजातीयव्यावृत्ततया ज्ञापनरूपनिरूपणस्य प्रतिज्ञातत्वा च्छब्दप्रमाणस्ये तरभेदानुमापकं लक्षणमाह (प्रयोगेति) प्रयोगः-प्रकृत वाक्यं, तद्धेतुभूतं, यदर्थतत्त्वज्ञानं- प्रमारूप मर्थज्ञानम् , तज्जन्यश्शब्दः- प्रमाणशब्द इत्यर्थः ।

प्रमाणशब्दत्वं लक्ष्यतावच्छेदकं, तादृशज्ञानजन्यशब्दत्वं लक्ष- णम् । लक्ष्यतावच्छेदके शब्दत्वानन्तर्भावे प्रत्यक्षादा व्याप्तेः लक्षणे तदनन्तर्भावे तादृशज्ञानजन्यसंस्कारादा वतिव्याप्ते, रुभयत्र तदन्तर्भावः । सच शब्दपदान्तरपूरणेन निर्वाह्यः; नतु काकाक्षि न्याया न्मध्यस्थशब्दपदस्यो भयत्र सम्बन्धात्, उद्देश्यविधेयोपस्थापक- पदयोः पौर्वापर्यस्या कांक्षात्वेनो द्देश्यविधेयभावप्रयोजकतयै कपदोप स्थाप्यस्य शब्दत्वस्य उद्देश्यविधेयकोट्योः प्रवेशायोग्यत्व । नहि साल इत्येतावन्मात्रोक्तौ वृक्षत्वावान्तरजातिविशेषवृक्षत्वाभ्यां वृक्षस्यो पस्थितावपि पदान्तराध्याहारं विना सालो वृक्ष इत्यन्वयधीः ।

यत्तु कीदृकशब्दः प्रमाणशब्द इत्याकांक्षायां प्रयोगहेतुभूतार्थ तत्त्वज्ञानजन्य इत्युत्तरमिति लक्षणदिशि शब्दपदासत्त्वेपि तादृश ज्ञानजन्यशब्दत्वरूपलक्षणलाभः, कीदृग रस आम्रस्येति प्रश्ने मधुर इत्येतावन्मात्रोत्तरतोपि मधुरो रस आम्रस्येति बुद्धयुत्पत्त्या प्रश्नो त्तरभावस्थले प्रश्नस्थकिंपदार्थान्वयितावच्छेदकविशिष्टे उत्तरप्रति पाद्यविशेषरूपान्वयस्य व्युत्पत्तिसिद्धत्वादिति । तदपि न मनोज्ञं, उक्तस्थले प्रश्नस्थाम्रस्येत्यन्तानुषंगेणैवोपदर्शितबोधस्योत्पत्तेः । अत्र च कीदृशशब्दः प्रमाणमिति प्रश्नाश्रवणेन शब्दपदान्तरपूरणस्यावश्य कत्वात् । अन्यथा शब्दः प्रमाण मित्यस्यापि वैयर्थ्यप्रसंगात् ।

क्रियानन्तर्यबोधकत्वात् । चैत्रेण पच्यते अथ भुज्यते इत्यादौ पाकानन्तर्यस्य भोजनादौ प्रतीतेः । प्रकृते च पूर्वग्रन्थस्थेन "उपमानं निरूप्यत" इत्यनेनोपमानानिरूपणस्य प्रक्रान्तत्वात् ।

अथ उपमाननिरूपणाद्यात्मकावध्युपरक्तानन्तर्यस्याथशब्दवाच्यत्वे शक्त्यानन्त्यप्रसंगः, तदनुपरागेणानन्तर्यमात्रस्य वाच्यत्वे उपमान निरूपणाद्युपरक्तानन्तर्यप्रतीत्यनुपपत्तिः; नच "उपमानं निरूप्यत" इत्यादिपूर्वग्रन्थादिस्थवाक्यानुषगा त्तदुपस्थापितोपमाननिरूपणादेः प्रकृताथशब्दार्थानन्तर्यावधित्वेनान्वया दवधिविशेषोपरक्तानन्तर्य लाभसम्भव इति वाच्यम्, आख्यातार्थविशेषणतयो पस्थितस्य निरूपणादे रत्रथे रथशब्दार्थानन्तर्यविशेषणत्वेना न्वयासम्भवात्; एकत्र विशेषणतयोपस्थितस्या न्यत्र विशेणत्वेनान्वये आकांक्षाविर हात्; "उपमानं निरूप्यत" इत्यादितो निरूपणकर्मत्वादे रुप मानादौ बोधेन उपमानकर्मकत्वादि विशेषितनिरूपणाभानेन तादृश निरूपणादे रानन्तर्यावधित्वेन भानासम्भवा च्चेति चेन्न;- अवधि भूतोपमाननिरूपणान्तर्भावेणैवाथशब्दशक्त्यभ्युपगमात् । पूर्ववाक्यस्थ धातुतात्पर्यविषयतावच्छेदकत्वे नोपलक्षणीभूतानुगतधर्मेण तत्तत्क्रि- यागतविशेषरूपाणा मनुगमा च्छक्त्यैक्यसम्भवात् । बुद्धिविशेषविष यतावच्छेदकस्वरूपोपलक्षणीभूतानुगतधर्मेण घटत्वपटत्वादिरूपसर्व नामबोध्यतावच्छेदकविशेषधर्माणां सर्वनामशक्यतावच्छेदकतया तदीयशक्तयैक्यवत् । सामान्यतः पूर्वत्वस्या व्यावर्तकतया स्वपूर्वत्व मेत्रानुगमकधर्मे निवेश्य मिति स्वपदार्थाननुगमा च्छक्तयैक्यासम्भव दोष स्सर्वनामशक्तिरथेऽपि सामान्यतो बुद्धिविषयतावच्छेदकत्वस्या व्यावर्तकतया स्वप्रयोगानुकूलबुद्धित्वेनैव निवेशनीयतया स्वत्वाननु गमदोषव त्कथंचि त्परिहरणीयः । "उपमानं निरूप्यत" इत्या दितः उपमाननिरूपणत्वादिना निरूपणादिक्रियाया श्शाब्दबोधे भा

नेपि शाब्दबोधोत्तरं तादृशरूपेण तत्तत्क्रियाबोधात्, तादृशरूपस्यापि तत्तद्वाक्यस्थधातुतात्पर्यविषयतावच्छेदकताया अनुमानलभ्यतावच्छेदकवह्न्यस्तित्ववादे धूमोस्तीत्यादि वाक्यतात्पर्यविषयतावच्छेदकतया तत्सम्भवो बोध्यः । निरूपणयोः पौर्वापर्यकथनन्तु सिद्धसाध्यसमभिव्याहारलभ्यस्य तयोर्हेतुहेतुमद्भावस्यलाभाय । सिद्धसाध्यसमभिव्याहारस्थले यस्य यदपेक्षया प्राक्कालीनत्वरूपं सिद्धत्वं प्रतीयते, असतिबाधके तस्य हेतुत्वं; यस्य यदपेक्षया उत्तरकालोत्पत्तिकत्वं यत्समानकालीनप्रागभावप्रतियोगित्वरूपं साध्यत्वं प्रतीयते, तस्य तद्धेतुकत्वं प्रतीयत इति व्युत्पत्तिः; पक्त्वाभुङ्क्ते पाथसिपीते तृषाशाम्यतीत्यादितः पाकभोजन पाथःपानतृषाशान्त्योः पौर्वापर्यस्य लाभात् । चैत्रो पाक्षीदिदानीं भुङ्क्ते इत्यादौ पाकभोजनाद्यो र्मिथः पौर्वापर्यस्य साक्षाच्छब्दतो यद्यपि न लाभः, पाककृतौ वर्तमानकालापेक्षया तीतत्वस्य भोजनकृतौ वर्तमानकालवृत्तित्वस्यैव शब्देन बोधनात्; तथापि यद्वर्तमानकृतिजन्यं तद्वर्तमानकालापेक्षया ऽतीता या कृतिस्तज्जन्योत्तरमिति व्याप्त्यर्थतो मिथः पौर्वापर्य लाभः ।

यत्तु "निरूप्यत" इत्यस्य वर्तमानार्थकलट्प्रत्ययान्तत्वेन शब्दनिरूपणस्य साध्यतयोपस्थितेरिति तुच्छं रुक्तम् । तत्र साधु, आनन्तर्यवाचकाथशब्दत उपमानशब्दनिरूपणयोः पौर्वापर्यरूप सिद्धत्वसाध्यत्वयो र्बोधनात् तयो र्हेतुहेतुमद्भावलाभसम्भवेन वर्तमानकालोत्तरकालीनस्वरूपसाध्यत्वबोधस्या नर्थकलट्प्रत्ययान्तताया अनुपयोगा, द्वर्तमानार्थकलट्प्रत्ययं विनापि पक्त्वाभुक्तवानित्यादौ पाकभोजनाद्यो र्हेतुहेतुमद्भाव बोधेन सर्वत्र तदपेक्षाया असम्भवाच्च ।

हेतु हेतुमद्भावश्च यद्यपि नोक्तस्थलेषु शाब्दधीविषयः, तदुपस्थापकपदाभावात्; तथापि सिद्धसाध्यसमभिव्याहारेणा भिधानस्य हेतुहेतुमद्भावपरतायाः औत्सर्गिकत्वा त्तत्परत्वानुमानलभ्य एवा साधित्यदोषः । तदवाच्चकादेव पदात् लक्षणयैववा तच्छाब्दबोधः ।

यद्यपि निरूपणयोः कार्यकारणभावो न संगतिः, निरूप्ययोरेव तथाभावस्य तल्लक्षणाक्रान्तत्वात् ; प्रकृतेतस्य बाधेपि, उपमानशब्दनिरूप्यापि शब्दनिरूपणसम्भवात; एतेन निरूपणयोः कार्यकारणभावस्य संगतित्वविरहेपि क्रमनियामकाकांक्षया तत्प्रदर्शन मित्यपि परास्तं, निरूप्ययो रुपमानशब्दयोश्च सिद्धसाध्यभावेन प्रकृते ऽनुपस्थित्या नतयो र्हेतुहेतुमद्भावो व्युत्पत्तिलभ्यः तथापि निरूपणयो स्तदवधारणे " सविशेषणेही " ति न्यायेन निरूपणविशेषणयो स्तल्लाभइतिधूर्षापरग्रन्थैक .वाक्यताप्रतिपत्तये संगत्यात्मकतत्प्रदर्शनम् ।

यद्यपि फलद्वारा शब्दप्रमाणस्य ज्ञानकरणतापक्षे स्वरूपतोपि पदशक्तिग्रहात्मकोपमितिरूपशाब्दप्रमाकरणस्य शक्तिग्रहात्मकोपमानो पजीवकतावत उपमानस्यापि, फलद्वारा ऽतिदेशवाक्यार्थज्ञानस्यो पमितिकरणत्वे स्वरूपतोप्यतिदेशवाक्य ज्ञानाधीनतया प्रमाणयो रुपजीव्यो पजीवकभावेन नतान्निरूपणयोः पौर्वापर्यनियमः, तथापि तन्नियमस्य संगतित्वा प्रयोजकतया न क्षतिः । संगतिप्रदर्शने प्रयोजनान्तरसत्त्वेन क्रमनियामकाकांक्षाशान्ते स्तत्प्रयोजनत्वविरहेपि न दोषः ।

मिश्रास्तु अन्यूनविषयकप्रमित्युपजीवकतायाः प्रमित्यन्तरनिष्ठायाः प्रमाणान्तराभिधान प्रयोजकत्वं निरपवादं, गवयो गवय पदवाच्य इत्युपमिते स्तादृशशाब्दबोधान्यूनविषयकत्वात, तदुपजीव्यत्वाच्च शाब्दप्रमितौ स्वान्यूनविषयकोपमित्युपजीवकत्व सत्त्वा त्तादृशोपमित्युजीव्यातिदेशवाक्यार्थज्ञानस्य गवयत्वविशिष्टाविषयकत्वेन न्यूनविषयकतयोपमितौ स्वान्यूनविषयकशाब्दप्रमित्युपजीवकत्वाभावात । वस्तुतो मानतावच्छेदकधर्मावच्छिन्नोपजीव्यतानिरूपित, मुपजीवकत्व मानन्तर्याभिधान प्रयोजकम् । शक्तिपरिच्छित्तिरेवोपमानफलं, नतु कारणतापरिच्छित्तिरपीति उपमाद्यमात्रस्यैव शब्दोपजीव्यता, अतिदेश वाक्यातिरिक्त शब्दस्य च नोपमानोपजीव्यत्वमिति न कश्चि द्दोषइत्याहुः ।

प्रयोगहेतुभूतार्थतत्वज्ञानजन्यः शब्दः प्रमाणम् ।

सजातीयविजातीयव्यावृत्ततया ज्ञापनरूपनिरूपणस्य प्रतिज्ञातत्वा च्छब्दप्रमाणस्ये तरभेदानुमापकं लक्षणमाह (प्रयोगेति) प्रयोगः-प्रकृत वाक्यं, तद्धेतुभूतं, यदर्थतत्वज्ञानं- प्रमारूप मर्थज्ञानम् , तज्जन्यश्शब्दः- प्रमाणशब्द •इत्यर्थः ।

प्रमाणशब्दत्वं लक्ष्यतावच्छेदकं, तादृशज्ञानजन्यशब्दत्वं लक्ष-णम् । लक्ष्यतावच्छेदके शब्दत्वानन्तर्भावे प्रत्यक्षादा व्याप्तेः लक्षणे तदनन्तर्भावे तादृशज्ञानजन्यसंस्कारादा वतिव्याप्ते, रुभयत्र तदन्तर्भावः । सच शब्दपदान्तरपूरणेन निर्वाह्यः; नतु काकाक्षि न्याया न्मध्यस्थशब्दपदस्यो भयत्र सम्बन्धात्; उद्देश्यविधेयोपस्थापक पदयोः पौर्वापर्यस्या कांक्षात्वेनो द्देश्यविधेयभावप्रयोजकतयै कपदोप स्थाप्यस्य शब्दत्वस्य उद्देश्यविधेयकोट्योः प्रवेशायोग्यत्व । नहि साल इत्येतावन्मात्रोक्तौ वृक्षत्वावान्तरजातिविशेषवृक्षत्वाभ्यां वृक्षस्यो पस्थितावपि पदान्तराध्याहारं विना सालो वृक्ष इत्यन्वयधीः ।

यत्तु कीदृक्शब्दः प्रमाणशब्द इत्याकांक्षायां प्रयोगहेतुभूतार्थ तत्वज्ञानजन्य इत्युत्तरमिति लक्षणदिशि शब्दपदासत्त्वेपि तादृश ज्ञानजन्यशब्दत्वरूपलक्षणलाभः, कीदृग् रस आम्लस्येति प्रश्ने मधुर इत्येतावन्मात्रोत्तरतोपि मधुरो रस आम्लस्येति बुद्ध्युत्पत्त्या प्रश्नो त्तरभावस्थले प्रश्नस्थकिंपदार्थान्वयितावच्छेदकविशिष्टे उत्तरप्रति पाद्यविशेषरूपान्वयस्य व्युत्पत्तिसिद्धत्वादिति । तदपि न मनोज्ञं, उक्तस्थले प्रश्नस्थाम्रस्येत्यन्तानुषंगणैवोपदर्शितबोधस्योत्पत्तेः । अत्र च कः शब्दः प्रमाणमिति प्रश्नाश्रवणेन शब्दपदान्तरपूरणस्यावश्य कत्वात् । अन्यथा शब्दः प्रमाण मित्यस्यापि वैयर्थ्यप्रसंगात् ।

वस्तुतः शब्दोयुग इत्यादिप्रत्यक्षकरणस्य तादृशार्थबोधोपयि काकांक्षरहितवाक्यस्य वारणाय प्रमासामान्यबोधकपदस्य शाब्द प्रमारूपविशेषपरतायां अवश्यवाच्यतया शाब्दप्रमाकरणत्वरूपलक्ष्य तावच्छेदकलाभनिर्वाहात लक्ष्यदिशि शब्दपदान्तरपूरणादिकं विनैव प्रत्यक्षादिव्यावृत्तलक्ष्यतावच्छेदकलाभा ज्ञाव्याप्ति रिति ध्येयम् ।

मिश्रास्तु - प्रयोगहेतुभूतत्वं - प्रयोगसामग्रीसहकृतत्वं, भूधातोः प्राप्त्यर्थकतया सहकार्यसहकारिभावसम्बन्धरूपप्राप्ते रेवात्र विवक्षि तत्वा त्प्रयोगसामग्रीसहकृतत्वस्य भूतान्तेन लाभः । एवं च प्रयोग सामग्रीजन्यत्वे सत्यर्थतत्वज्ञानजन्यत्वं पर्यवसितं लक्षणम् । प्रयोग पदं शब्दपरम् । प्रकृतवाक्यार्थविशिष्टवैशिष्ट्यबोधात्मकस्य शब्द प्रागभावप्रत्यक्षस्य विशेषणतावच्छेदक प्रकारकज्ञानविधया वाक्यार्थ ज्ञानहेतुकस्य शब्दप्रागभावरूपविषयजन्यस्य वारणाय प्रागभाव मुपेक्ष्य हेतुपदस्य सामग्रीपर्यन्तपरत्वं, शब्दसामग्र्या शब्दातिरिक्ते अहेतुत्वात् । नच अर्थपदस्य स्वप्रतिपाद्यपरतायां आवश्यकत्वेन प्रागभावप्रत्यक्षे नातिव्याप्तिवकाशः, पयःकरणक सेकादिरूपवा· क्यार्थस्य तत्प्रतिपाद्यत्वाभावादिति वाच्यं, तादृशवाक्यार्थविशिष्ट वैशिष्ट्यबोधरूपस्य प्रागभावप्रत्यक्षस्य योग्यताज्ञानविधया तादृश वाक्यार्थविषयकशाब्दबोधे हेतुत्वा त्तादृशवाक्यार्थे तज्जन्यशाब्दबोध विषयत्वरूप तत्प्रतिपाद्यत्वस्या क्षतत्वादिति वदन्ति । तन्न साधीयः, शब्दत्वस्य लक्षणे निवेशनैवोपपत्तौ शब्दसामग्रीजन्यत्वपर्यन्तनिवेश स्या नातिप्रयोजनत्वात् ; वक्तृवाक्यार्थज्ञानस्य वाक्यार्थज्ञानज्ञानोपयोगिनः परकीयवाक्यार्थज्ञानेच्छादिद्वारा 'वाक्यप्रयोगहेतुत्वात पयसासिंचती तियोग्यवाक्ये वक्तृवाक्यार्थप्रमाजन्यतया लक्षणसमन्वयः । अयोग्य वाक्यार्थज्ञानस्य प्रमात्वाभावा त्रतत्रातिव्याप्तिः ।

अथ सामान्यतो वाक्यं प्रति वाक्यार्थज्ञानस्य हेतुतानसम्भवात्, शुकादिवाक्ये व्यभिचारात् ; - सतात्पर्यकवाक्यत्वस्य जन्यताऽवच्छेदकत्वोपगमेपि नाव्यभिचारनिर्वाहः; विशिष्यवाक्यार्थज्ञानंविनापि विशकलितविशेष्यविशेषणयो र्ज्ञाना त्तद्विशेष्यकतत्प्रकारकत्वेन ज्ञात्वा विशिष्टबोधकवाक्य प्रयोगसम्भवात् । वस्तुतो निस्ता-पर्यकशुकादि वाक्यस्येव वाक्यार्थबुबोधयिषाधीनवाक्यस्यापि वाक्यार्थज्ञानाघटित सामग्रीत ऊपपत्तिसम्भवात वाक्यार्थज्ञानमन्यथासिद्धमेव; एवं क्रमोत्प न्नवर्णसमुदायपर्याप्तवाक्यत्वावच्छिन्नस्य क्वचिदपि क्षणे नोत्पत्तिरिति वाक्यत्वस्यकार्यतावच्छेदकत्व मसम्भवदुक्तिकं,एतेन योग्यस्थलेसर्वत्रप्र-मेश्वरीयवाक्यार्थज्ञानमादाया व्यभिचारोपपादनेपि नै निस्तारइति चेद् ? भाभूदुक्तवाक्यार्थज्ञानं वाक्येकारणं, तथापि तस्य तत्प्रयोजकत्व मनपवाद मेव; तथाच लक्षणस्थ 'जन्य' पदस्य प्रयोज्यपरत्वा व्यनुपपत्तिः।

वस्तुत उपादानप्रत्यक्षविधया हेतुभूतभगवद्वाक्यार्थज्ञानजन्यत्वमादा यैव संवादिशुकादिवाक्यइवसंवादिवाक्यान्तरेपि लक्षणसमन्वयः । नचैवं तत्वपदवैयर्थ्यम्, वह्निना सिञ्चतीतिवाक्ये ववृतृवाक्यार्थज्ञानस्यो कतयुक्त्या अकारणत्वात्, भगवतः प्रकृतवाक्यार्थज्ञानाभावात् अतिव्याप्तिप्रसक्तेरिति वाच्यं; जन्यत्व प्रवेशेपि कालोपाधिमुद्रया · वाक्यार्थभ्रमहेतुके विसंवादिवाक्येऽतिव्याप्ति वारणाय तत्पदस्यावश्यकत्वात् । वह्निना सिंच तीत्यादि वाक्येपि प्रत्येकपदार्थान्तरवाक्यार्थतत्वज्ञानजन्यत्व मादाय अतिव्याप्तिवारणाय " प्रयोग हेतुभूते " ति । प्रत्येकपदेषु प्रत्येकवाक्येषु च तत्तदर्थ तत्वज्ञानजन्यतया तत्समुदायात्मक विसंवादिवाक्ये अर्थतत्व ज्ञानजन्यत्वसत्त्वेपि कस्यापि पदार्थज्ञानस्य अवान्तरवाक्यार्थज्ञानस्यवा लक्ष्यतावत्पदसमुदायाहेतुतया नातिव्याप्तिः ।

यद्यपि तत्तत्पदार्थ मवान्तरवाक्यार्थञ्चावगाहमानस्य भगव ज्ज्ञानस्य समूहालम्बनरूपजन्यप्रमायाश्च तावत्पद समुदायरूपविशं

वादिवाक्यहेतुतया तिव्याप्तिवारणशक्यमेव ; एवं प्रमास्वरूपयोग्य मात्रस्यलक्ष्यत्वे वह्निना सिंचतीत्यादिनिखिलवाक्यस्यैवाबाधित लक्ष्यार्थ गोचरप्रमास्वरूपयोग्यत्वेन लक्ष्यतया प्रयोगहेतुभूतत्वादि विशेषणव्या- वृत्त्यभावा द्वैयर्थ्यं ; तद्धर्मिणि तद्धर्मविगाहिप्रमाजन्य ज्ञानस्य धर्मिण स्तद्धर्मवत्त्वे प्रमाणमिति विषयविशेषनियन्त्रितप्रमालक्षण परत्वेपि भूतान्तविशेषणमनर्थकं ; पदार्थतत्व ज्ञानजन्यत्वस्य विसं- वादिवाक्यसाधारण्येपि सेकादिर्धार्मिकवह्निकरणत्वादिप्रमाया अप्रसिद्ध्या विसंवादिवाक्ये तत्तद्धर्मिणि बाधितत्तद्धर्माश्रे प्रमाणत्वा प्रसक्तेः; तथा प्येतादृशविशेष्यविशेषणनियन्त्रितलक्षणलाभाय भूतान्तम् ।

वस्तुतः घटः कर्मत्व मानयनं कृतिः इत्यादिस्वरूपा योग्य निराकांक्षवाक्यस्य घटकर्मकानयनादिरूपविषये प्रामाण्यवारणाय फलोपहितमात्रस्य लक्ष्यत्वे फलानुपधायक साकांक्षयोग्यवाक्येचाति व्याप्तिवारणाय स्वं यत्र यत्प्रतिपत्तं योग्य मुपधायकं वा तत्र तत्प्र- माजन्यत्वपर्यन्त मवश्यं वक्तव्यम् । तल्लाभायैव भूतान्त मर्थविशे- षणम् । प्रकृतप्रयोगरूपहेतो र्यो भूतः प्राप्त इति व्युत्पत्त्या अर्थं स्वबोध्यत्वलाभात् अर्थपदस्य विशिष्य तत्तदर्थपरतामात्रोपगमेन तत्तदुक्तार्थलाभात् ।

अथवा - प्रयोगहेतुभूतत्वं - प्रयोगो हेतु र्यस्य तत्सम्बद्धत्वं, स्वजन्यज्ञानसप्रानविषयकत्वपर्यवसितं तादृशज्ञान एव विशेषणम् ; तावता स्वं यत्र धर्मिणि यत्प्रतिपादकं तत्र तत्प्रमाजन्यत्वं निरा कांक्षादिव्यावृत्तं लक्षणार्थः ।

अथ वर्णत्वेन शाब्दप्रमासामान्यं प्रति स्वरूपयोग्यतया प्रमा स्वरूपयोग्यमात्रस्य लक्ष्यत्वे अर्थं स्यप्रतिपाद्यत्वविशेषणदान मयुक्तम्; नच - ध्वन्यात्मकशब्दवारणाय तदावश्यकता, शब्दत्वस्थले वर्णत्वं निवेश्यैव तद्वारणो चित्यात ; वर्णत्वादिजाते स्तारत्वादिजातिबद्प्रा- माणिकतया शब्दत्वेनैव शाब्दप्रमासामान्यहेतुतया ध्वनेरपि लक्ष्यतौ

चित्याञ्चेति चेन्न;- घटः कर्मत्व मित्यादिनिराकांक्षवाक्यस्य शब्द स्वरूपेण घटकर्मत्वादिविषयकप्रमास्वरूपयोग्यत्वेपि प्रमात्वनियतधर्मा वच्छिन्न तत्तदर्थविषयक प्रमानिष्ठकार्यतानिरूपित स्वरूपयोग्यताया एव तत्तदर्थनियन्त्रित प्रमाणलक्षणलक्ष्यतावच्छेदकतया घटः कर्मत्व मित्यादा वुक्तातिव्याप्ते रर्थं स्वप्रतिपाद्यत्वविशेषणदान मन्तरेण दुर्वा रत्वात् । नहि घटः कर्मत्व-मित्यादिवाक्यस्य प्रमात्वनियतकर्म-त्वादिविशेष्यक घटादिप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति स्वरूप योग्यता, तत्तदर्थबोधे परस्परसाकांक्षतत्तदर्थोपस्थापकपदत्वेनैव स्व रूपयोग्यत्वा, दिति तादृशवाक्यस्यालक्ष्यत्वात् । नच - तत्र घट पदोत्तरा म्पदत्वादिरूपाकांक्षाभ्रमा च्छाब्दबोधोत्पत्त्या तत्तदाकांक्षा ज्ञानविषयत्वेनैव तत्तदर्थविषयकशाब्दबोधयोग्यता, नतु तादृशाकांक्षा वत्त्वेनेति निराकांक्षवाक्यस्यापि स्वरूपयोग्यत्व मव्याहत मेवेति वाच्यं; तादृशरूपेण हेतुत्वे प्याकांक्षाभ्रमविषयतद्दिशवाक्यव्यक्ती नां स्वरूपायोग्यत्वस्य दुर्वारत्वात् ।

प्रयोगो हेतुभूतो यस्यार्थतत्वज्ञानस्येति समासात् ज्ञानान्तं शा ब्दप्रमापरं, तदेव जन्यं यस्येति बहुव्रीह्यन्तरावलम्बना च्छाब्दप्रमा करणत्वं समुदितलक्षणवाक्यार्थः । प्रत्यक्षादिप्रमाणातिव्याप्तिवारणाय शाब्दत्वं प्रमाविशेषणतयोपात्तम् । शब्दपदस्य लक्ष्यदिश्येव सम्ब-न्धः । लक्ष्यतावच्छेदकं च शब्दप्रमाणत्वं शब्दप्रमाणव्यवहारविषयत्वं, नतु शाब्दप्रमाकरणत्वं, अतो न लक्षणलक्ष्यतान्यच्छेदक्यो रभेद इत्यपि वर्णयन्ति ।

यथाश्रुतं तादृशज्ञानजन्यशब्दत्वरूपं लक्षणं ज्ञायमानशब्दस्य करणताभिप्रायेण । अतीतानागतशब्दज्ञानादपि प्रमोत्पत्त्या. शब्दज्ञान स्यैव करणत्वमिति स्वमतेतु शब्दज्ञानत्वं लक्षण मूह्यम् ।

प्रत्यक्षमात्रप्रामाण्यवादिन श्चार्वाकस्यानुमानखण्ड एव निराकृत त्वात् सम्प्रति प्रत्यक्षानुमानोभयप्रामाण्यवादिनं सौगतं निराकर्तु

ननु शब्दो नप्रमाणं । तथाहि –

तन्मतेन शंकते "(नन्विति) शब्द स्तज्ज्ञानं वा, " न प्रमाणं," - न प्रमाणव्यवहारविषय इत्यर्थः ।' प्रमितिकरणत्वाभावस्य साध्यत्वे " तथ हि करणविशेषः प्रमाण " मित्यग्रिमग्रन्थेन प्रमाकरणत्वस्य प्रमाणव्यवहारविषयतावच्छेदकत्व मभिधाय, प्रमारूपफलायोगव्यव च्छिन्नर्धात्मकप्रमाकरणत्वाभावस्य हेतुत्वाभिधानविरोधात् । यदि च प्रमायोगव्यवच्छिन्नत्वविशिष्टप्रमाकरणत्वाभाव स्साध्यः, तादृशविशे- षणमात्रस्याभावो हेतु रित्युच्यते; तदा साध्याविशेषविरहेण यथाश्रुत स्यापि संगतिः । नच्च - विशिष्टप्रमाकरणत्वाभावस्य साध्यत्वे सा ध्याविशेषस्योक्तरीत्या ' परिहारेपि करणविशेष इत्यादिना प्रमाकर णत्वविशिष्टस्य प्रमाणपदवाच्यत्वाभिधानस्या नुपयोगित्वं दुर्वारं, प्रमाणपदार्थत्वाभावस्य साध्यत्वे च प्रमारूपफलायोगव्यवच्छिन्नत्वरूप प्रमाकरणत्वस्य प्रमाणपदार्थतानवच्छेदकत्वे तदभावस्य प्रमाणपदार्थ त्वाभावसाधकतायां अप्रयोजकत्वेना निर्वाह्यत्वात् तादृशप्रमाकर णत्वस्य प्रमाणपदार्थतावच्छेदकत्वाभिधानसंगते रिति वाच्यं; फला योगव्यवच्छेदस्या भावरूपसाध्यप्रतियोगितावच्छेदकप्रवेश एव फला योगव्यवच्छेदाभावरूपहेतो स्तादृशसाध्याव्याप्यत्वाप्रसक्त्या नाप्रयोजक त्वशंकेत्याविष्कर्तुं फलायोगव्यवच्छेद मन्तर्भाव्य " करणविशेषः प्रमाण " मित्यादिना साध्यस्थप्रमाणपदार्थविवरणस्यौचित्येन तद्ग्रन्थ संगतेः । शब्दस्य विषयतया स्वप्रत्यक्षकरणत्वेपि नांशतो बाधादिः, शब्दप्रत्यक्षातिरिक्तप्रमाया स्साध्यादिघटकत्वात । व्यवहारघटित साध्यपक्षेपि शब्दप्रत्यक्षातिरिक्तप्रमाणव्यवहारो विवक्षणीयः ।

करणविशेषः प्रमाणं ! करणंच तत् , यस्मिन् सति क्रियाभवत्येव। नच शब्देसति प्रमाभवत्येव,- इति नायं शब्दः प्रमाणम् ।

नच - शब्दोनप्रमाणमिति वाक्यस्य प्रामाण्या प्रामाण्ययो व्याघातः,

---

(करणविशेष इति) प्रमायाः करण मित्यर्थः । " प्रमाणम् "- प्रमाणपदार्थः । अतो नोद्देश्यविधेययो रेकरूपेणोपस्थित्याऽनन्वयः । (यस्मिन् सतीति) यदधिकरणक्षणाव्यवहितोत्तरक्षणे स्वसमानाधिकरणफलायोगो नास्ति, तत्करण मित्यर्थः । सामानाधिकरण्यं च कारणतावच्छेदकसम्बन्धेन स्वाधिकरणे कार्यतावच्छेदकसम्बन्धेन वृत्तिः । अयोगः - अनुत्पत्तिः । " नच - शब्दे " तज्ज्ञानेच्छा " सति"- तदग्रिमक्षणे,"प्रमा भवत्येव"- नियमेनोत्पद्यते, तत्सत्त्वेपि सहकारि विलम्बेन व्यापारविलम्बेन तद्विलम्बादिति भावः । " इति वाक्यस्य "- इत्यादिभवदीयवाक्यस्य । (प्रामाण्याप्रामाण्ययो व्याघात इति) प्रामाण्ये शब्दस्या प्रामाण्यसाधनानुपपत्तिः; प्रामाण्याभावे भवतां तादृशशब्द प्रयोगानुपपत्तिः, परस्यशब्देऽप्रामाण्यविषयक प्रमोत्पत्त्यर्थ मेव तादृशवाक्य प्रयोगात् तादृशवाक्याप्रामाण्ये परकीय तादृश प्रमारूपेष्टसाधनत्व ज्ञानासम्भवात; नहि शब्देन साक्षादप्रामाण्य प्रमाया अजनकेपि परम्परयानुमित्यात्मक तत्प्रमाजननसम्भवः, न्यायस्य तद्घट कवाक्यस्य च वाक्यार्थप्रमाद्वारैवानुमित्युपयोगित्वादितिभावः ।

न्यायस्य तद्घटकवाक्यस्यवा वाक्यार्थबोधा जनकत्वेपि प्रत्येक पदार्थोपस्थित्य संसर्गाग्रहमूलक वाक्यतात्पर्यविशिष्टार्थ गोचरमानसधी द्वारोद्देश्यानुमितिं निर्वाहकत्वमक्षतमेवेति न • विशेषव्याघात• इति

अस्या प्रमाण्येपि एतदुत्थाप्यानुमाना विसंवादात् ।
-इतिचेन्न ; —
आकांक्षाद्दिमतः पदार्थस्मरणादि व्यापारवतः
प्रमाणत्वेन तत्सत्त्वे प्रमोत्पत्ते रावश्यकत्वात् ।
अतथाभूतत्वे च फलाजनकत्वस्य करणान्तर
साम्यात् ।

समाधत्ते (अस्या प्रामाण्येपीति)"अस्य"-शब्दो नप्रमाणमिति वाक्यस्य । " अप्रामाण्येपि " - साक्षा त्प्रमाजनकत्वाभावेपि । " एतदुत्थाप्यानुमाना विसंवादात् "-परम्परया तन्निर्वाह्यानुमिते र्यथार्थत्वात् । एतदुत्थाप्यमाना विसंवादिति क्वचित्पाठः । अनुमानेति पाठेपि अनुपश्चान्मानमिति व्युत्पत्त्या मानसज्ञानमेव तदर्थइति केचि द्वर्णयन्ति । तच्चिन्त्यम् ।

अस्माभिः शब्दत्वावच्छेदेन तज्ज्ञानत्वावच्छेदेनवा न प्रमाकरणत्व मुपेयते , अपितु तत्सामानाधिकरण्यमात्रेण ; अतस्तौगते स्वदवच्छेदेना प्रामाण्यं साधनीयम् , तच्च न सम्भवति, सकलसहकारिसमवहिते व्यापारविशिष्टे पक्षे उक्तहेतोरंशतो ऽसिद्धेरिति समाधत्ते (आकांक्षेति) " आकांक्षादिमतः " - आकांक्षाज्ञानादिरूप सहकारि समवहितस्य । " प्रमाणत्वेन " - प्रमोपधान प्रयोजकत्वेन । " तत्सत्वे "-तादृशस्य शब्दस्य तद्ज्ञानस्यवा सत्त्वे (प्रमोत्पत्तेरावश्यकत्वादिति) न चाकांक्षाज्ञानादिविशिष्टशब्दादि व्यापाराधिकरण क्षणानन्तरक्षणे फलोत्पत्ते रावश्यकत्वेपि यद्व्यक्तेः कारणत्व मभिमतं सह कार्यन्तरशून्यो य स्तस्य तद्व्यापारस्यवा धिकरणक्षण स्तदुत्तरक्षणे फलानुत्पत्त्या स्वाधिकरण क्षणाव्यवहितोत्तरकालाव व्यापकफलोत्पत्ति कत्वरूपफलायोगव्यवच्छेद स्तत्र दुर्घट एवेत्यत आह (अतथेति) यापूर्वक्षणे नसहकारिसमवधानं तदाफलानुपधायकत्वस्य प्रत्यक्षाद्युपधायकत्वक्षुरादिव्यक्ति च्छेदाद्युपधायक वाश्यादिव्यक्ति साधारणतया करणत्वा विरोधादित्यर्थः ।

तथापि शब्दो नप्रमाणान्तरं,

तथाचायमाशयः । निरुक्तरूपफलायोग व्यवच्छेदो नकरणता घटकः, अपितु यावत्सहकारिसमवहित स्वव्यापाराधिकरणक्षणाव्यव हितोत्तरकालत्व व्यापकफलोत्पत्तिकत्व रूपएव । अन्यथा-इन्द्रियादेरप्य करणत्वापत्तेः । यदिच सौगतमते सन्मात्रस्य क्षणिकतया फलोपधायक स्य चक्षुरादे स्तद्व्यापारस्यवा ऽन्यदासत्त्वा त्फलोत्पत्तिनियत स्वाधि करणक्षणाव्यंवहितोत्तरकालत्व व्यापकफलोत्पत्तिकत्व मव्याहतम् , तदा तेषां शब्दादेरपि तथात्वात् न कथं करणत्वमिति समस्तसमाधिः ।

निरुक्तफलायोगव्यवच्छेदस्य कर्मादिकारकसाधारण्येपि नक्षतिः, उपधेयसंकरे प्युपाधिभेदेन करणादिकारकभेदात् । नचैवं करणत्वमस्तु, किं फलायोग व्यवच्छेदेनेति वाच्यं, इन्द्रिय-त्वादिना चक्षुरादे स्स्पार्शनादिस्वरूपयोग्यत्वेपि चक्षुषास्पृशतीत्याद्य प्रयोगात् , अन्धेस्पृशतीत्याद्य प्रयोगाच्च । अथैवमपि फलोपधायकत्वं मेवकरणत्वमस्तु, किं फलायोगव्यवच्छेदानुसरणेन, फलोपधायक मात्रएव फलायोगव्यवच्छेदसत्त्वात् ; इति चेत ? सत्यं, तादृशपर्य वसितार्थएव फलायोगव्यवच्छिन्नं कारणमित्यस्य तात्पर्यम् । वस्तु तस्तु कर्मादिव्यावृत्तो यद्व्यापारः कारकान्तरव्यापाराव्यवधानेन फल निष्पादकस्तत्वं करणत्वं । अत एव पुरुषेण च्छिनत्ति कुठारइत्याद्यो न प्रयोगाः । हस्तव्यापार्यकुठारादे र्यत्र करणत्वं तत्र हस्तेन च्छिन त्तीत्यादयः प्रयोगास्तु न मुख्या इत्यवधेयम् ।

शब्दस्यानुमानान्तर्भाववादी वैशेषिकः प्रत्यवतिष्ठते (तथापीति) शब्दस्य प्रमाणत्वेपि नासौ स्वविषयकप्रत्यक्षभिन्ना या अनुमित्यन्या

पदार्थ संसर्गस्यानुमानादेव सिद्धेः ।

प्रमिति स्तत्करणमित्यर्थः । "नप्रमाणान्तर" मित्यस्य नानुमानभिन्नमिति नार्थः, ज्ञायमानलिंगस्य करणतामतेनुमानभेदाप्रसिद्धेः । अनुमान तादात्म्यस्य साध्यत्वेपि सिद्धसाधनं. न्यायमतेपि शब्दस्यालिंगत्वात । उक्तसाध्ये तत्वे साधकाभावादिति हेतुरूह्यः ।

ननु आकांक्षादिमत्पदद्वयोपस्थापितयोः पदार्थयोः पूर्वाप्रतीत परस्य प्रमाणान्तरत्वं सेत्स्यतीत्यत आह (पदार्थसंसर्गस्येति) एतेन मूलोक्तसाध्ये अनुमानादेव सिद्धेरित्यस्य हेतो र्वैयधिकरण्येपि नक्षतिः ।

मिश्रास्तु " नप्रमाणन्तर " मित्यस्य कल्पन प्रमाणान्तर्भूतमित्यर्थः, तत्वंचोभयवादिसिद्ध स्वकरणकप्रमासामान्यकत्वं । अत्रैव साध्ये हेतुः " पदार्थसंसर्गस्ये " त्यादिः । तदर्थश्चानुमान स.ध्यार्थकत्वादिति । अनुमितिसामग्र्यधीन स्वकरणक प्रत्यक्षान्यप्रमिति सामान्यकत्वादिति यावत् । अथवा अनुमानत्वेनैव संसर्गसाधकत्वादि.यर्थः । स्वनिष्ठ प्रत्यक्षान्यप्रमितिकरणतात्व व्यापकानुमितिकरणतात्व कत्वादिति यावत् । अखण्डाभावघटकतया नव्यभिचारावारक प्रत्यक्षान्यत्व विशेषण वैयर्थ्यमिति वर्णयन्ति । तच्चिन्त्यं , तादृशहेतोर्नैयायिका सिद्धत्वात् । यद्यपि प्रमाणान्तरत्वे साधकाभावोपि प्रमाणान्तरत्ववाद्य सिद्धः, तथापि साधकमव्यवस्थाप्य तदभावासिद्धंयुपन्यासेनवादिनिरोधो शक्य इति नदोषः ।

ननु गामभ्याजेत्यादि वाक्यज्ञानं यत्र वर्तते कर्मत्वाभ्या जन्यादि पदार्थे गोकर्मत्वादिपदार्थसंसर्गस्तत्र तत्संसर्गव्याप्यधर्मवत्ताज्ञानमन्तरेण नानुमातुं शक्यते, तादृशवाक्यज्ञानं विनापि संसर्गसिद्धिस्सम्भवतीति वाक्यज्ञानम किंचित्करमिति वाक्यार्थज्ञानस्य वाक्यज्ञानान्वयव्यति रेकानुविधान मनुभवसिद्धं शब्दस्य प्रमाणान्तरत्व मन्तरेण नोप

तथाहि-गामभ्याज दण्डेनेति पदानि वैदिकपदानि वा तात्पर्य विषयस्मास्ति संसर्ग ज्ञानपूर्वकाणि,

---

पद्यते; नच साध्यपक्षज्ञानसम्पादकत्वेना सन्निकृष्टार्थवाक्यस्यानुमानोपयोग इति वाच्यम् , आकांक्षादिरहितपदसमूहज्ञाना दपि साध्यादुपस्थितिसम्भवेना कांक्षादिमत्पदसमूहादिरूपवाक्यज्ञानान्वय व्यतिरेकानुविधानानुपपत्ते र्दुर्वारत्वा, द्दित्याशंक्य; श्रोतु रेकपदार्थे परपदार्थसंसर्गानुमापकस्य वाक्यज्ञानसापेक्षग्रहस्य लिंगस्य नियमतो न सम्भव इति वाक्यविशेषे आकांक्षादिघटित तद्विशेषत्वेन हेतुता, वक्तृवाक्यार्थज्ञानपूर्वकतानुमानमेव वाक्यार्थप्रतीत्यनुरोधेनोपगन्तव्यम् , अत आकांक्षादिमत्त्वेन वाक्यज्ञान मनुमानोपयोगि, वाक्यार्थज्ञानोपरक्तज्ञानसिद्धावेव च वाक्यार्थसिद्धि रित्याह (तथा हीति) लौकिकवाक्यस्थले वक्तृवाक्यार्थज्ञानानुमानेन वाक्यार्थ सिद्धया तदेवाप्रमाणं, वेदस्तु प्रमाणान्येवेति मीमांसका उपगच्छन्ति, तन्मता देतन्मतस्य विशेषं दर्शयितुं वेदवाक्यान्यपि पक्षतया तिदिशति (वैदिकेति) एवं च मीमांसकमते वेदस्यापौरुषेयतया तत्र वक्तृज्ञानानुमानासम्भवेन वेदस्य प्रमाणान्तरता । एतन्मतेतु तत्रापि वक्तु र्भगवतो वा वाक्यार्थज्ञानानुमानेन वा क्यार्थसिद्धिसम्भवात् वेदस्यापि नप्रमाणान्तरतेति विशेषो लभ्यते । (तात्पर्येति) स्वतात्पर्यविषयो यः स्वघटकपरस्पराकांक्षादिमत्पद स्मारितार्थयोः परस्परसंसर्ग स्तज्ज्ञानपूर्वकाणीत्यर्थः । गामभ्याजे त्यादिवाक्ये तद्घटकं यत्परं परांकांक्षादिमद्द्वोपदद्वितीयापदादिकं तत्तदर्थयो र्मिथस्संसर्गस्याधाराधेयभावादे र्ज्ञानपूर्वकत्वसिद्धया भिमत सिद्धिः । अतात्पर्यविषयस्य गोकर्मत्वादे रेककालीनत्वादिसंसर्गस्या भ्याजनकृत्यादे श्च कार्यकारणविषयविषयिभावादिसम्बन्धस्ये कत्र तात्पर्ये परस्य सिद्धे र्वारणाय स्वतात्पर्यविषयत्वं संसर्गविशेषणम् ।

नच तात्पर्याविषयसंसर्गासिद्धावपि तात्पर्यविषयतासिद्धौ बाधका भावा दभिमतसिद्धेः किं तात्पर्यविषयत्वविशेषणेनेति वाच्यम् , न्याय मते तात्पर्याविषयसंसर्गसिद्धे शब्दा दनुत्पत्त्या तत्साम्याय तादृश विशेषणोपादानात् । स्वतात्पर्यविषयत्वं च तज्जन्यबोधविषयत्वेन प्रतिपादकेच्छाविषयत्वं, न्यायमते तात्पर्यविषयस्या प्रकृतवाक्यस्थपद स्मारितार्थसंसर्गस्या सिद्धया प्रकृतानुमानादपि तादृशसंसर्गासिद्धि वारणाय स्वघटकपदद्वस्मारितार्थ प्रतियोगिकत्वंसंसर्गविशेषणं । प्रकृत वाक्यस्थयो रपि ययोः पदयो र्नाकांक्षासत्ति र्वा तत्पदद्वयार्थयोरपि तात्पर्याविषयसंसर्गस्यासिद्धया तत्सिद्धिवारणाय परस्पराकांक्षादिमत्त्वं पदविशेषणम् । नच प्रकृतवाक्यघटकगवाद्विपदयो र्मिथस्साकांक्षयो यावर्थौ तयो राधाराधेयभावरूपाकांक्षानिरूपकसम्बन्ध एव न्याय मते भासते, नतु तात्पर्याविषयोपि तत्तत्पदाकांक्षादिनिरूपकैककालीनत्वा दिसंसर्ग इति वैशेषिकमते उक्तानुमाना त्कथं तद्भाननिर्वाह इति वा- च्यम् ; स्वघटकपदद्वयाकांक्षानिरूपकत्वस्य संसर्गविशेषणतयोपपत्तेः । वस्तुतः यत्संसर्गनिरूपित परस्पराकांक्षादिमद्य त्पदद्वयघटितं यद्वाक्यं तत्पदद्वयार्थयो र्मिथस्तत्संसर्गज्ञानपूर्वकमिति सामान्यव्याप्त्यादरा त्सा ध्ये ऽाकांक्षादिमत्त्वं न प्रवेश्यं, हेतुस्थयत्पदीय यदर्थ घटितहेतौ पक्षधर्मता ज्ञानं साध्यस्थं तत्पदीय तदर्थघटितसाध्यस्यैव पक्षधर्मताबलेन सामान्यमुख व्याप्तितः सिद्धिनियमात् ययोः पदयोर्नाकांक्षादिकं तयो र्हेत्वघटकतया उक्तातिप्रसंगा नवकाशात् । एवं स्वघटकपदद्वय घटितत्वरूप हेत्व वत्त्वेन हेतुस्थयत्पदेन तदुपादानासम्भवात् उक्तरीत्याति प्रसंगशंका नवकाशात् । यद्यपि साध्ये तात्पर्यप्रवेशनमप्यफलं, तत्प्र वेशेपि हेतौ तात्पर्यनिवेशस्यावश्यकतया यत्संसर्गपर पदद्वयघटितं यद्वाक्यं त त्तत्संसर्गज्ञानपूर्वकमिति सामान्यव्याप्त्या पक्षधर्मताबलात् तात्पर्याविषय संसर्गमात्र सिद्धिसम्भवात् ; तथापि पक्षधर्मताबला त्तात्पर्याविषयोय संसर्ग स्तज्ज्ञानपूर्वकत्वमेव सिद्ध्यतीति प्रदर्शनार्थं

मेव संसर्गे मूलकृत स्तात्पर्यविषयत्वोत्कीर्तनं, नतु तस्य साध्यघटकत्वं तदभिप्रेतमिति न विरोधः । अर्थयोर्वृत्त्यापदस्मारितत्वलाभायवा, तेन समवायादिनासम्बन्धेन पदस्मारितस्याकाशादे स्संसर्गस्यतात्पर्यविषयत्वेपि न सिद्धिः । तत्पदस्मारितार्थे तत्पदतात्पर्यमपि निवेश्यम् , अन्यथा गामभ्याजेत्यादौ गोपदार्थसंकर्मत्वादिना यत्र गवादिपदस्मारित पृथिव्यादिसम्बन्धस्यापि बक्तृतात्पर्यविषयता गवादिपदतात्पर्य विशेषतः पशुविशेषादावेव तत्र पृथिव्यादिसंसर्गसिद्धिप्रसंगात् । धूमपदाद्धूमज्ञाने ऽनुमानाद्वह्निधीर्भविष्यतीत्यभिसन्धाय यत्र धूमोस्तीतिवाक्य मुच्चरितं तत्र धूमपदेनलक्षणयावह्निस्स्मारितत्वेपि न प्रथमतोवह्नि संसर्गधीः, स्वजन्यबोधंविषयत्व प्रकारकेच्छारूप स्वतात्पर्यनिवेशात, उक्ततात्पर्यंच वह्निबोधांशे धूमपद प्रयोज्यत्वस्यैव भानाद्वह्नेस्तद्विषयत्वेपि अतिप्रसंगविरहात । अथ पदार्थसंसर्गेच तात्पर्यविशेषणप्रवेशेपि यत्रा ख्यातस्य मुख्यार्थेकृतौ अभ्याजनरूपधात्वर्थस्य विषयितारूपसंसर्गे लक्ष्यार्थसंयोगादिरूपव्यापारेच तस्यानुकूलतारूपसंसर्गेतात्पर्य, तत्र कृतावभ्याजनस्यानुकूलतासम्बन्धः कथं न सिद्धयति, अभ्याजनकृत्योः पदार्थयोरनुकूलतासंसर्गस्य च तात्पर्यविषयत्वात् ; नच तत्र कृतिनिष्ठानुकूलत्वस्य तात्पर्याविषयत्वान्नतत्सिद्धिरितिवाच्यम् , अनुकूलतासंसर्गस्य व्यापारांशे बोधोभवतित्यभिप्रायेण सामान्यतः कृतिनिष्ठानुकूलताया अपिभानात ; एवं यत्र गोरानन्दनमित्यादौ गोपदार्थ पशुविशेषीयत्वेन षष्ठ्यर्थकर्मत्वांशे संसर्गप्रतीति र्भवतु गोपदार्थेषु प्रतियोगित्वेन षष्ठ्यर्थसम्बन्धांशे संसर्गप्रतीति र्भवति त्याकाराभिप्रायः , तत्रेष्वादि प्रतियोगिक कर्मत्वानुयोगिक संसर्ग सिद्धिप्रसंगश्च , इष्वादेः कर्मत्वादेश्च पदार्थस्य सामान्यत स्तत्संसर्गस्यच तात्पर्य विषयत्वात्, इति चेत? सत्यं, तत्पदार्थ संसर्गयोः पृथ. क्तात्पर्यविषयत्वविशेषणे नैतादृशांतिप्रसग. वारणसम्भव र्शात तत्पदस्मारित यद्यदर्थ प्रतियोग्य. नुयोगिकत्वेन यत्संसर्ग

आकांक्षादिमत्पद कदम्बत्वात् ,

बोधोभिप्रेतः तत्प्रतियोगिक तदनुयोगिकतत्संसर्ग ज्ञानपूर्वकाणित्येव साध्यं विवक्षणीयं, तथाऽति च नोक्तातिप्रसंगः , सामान्य व्याप्त्यापक्षधर्मतावलेन च पूर्वानुपस्थित तत्तत्पदार्थ प्रतियोग्य नुयोगिक तत्तत्संसर्गक वाक्यार्थ घटितोक्तसाध्य सिद्धेरपिसम्भवः । एवञ्च विशिष्य 'वाक्यार्थसिद्धया प्रवर्तकज्ञानानिर्वाहादि उक्ता नुपपत्तिरुद्भवति । एवंच सिद्धान्ते 'स्मारितपदार्थ संसर्ग ज्ञानपूर्वका णी' ति अनुमिति स्यादित्यनेन तत्प्रवर्तक ज्ञानानिर्वाह कथनं तत्सामान्यव्याप्त्या प्रसिद्ध विशेषधी र्नभवतीत्याशयेन । प्रवर्तक ज्ञानानिर्वाहकथनंच दर्शितातिप्रसंग वारणा निर्वाहस्या प्युपलक्षणम् । अत्र स्वप्रतियोगित्वा नुयोगित्वाभ्यां तत्तत्पदबोध्यत्वेन यो भिप्रायः तद्विषय तत्तत्पद स्मारितार्थ प्रतियोगिकोय स्संसर्ग स्तज्ज्ञानपूर्वकाणीत्येव साधर्तायमिति नोक्तातिप्रसंगइति वाच्यम्, तत्रापि साध्य घटक संसर्गे स्वत्व निवेशेनाननुगमेन तादृशानुमाना निर्वाहात् । वाक्यान्तर घटक पदद्वय तात्पर्य विषयस्य प्रकृत वाक्यघटक परस्परा कांक्षारहित पदद्वय तात्पर्यविषयस्य च संसर्गस्य सिद्धिवारणाय यत्पदार्थयो स्संसर्गसिद्धि रुद्देश्या तत्तत्पदयो र्विशिष्य साध्यहेत्वो स्वस्थानिवेशनीय तया सामान्यव्याप्त्या अप्रसिद्ध विशेष सिद्धि स्वीकार मन्तरेणा निर्वाहाच्च । (आकांक्षादिमदिति) परस्पराकांक्षाशक्तियोग्यताव त्पदद्वय घटितत्वादित्यर्थः । निराकांक्षायोग्यपदद्वय घटितवाक्ये योग्यताघटितवाक्ये योग्यताघटित हेत्वभावेपि योग्यानिराकांक्षवाक्ये पूर्वोक्तदिशा साध्ये आकांक्षाप्रवेशेन शुक्लवाक्यइव परमेश्वरीय संसर्ग प्रमापूर्वकत्व सत्त्वेपि व्यभिचारो दुर्वारइति हेतौ आकांक्षाप्रवेशः । यदिच साध्ये श्राकांक्षाप्रवेश्य सामान्यव्याप्त्योक्तातिप्रसंगो वार्यते, तदा व्यभिचाराभावेपि निराकांक्षपदयो र्हेतुघटकत्वे प्रकृतस्थले ग-

वादिपद तृतीयादि पदार्थयो स्संसर्ग सिद्धिप्रसंगइति तद्वारणायमि यस्याकांक्षयत्पदघटितं यद्वाक्यमिति हेतौ निवेशस्यावश्यकतया हे त्वाकांक्षा निवेशस्यावश्यकता

मिश्रास्तु संसर्गतात्पर्यरहिते निराकांक्षे तात्पर्यघटितसाध्याभावेन व्यभिचारवारणाय हेतौ आकांक्षाप्रवेशनमावश्यकम् । नच सर्वत्र योग्यनिराकांक्षेभगवतएव तात्पर्यं संसर्गप्रमांचादाय साध्यसत्त्वमुपपादयितुंशक्यते, अबोधकेनिराकांक्षे तद्वाक्यजन्यत्वेन. संसर्गबोधविषयकेच्छारूपतात्पर्यस्य भगवतोसम्भवात् ; तदिच्छाया व्यधिकरणा प्रकारत्वात् । अथ शुकवाक्ये आकांक्षादिसत्त्वेपि तात्पर्यगर्भसाध्याभावत्वेन व्यभिचारस्य दुर्वारतया हेतौ तात्पर्यप्रवेशावश्यकतया नोक्तव्यभिचारस्यावकाशः । नच शुकवाक्ये व्यभिचारवारणायसामान्यतः किंचिदर्थपरत्वमेवनिवेश्यं, अतः पदार्थस्वरूपपरमिथ स्संसर्गतात्पर्यशून्ये निराकांक्षे व्यभिचारवारणायाकांक्षा निवेशनमिति वाच्यम् ; पदार्थस्वरूपपर संसर्गतात्पर्यरहितसाकांक्ष वाक्यस्यापिसम्भवात , तत्र व्यभिचारवारणाय संसर्गतात्पर्यस्यापि हेतौ निवेशनीयतयाऽऽकांक्षाया अनिवेशेप्युक्त व्यभिचारानवकाशादिति चेन्न; - संसर्गतात्पर्यस्यैवाकांक्षापदेन विवक्षितत्वादित्याहुः ।

नचैवं एतन्मते योग्यतासत्तिमत्त्वेसति संसृष्टार्थपरत्वादिवै लक्षण्यावतीकारीय हेत्वविशेषः, तत्राम्वयप्रयोजकरूपवत्त्वात्मक योग्यताया निवेशात् । अत्र च बाधकप्रमाणाभावरूपाया स्तस्यानिवेशेन विशेषात् ।

नचैवं घटः कर्मत्वमानयनंकृतिः रित्यादावप्युक्तहेतुना संसर्ग सिद्धिसम्भवात् तद्व्यावृत्तये आकांक्षाया आनुमानिकंवाक्यार्थबोधे सापेक्षता नस्यादितिवाच्यम् , परस्परसाकांक्षपदयोः परस्परस्वार्थ संसर्गतात्पर्येण. बुद्धोधयिषुणा प्रयोगा दाकांक्षाया स्संसर्गतात्पर्यग्राहकत्वेन प्रकृतानुमानोपयोग निर्वाहात् ।

इदमत्रावधेयम् । साध्ये तात्पर्यविशेषण प्रवेशेन व्यभिचारप्रसक्तिमभिदधानस्य मिश्रस्य स्वार्थानुमानेपि व्यर्थविशेषणता न दोषइत्यभिप्रेतं । तथाच तन्मते यथाश्रुताकांक्षाया अपि परस्पराकांक्षारहितपदद्वयार्थ तत्संसर्गसिद्धिवारणाय तात्पर्यवत्साध्य घटकता । तथाच हेतुस्थाकांक्षापरमेवेति तस्य संसर्गपरत्वार्थकत्वमयुक्तं । एतद्रीत्यैव संसर्गतात्पर्यघटिते लीलावतीकारीयहेतौ निराकांक्षे मणिकारस्य व्यभिचारप्रदर्शनं संगमयितुं शक्यते । यत्तु पदार्थान्तरसंसर्गसिद्धिवारणाय स्वप्रतिपाद्यत्वं साध्यस्थ संसर्ग विशेषणं, एवञ्च निराकांक्षे स्वप्रतिपाद्यसंसर्गाप्रसिद्ध्यासाध्यासत्वेन व्यभिचारवारणाय हेतावप्याकांक्षाविशेषणम् ; नच तथासति तात्पर्यविषयत्वादिविशेषण वैयर्थ्यं, तात्पर्याविषयसंसर्गादे स्वप्रतिपाद्यत्वाभावेनैवानतिप्रसंगादितिवाच्यं, स्व प्रतिपाद्यत्वं स्वरूपयोग्यप्रतिपत्तिविषयत्वं, तात्पर्याविषयसंसर्गस्यापि तथात्वमक्षतमेव, एवंच संसर्गप्रतिपत्ति स्वरूपयोग्यनिराकांक्षे व्यभिचारवारणाय हेता वाकांक्षादिमत्यपि आकांक्षादि-ज्ञानविरहेणाप्रत्यायके व्यभिचारः। यदिचा कांक्षादि ज्ञानाविषये तद्घटितहेतो र्व्यभिचार ज्ञानासम्भवात् स्वरूपसतोव्यभिचारस्य च स्वार्थानुमाने अदोषत्वान्न दोष इत्युच्यते, तदा आकांक्षादिमत्त्व ज्ञानविषये प्रतिबन्धक सिद्धि सामग्रीविशेषादि वशेना प्रत्यायके वाक्ये व्यभिचार ज्ञानसम्भवात् अनुमानानुपपत्ति र्दुर्वारैव । नच यदा वाक्यविशेषे आकांक्षादिमत्वं ग्रहीत्वा व्यभिचारोग्राह्यः, तदा प्रतिबन्धक समवधाने वाक्यार्थ बोधानुत्पत्त्या नुमित्यनुत्पत्ति र्नक्षतिमावहति, यदिच तदा नोक्तप्रतिबन्धक समवधानं, तदा तत्राकांक्षादिमत्त्व ज्ञानात् तद्वाक्यस्य प्रत्यायकत्व मावश्यकमिति व्यभिचारस्य ना वकाश इति वाच्यं; यदा व्यभिचारग्रहविषय वाक्यान्तरार्थ ज्ञानस्यैव प्रतिबन्धक समवधानं नंतु प्रकृतवाक्यार्थ ज्ञानस्य तदा प्रकृतवाक्यार्थसिद्धयर्थ मनुमानस्याप्यवश्य निर्वार्ह्यत्वात् तन्निर्वाहस्य च सामान्य

व्याप्ति ग्रहपरिपन्थि व्यभिचार ज्ञानेनाशक्यत्वात् इति , परास्तम् - प्रतिबन्धक समवहिताकांक्षा ज्ञानविषय वाक्यस्यापि स्वरूपयोग्य त्वेन स्वप्रतिपाद्यत्व प्रसिध्या टक व्यभिचारानवकाशादिति । तदसत् , स्वरूपयोग्यत्वस्य प्रतिपाद्यताघटकत्वे पदार्थान्तर संसर्ग व्यावर्तना सम्भवात् । पदार्थपदस्य प्रकृत पदार्थ परता मुपगम्यैव तस्य व्यावर्त नीयत्वात् । यदिच हेतु विशेषण सार्थकत्वायैव स्वरूपयोग्यक प्रतीतिविषयत्वरूप प्रतिपाद्यत्वं साध्ये निवेश्यते तदा संसर्ग प्रति पादकत्व साध्यएव पर्यवसानादिति " यत्वि " त्यादिमूलेनताद्दश साध्य दूषणविरोधइतिदिक् !

आदिपदेना सत्तियोग्यतयोः परिग्रहः । आसत्तिर व्य वधानेनान्वय प्रतियोग्युपस्थापकत्वं, तदुपादानाद नासन्नयो राकांक्षादि मत्पदयो रासत्ति गर्भसाध्याभावेन स्वातन्त्र्येणा सत्ते स्साध्यघटकत्वेपि हेतु विशेषण सार्थक्यानुरोधेन गिरिर्भुक्तमग्निमान् इत्यादौ व्यवधानेनोपस्थितयो रिर्यग्निमत्पदयो स्तात्पर्यविषयस्यापि सम्बन्धस्य न्यायतेशाब्दबोधाविषयस्य सिद्धिवारणाय वा स्मारित· त्वस्या व्यवधानेन स्मारितत्वरूपस्य विवक्षणीयतया तद्गर्भसाध्याभा· वेन प्रसक्तस्य व्यभिचारस्य नावकाशः । वृत्त्या पदस्मारितत्वमासत्तिः, तदनिवेशे वृत्त्यार्थास्मारके वृत्त्यास्मारितत्व गर्भसाध्दाभावेन व्यभि· चारस्स्यादिति तन्निवेशइतिकेचित । योग्यताया अनिवेशे ऽयोग्यस्थले एकपदार्थ प्रतियोगिकापरपदार्थानुयोगिकसंसर्गाप्रसिद्धया तद्घटित साध्यासत्त्वाद्व्यभिचारइति तत्रतन्निवेशः । योग्यताच विशिष्यएकपदे अपरपदस्य यत्पदार्थप्रतियोगिकत्व स्वार्थानुयोगिकत्व बाधकप्रमाणा भाव स्तत्संसर्गकत्वम् । एवंच स्वघटकीभूत 'गवाश्मादिपदाकांक्षा निरूपक गवाश्मादिपदस्मारितार्थ प्रतियोग्यनुयोगिकत्वबाधक प्रमा· णाभाववत्पदस्मारितार्थप्रतियोग्यनुयोगिकत्व 'बुबोधयिषा विषय- संसर्गकत्वं हेतुः फलितः । 'निरूपकान्तं 'प्रमाणाभाववदन्तं च

संसर्गविशेषणम् । तादृशादिविधपदाकांक्षानिरूपक तत्तत्पदस्मारितार्थ प्रतियोग्यनुयोगिकत्व बुबोधयिषाविषयतत्तत्पदस्मारितार्थ प्रतियोग्य नुयोगिकसंसर्गज्ञानपूर्वकत्वंपक्षधर्मताबललभ्यं प्रकृते साध्यम् । तत्पदं सर्वत्र यत्वतत्त्वाभ्यां निवेश्य सामान्यव्याप्ति रादरणीया, नतु वि-शिष्य, तेन न घट मानयेत्यादिवाक्यस्य दृष्टान्तत्वानिर्वाहः । नवा साध्य प्रसिद्धिमात्रेण कृतकृत्यता ।

एतेन घटः कर्मत्वमित्यादिपदद्वयस्याप्यभेदान्वये साकां क्षतया भेदान्वये योग्यतया च हेतुत्वत्वा त्तत्पदद्वयाकां क्षानिरूपक तत्तत्पदार्थप्रतियोग्यनुयोगिकसंसर्गाप्रसिद्धया साध्या सत्त्वेन व्यभिचारः, एवं वह्निना सिंचतीत्यादौ लक्षणादिना वह्न्या-दिपदस्मारितजलादिनिरूपित तात्पर्याविषयसंसर्गघटितयोग्यताबत्त्वा द्वह्न्यादिसंसर्गतात्पर्यबत्त्वा च्च हेतुत्वेन तात्पर्यविषयवह्निसेककर-णत्वादि प्रतियोग्यनुयोगिक संसर्गाप्रसिद्धया साध्याबत्त्वेनव्यभिचारः, एवं तत्रैव स्मारितार्थांतर प्रतियोगिक तात्पर्यविषय संसर्गघटित यो ग्यताबत्त्वेन तात्पर्यविषय स्मारितार्थ संसर्गघटित साध्याबत्त्वेन व्य भिचारइति निरस्तं; प्रथमे आकांक्षानिरूपक संसर्गस्य योग्यत्वा घटकतया न्यत्र तात्पर्यविषयसंसर्गस्या तथात्वेना स्मारितार्थ प्रतियोगि कतात्पर्य विषयसंसर्गस्यच तथात्वेन दर्शित निष्कृष्टेहाव सत्त्वात् ।

गवामादिपद स्मारितगोकर्मत्वादिसंसर्गस्य यत्र तदर्थप्रति योग्यनुयोगिकत्वेन न बुबोधयिषितत्वम्, अपितु तादृशपदस्मा रितार्थान्तरप्रतियोग्यनुयोगिकत्वेनैव. तत्र गोकर्मत्वादिप्रतियोग्यनु योगिकत्वेन तत्संसर्गसिद्धिवारणाय साध्यघटकबुबोधयिषायां तत्त त्पदस्मारितार्थप्रतियोग्यनुयोगिकत्वावगाहित्वं निवेशितम् । संसर्गे तत्तत्पदार्थप्रतियोगिकत्वाप्रभाने प्रवर्तकज्ञानानिर्वाह इति तत्र तद्विशे

घटमानयेति[पद]वत् । योग्यतासत्तिमत्त्वेसति संसृ
ष्टार्थपरत्वात्, तत्परसन्निधिमत्त्वाद्वेतिन हेतुः; सं
सृष्टोहि योर्थस्तत्परत्वं तत्परसन्निधिमत्त्वंवा असिद्धं,

षणप्रवेशः ।• (घट मानयेति [पद] वदिति) नच तादृशवाक्येपि संसर्गज्ञानपूर्वकत्व मीदृशानुमानान्तरेण ग्राह्यं, तदनुमानदृष्टान्तेप्यनु मानान्तरेणैवेत्यनवस्थेति वाच्यम् ; तादृशानवस्थाया इष्टत्वात् । अविरळतदनुमानपरम्परायां एवानिष्टत्वात्, तस्यास्तु सुषुप्त्यादिना विच्छेदेन बाधितत्वात् । दृष्टान्ते कालान्तरानुमित साध्यस्मृत्यैवा नुमाननिर्वाहेण विरळानुमितिपरम्परायाः प्रकृतेन पेक्षणात् । ईदृशानु मानं विनापि स्ववाक्ये अनुव्यवसायोपस्थितस्वीयवाक्यार्थज्ञानपूर्वक त्वस्य सुग्रहतया तस्य दृष्टान्ततया प्युपपत्तेः । उक्तसाध्ये लीलाव तीकारीय हेतुद्वयं दूषयति (योग्यतासत्तीत्यादि) (संसृष्टेति) संसृष्टार्थपरत्वं एकपदार्थे स्वान्यपदार्थ संसर्ग प्रतीतीच्छयो च्चारित त्वं , नत्वेकपदार्थ संसर्गवदपरपदार्थं प्रतीतीच्छयोच्चारितत्वमित्याश येन योग्यतोपादानं । अन्यथा एकपदार्थं संसर्गवदपरपदार्थस्यायोग्य स्थले प्रतिबध्यविशेष्यदळासत्त्वेनैव व्यभिचारवारणे नैतद्धेयधर्मोपपत्तेः। संसृष्टोहियोर्थ इत्यादिदूषणाभिधानं त्वाशयमस्फुटतया ऽविज्ञायायोग्य- त्वार्घटित द्वितीयहेतौ च तत्परत्वं संसृष्टायोर्थस्तत्परत्वमेव, अतो यो- ग्यता तत्र नोपात्ता । तत्रं च तादृशविशेषण • माशयावबोधे नैवेत्यवधेयम् । (तत्परेति) संसृष्टार्थपरत्वे सत्यासत्तिमत्वादित्यर्थः (संसृष्टोहीति,) .संसृष्टोर्थइत्यस्य एकपदार्थसंसृष्टोपरपदार्थ इत्यर्थः । "असिद्धं"-अनुमानात्पूर्वमनिश्चितम् । तथा च पक्षे हेतुतावच्छेदक

संसर्गस्य प्रागप्रतीतेः ।

संसृष्टत्व प्रकारकप्रतीतिपरत्वं तत्प्रकारक प्रतीतिपर सन्निधिमत्त्वंवा अनाप्तोक्ते निराकांक्षेच व्यभिचारि । संसर्गस्य बहुप्रकारत्वेपि नानाभिमत संसर्गासिद्धिः,

---

विशिष्टहेतुमत्तानिश्चयाभावाद नुमित्यनुपपत्तिरितिभावः । (संसर्गस्येति) " संसर्गस्य "- तादृशहेतुघटकस्यैकपदार्थे अपरपदार्थसंसर्गस्य । "प्राग-प्रतीतेः"- अनुमानात्पूर्वमनिश्चयात ।

यद्यपि स्वोक्तहेतुघटकबाधक मानाभावरूपयोग्यताया अपि वाक्यार्थबदनिश्चयात्तु लयोनुयोगः, तथापि वाक्यार्थीभूतसंसर्गस्य पूर्वनिश्चयोपगमे ततएवानुमानकार्यनिर्वाहा दनुमानवैयर्थ्यमिति तदुपगमासम्भवः; बाधकप्रमाणाभावरूप योग्यताया निश्चयोपगमेतु न तथेति विशेषः । तन्निश्चयस्याप्यसम्भवेनोपगमासम्भवइति स्वीयहेतावपि दूषणं पुनरग्रेवक्ष्यते । प्रथमहेतौ योग्यतोपादानवैयर्थ्यमपि बोध्यम् ।

ननु एकपदार्थे अपरपदार्थसंसर्गवत्त्वं न हेतुघटकं, येनोक्तदोषस्यात्, किन्तु तात्पर्यघटकं प्रतीति विशेषणतयैव पदार्थसंसर्गस्य हेतुघटकतेत्याशंक्य दूषणान्तरमाह (संसृष्टत्वेति) एकपदार्थे अपर पदार्थप्रकारकसंसर्गप्रतीतीच्छयोच्चारितत्वमित्यर्थः । " तत्परसन्निधिमत्त्वं"- तादृशप्रतीतिच्छयोच्चारितत्वेसति आसत्तिमत्त्वम् : " अनाप्तोक्ते "- अयोग्यवाक्ये । नंच अत्र योग्यताघटित प्रथमहेतौव्यभिचारइति वाच्यम् ; स्थिरजलाभिप्रायप्रयुक्ते पयसाभिश्चतीत्ययोग्यवाक्ये तन्मतसिद्धान्वय प्रयोजकरूपवत्त्वात्मक योग्यतासत्त्वेन व्यभिचारात् । तात्पर्यनिवेशम प्रयोजनं दर्शयति (संसर्गस्येति) प्रकृत वाक्यघटकपदोपस्थापितार्थसंसर्गस्य, " बहुप्रकारत्वेपि "- तात्पर्यविषय

स्य तात्पर्याविषयत्वात् । अन्यथा शब्दादप्य
भिमतान्वय बोधो नस्यान् ॥

अत एव. विशेषणविशेष्यभाव वदर्थकानि.

त्वया विषयभेदेन नानाविधत्वेपि । "नानभिमतसंसर्गसिद्धिः" -न तात्पर्याविषयसंसर्गसिद्धिः । "तस्य" -तात्पर्याविषयसंसर्गस्य । "तात्पर्याविषयत्वात्" -तात्पर्यविषयतात्मक विशेषणाभावेन यथोक्तसाध्ये अप्रवेशात् ।

केचित्तु प्रकृतपदार्थसंसर्गस्य प्रकृतशब्दजन्यबोधविषयतया नैयायिकाभिमत तदनभिमतभेदेनानेकविधत्वेपि न शाब्दबोधविषयतया नैयायिकानभिमतसंसर्गसिद्धिः, तस्य तात्पर्याविषयत्व नियतत्वात्, इति व्याचक्षुः ।

ननु तात्पर्यस्य संसर्गविशेषणत्व तज्ज्ञानापेक्षाया आवश्यकत्वेन तज्ज्ञानशून्यदशायां संसर्गासिद्धिप्रसंग इत्यतआह (अन्यथेति) "अन्यथा" -तात्पर्याभावस्य संसर्गाभावाप्रयोजकत्वे (शब्दादपीति) न्यायमतेपि शब्दादित्यर्थः । "अभिमतान्वयबोध." -तात्पर्याविषयसंसर्गाविषयकसंसर्गबोधः । (नस्यादिति) तथाच तात्पर्याभावस्य संसर्गाभाव प्रयोजकत्व मुभयमतएव. परन्तुन्यायमते तात्पर्य ज्ञानस्य स्वतन्त्रहेतुतया वैशेषिकमते साध्यहेतु ज्ञानसम्पादकतयेति तज्ज्ञान विरहदशायां नकस्यापि मते संसर्गबोधइतिभावः । केचित्तु साध्यशरीरे संसर्ग संसर्गविधयैव प्रवेशयन्ति, तन्मते संसर्ग तात्पर्यविशेषण प्रवेशो न सम्भवति, तेन रूपेण संसर्गतायां अप्रामाणिकत्वादिति तन्मतं अनभिमत संसर्ग सिद्धिप्रसंगेनैव निराकुरुते (अतएवेति) तात्पर्याविषय संसर्ग सिद्धि प्रसंगादेवेत्यर्थः । (विशेष्यभावेति)

तद्बोधपूर्वकाणिवेति न साध्यम् ॥

यत्तु स्मारितार्थं संसर्गवन्तीति साध्यं, मत्वर्थश्च लिंगतया ज्ञापकत्वम् ,

---

अपरपदार्थविशेषितस्वार्थबोधकानीत्यर्थः । अपरपदार्थ वत्स्वार्थ बोधकानीतियावत् । विषयता विशेषस्वरूप विशेषण विशेष्यभावः साध्यघटकइति तु भ्रमः, विषयता विशेषेण विशेष्यस्यैव प्रवर्तक योदेश्यत्वाद्विषयताविशेषस्य साध्यघटकतायां तदनिर्वाहात् , तत्तद्विषकस्यैव बोधस्य सम्भवात्तस्य चानुदेश्यत्वात् (तद्बोधपूर्व-काणीति) तादृश स्वार्थबोध पूर्वकाणीत्यर्थः । अत्रच, विशेष्य बोधकपदानामेव पक्षता, तदर्थेष्वेव विशेषणवत्त्व सिद्धेरुदेश्यत्वात् , विशेषणवाचक पदनिरूपिताकांक्षादिमत्त्वं हेतुः, साध्यघटक संसर्ग संसर्ग धर्माभाने आकांक्षानिरूपकत्व निवेशासम्भवेन हेतावाकांक्षा निवेशवैयर्थ्यं, आकांक्षाया अनिरूपकत्व कालीनत्वादि संसर्गस्य सिद्धिप्रसंग श्चेत्यधिकं दूषणम् । आचार्योयं साध्यं दूषयितुमुपन्य-स्यति (यत्तिवति) (स्मारितेति) पदस्मारितार्थस्य तात्पर्य विषयो यत्संसर्ग स्तद्वन्तीत्यर्थः । ननु- अर्थधर्मस्य संसर्गवत्त्वस्य कथं पदपक्षकानुमानसाध्यते त्यत आह (मत्वर्थश्चेति) शब्दाप्रामाण्य वादिनये संसर्गज्ञानपूर्वकत्वं शब्देबाधितमिति तस्यापि तत्र साध्य-नासम्भव इत्याशंका निरासाय (लिंगतयेति) लिंगविधयेत्यर्थः । एतादृशंच ज्ञापकत्व मस्त्येव सर्वमत एव शब्दनिष्ठधर्मस्येव तादा त्म्यसम्बन्धेन शब्दविशेषस्यापि स्वपक्षकानुमाने । लिंगतयेति न साध्यघटकं, अपितु स्वरूपकीर्तनमेव । तदनन्तर्भावेपि संसर्गज्ञापकत्व मात्रसिद्धे रेवोद्देश्यप्रतीतिनिर्वाहात् , ज्ञापकत्व ज्ञानस्यानुद्देश्यत्वेपि

नचान्योन्याश्रयः, पूर्वपूर्वानुमिति हेतुत्वेनानादित्वात् ।

साध्यस्य शब्दरूप पक्षसत्त्वनिर्वाहकतया साध्ये तदन्तर्भावोपगमात् । उक्तानुमाने ज्ञानपूर्वकत्वा न्तर्भाववत् ।

ननु · अत्र दृष्टान्तभूत घटमानयेत्यादिवाक्ये संसर्ग ज्ञापकत्व मनुमानेनैव साधनीयम् , संसर्गज्ञापकत्वानुमितेरेव संसर्गज्ञानरूपतया तन्मते वाक्येन संसर्गानुमितावजनितायां वाक्ये संसर्गज्ञापकत्वस्य दुरुपपादत्वात् , तदनुमानेपि दृष्टान्तान्तरापेक्षणात् तत्र तत्र पूर्व वाक्यान्तरे संसर्गज्ञापकत्वानुमानापेक्षया नवस्थेतिप्रकृतवाक्यस्यैव दृष्टान्ततोपगन्तव्या ; प्रकृतवाक्ये 'च • तादृशसाध्यस्य प्रकृतानुमानादेव सिद्धौ दृष्टान्ततानिर्वाहः; तथाच अन्योन्याश्रयः, प्रकृतानुमाननिर्वाहक दृष्टान्तपक्षक · प्रकृतसाध्यकानुमाने प्रकृतानुमानादेव सिद्धौ दृष्टान्ततानिर्वाहः तथाचान्यस्य दृष्टान्तनिर्वाहकतया पेक्षितत्वा दित्याशंकते (नचेति) प्रकृतवाक्यं न तत्पक्षकानुमाननिर्वाहक दृष्टान्ते साध्यसाधनाय दृष्टान्तीकरणीयं, येनान्योन्याश्रय स्स्यात् , अपितु तत्र पूर्वपूर्ववाक्यमेव, तत्तद्वाक्यपक्षकानुमानपरम्पराया: पूर्वावधिरहितत्वरूप मनवस्थितत्व मिष्टमेव, अविरळज्ञानपरम्परायां एव अनिष्टत्वात् , प्रकृतेचाविरळपरम्पराया अनपेक्षितत्वात् , दृष्टान्ते साध्यसिद्धौ दिनान्तरिततदधीनस्मरणेनापि प्रकृतानुमाननिर्वाहात् ; गत्यन्तरविरहे जन्मान्तरीयसंस्कारस्यापि स्मारकतया तदुत्तरीयप्रथमानुमाननिर्वाहादिति समाधत्ते (पूर्वपूर्वेति) "पूर्वपूर्वानुमिति हेतुत्वेन"-पूर्वपूर्व संसर्ग ज्ञापकत्वानुमितिरूप संसर्गज्ञानहेतुत्वप्रसिद्धयपेक्षणेन । "अनादित्वात"-पूर्वावधिरहितत्वरूपानादित्वस्येष्टत्वात् । तथाच •प्रकृतानुमानस्य दृष्टान्ते साध्यापेक्षणीयता निबन्धनान्योन्याश्रयानवकाश इति भावः ।

केचित्तु हेतुत्वेनेत्यन्तं अन्योन्याश्रयाभावे हेतुः । पूर्वपूर्वानुमिति हेतुत्वात्मकसाध्यप्रसिद्धे रेवापेक्षणेनेत्यर्थः । नन्वेव मनवस्थेत्याशंक्याह (अनादित्वादिति) अनवस्थितत्वस्येष्टत्वा दित्येव तदर्थ इत्याहुः ।

तन्न. ज्ञापकत्व मात्रेणा र्थासिद्धेः । प्रमा-
पकत्वे तेनैव व्यभिचारात् ।

अनादित्वादित्येवा न्योन्याश्रयाभावे हेतुः, प्रकृतानुमिति दृष्टान्ते साध्यसिद्धेरादावनपेक्षितत्वा दित्यर्थ. । अत्र हेतुत्वेनेत्यन्तं, पूर्वं पूर्वानुमितेरेव दृष्टान्तनिर्वाहकत्वेनेति तदर्थ इत्यन्ये । "ज्ञापकत्वमात्रेण"-संसर्गज्ञापकत्वमात्रसाधनेन । " अर्थासिद्धेः" उद्देश्यासिद्धेः, उद्देश्याया स्संसर्गद्वयोपरक्तसंसर्गसिद्धे रनिर्वाहादिति यावत् । उद्देश्यस्य वा-क्याधीनबोधविषयतयाभिमतस्य तादृशसंसर्गरूपवाक्यार्थस्य, असिद्धेः सिद्ध्यनिर्वाहादिति वार्थः । "प्रमापकत्वे" - वास्तवैकपदार्थप्रतियोगि कापरपदार्थानुयोगिक संसर्गज्ञापकत्वे वा, साध्य इति शेष., " तेनैव" स्थिरजलाभिप्रायकपयसा सिंचतीति वाक्येनैव (व्यभिचारादिति) तत्रापि तन्मतसिद्धान्वयप्रयोजकरूपवत्त्वात्मक योग्यताघटितहेतुसत्त्वा दिति भावः ।

केचित्तु " अनुमानविधयैवार्थसाधकत्वरूपस्य मानान्तरत्वाभाव साधकहेतो रसिद्धे र्वारणायाकांक्षादिमत्पदत्वरूपहेतुना थं तादृश हेतु मुपन्यस्यति (यत्विति) साध्य मित्यस्य उक्तस्वार्थानुमान हेतुनेत्यादिः । लिंगतया ज्ञापकत्वं-अनुमानविधयैवार्थसाधकत्वं । तच्चानु मितिकरणतावच्छिन्नस्ववृत्तिस्मारितार्थ संसर्गज्ञानकरणतासामान्यकत्वं । स्ववृत्तिपदार्थोपस्थितिकरणतायां अनुमितिकरणतावच्छेदकानवच्छिन्न-त्वात् बाधस्य साध्याप्रसिद्धेर्वारणाय संसर्गनिवेशनम् । तथाच तादृश स्ववृत्त्यनुभवकरणतासामान्यकत्वं पर्यवसितार्थः (ज्ञापकत्व मात्रेणार्थासिद्धेरिति) अनुमानविधया भ्रमजनकतयापि ज्ञापकत्व पर्यवसानसम्भवात् । अनुमितित्वव्याप्य स्वकरणकानुमितित्वकरूप प्रमाणान्तरत्वाभाव साधकस्यानुमानविधयैव प्रमापकत्वस्यासिद्ध्यो-

ज्ञानावच्छेदकतयाच्च संसर्गसिद्धिः.

देश्यासिद्धेरित्यर्थः । अनुमानविधयाज्ञापकत्वस्य अनुमानाभासे स्वकरणकप्रमाघटितसाध्य व्यभिचारितया तत्सिद्धेरनुद्देश्यत्वादिति भावः" इति व्याचक्रुः । तदसत, अनुमितित्व व्याप्यस्वकरणकानुभवत्व कत्वरूप प्रमाणान्तरत्वाभावस्य साध्यतयैवापपत्तौ साध्येप्रमापर्यन्त निवेशनवैयर्थ्येन लिंगतया ज्ञापकत्वस्यापि तत्र हेतुतासम्भवेनार्थासिद्धय संगतेः । ननु- संसर्गज्ञानपूर्वकत्व सिद्धावर्पनोक्तानुमानात्ससर्ग सिद्धिः, तस्यासाध्यत्वादित्याशंकां निराकरोति (ज्ञानावच्छेदकतयेति, ज्ञानावच्छेदकत्वं ज्ञानविशेषणतया साध्यघटकत्वं । संसर्गसिद्धिः -उक्त साध्यकानुमितौ ससर्गस्यभान । तावतापि समीहितसिद्धिः, विधेयतया संसर्गभानपर्यन्तस्य प्रवृत्तावनपेक्षितत्वात ; विधेयतावच्छेदकतया तद्भानेनापि प्रवृत्तिनिर्वाहादितिभाव ।

ननु विषयविशिष्टज्ञानस्य साध्यघटकत्वेपि विषयरूपविशेषस्यानुमितिविषयत्वं निर्युक्तिकं, साध्यविशेषणस्यानुमित्यविषयत्वेपि साध्य विषयतायां अवच्छेदकतासम्भवात, अवच्छेदकताया विषयतारूपत्वानुपगमात्तावतापि साध्यविषयता वैलक्षण्यसम्भवेन तद्घटितसाध्यकानुमिते स्तद्घटितसाध्यकानुमिति वैलक्षण्यसम्भवात; अत एव सम्बन्धतदवच्छेदक संयोगसमवायत्वादे र्नविशिष्टधीविषयत्वमिति सिद्धांतोपि संगच्छते, अविषयस्यापि तस्य विषयतावच्छेदकतयासंसर्गविषयता वैलक्षण्यसंभवात ; अन्यथा संयोगसमवायत्वादि सम्बन्धतावच्छेदकानां संयोगसामान्यसम्बन्धावच्छिन्नाभाव प्रतियोगितावच्छेदकतायामवच्छेदकत्वेऽवच्छेदकसंबन्धाननुगमेन संयोगसमवायादि सम्बन्धावच्छिन्नाभावानामिव संयोगसामान्य सम्बन्धावच्छिन्नाभावस्यापि भेदप्रसंगइति संयोगत्वादि स्तादृशाभाव प्रतियोगितावच्छेदकता वच्छेदकत्वावश्यकत्वे एंत दवच्छिन्न. संसर्ग

ज्ञानज्ञानस्य तद्विषय विषकत्व नियमात्।

विषयताशालि ज्ञानस्य तादृशाभावज्ञान प्रतिबध्यतानुपपत्त्या तस्य संसर्ग विषयतावच्छेदकतांधौव्या द्विषयतावच्छेदकतायाविषयताप्रसंगात्। अत एव कार्यज्ञानज्ञानस्य तद्विषयकत्वात् कारणानुमाने अकारणस्यसाध्यता यच्छेदकप्रविष्टस्यापिभानमिति मीमांसक सिद्धान्तो(निर्वाहो)पिसंगच्छत इत्याशंक्य,- साध्यतावच्छेदक प्रतीति विषयत्वे युक्तिमाह (ज्ञानज्ञान-स्येति)विषयोपरक्त ज्ञानज्ञानस्येत्यर्थः । "तद्विषयविषयकत्वानियमात् "-तज्ज्ञानविषय विषयकत्वनियमात् । ज्ञानवा नित्यनुमित्यादौ व्यभिचार वारणाय विषयोपरागनिवेशः । तद्विशिष्टविषयक ज्ञानं तद्विषयक मिति सामान्य नियम एवाभिमतः, विशिष्टज्ञानत्व निवेशवैफल्यात् । संसर्गतया संयोगत्वादि विशिष्ट विषयक ज्ञानस्य संयोगत्वाद्य विषयकत्वे संसर्गताभेदो विशिष्टविषतायां निवेश्यः । घटइत्याकारक घटत्वादि विशिष्टबुद्धिरेव दृष्टान्तः । तादृश ज्ञानस्य घटत्वाद्य विषयकत्वे तस्य विशेषण ज्ञानविधया तथाविध विशिष्ट बुद्ध्यादि जनकत्वा नुपपत्त्या तत्र तत्सिद्धिरिति बोद्धव्यम् ।

केचित्तु तद्विषयक ज्ञानं तद्विषयकमित्येवनियमः, ज्ञानवानि-त्याद्यनुमित्यादौ व्यभिचारवारणाया सति बाधके इतिहेतौ निवेश नीयम्, उक्तानुमित्यादौ विषयभासक सामग्र्य समवधान कालीनत्व रूपविषय भानबाधक सत्त्वा द्धेत्वसत्त्वेन न व्यभिचार इत्याहुः । तन्न, बाधकाभावस्यहेतौ निवेशे इतर विशेषणवैयर्थ्यात्; तद्विषयक ज्ञानादौ नियमेन तद्विषता प्रयोजक विषय जन्यसामग्र्य जन्यत्वरूप तद्विषयकत्व बाधक सत्त्वेन व्यभिचारा नवकाशात्; प्रकृतानुमिति सामग्र्या स्वसंसर्ग भासकताया अपि तत्र संसर्गभाने विवदमाने स्वसंसर्गावगाहिता प्रयोजक विरहरूप बाधकस्य तत्र सन्दिग्धतया बाधकाभाव घटितहेतोः सन्दिग्धासिद्धेश्च ।

संसर्गेच संम्बंधिन एव विशेषकत्वात् ।
पक्षधर्मताबला द्व्यापकत्वेना गृहीतस्यापि संसर्ग·
विशेषस्य सिद्धिः । अथैवं भ्रांति ज्ञानमपि
भ्रमस्स्यात; नचेष्टापत्तिः,

नन्वस्तु ज्ञानविशेषणतया संसगभानं, परन्तु तत्र कुतस्तत्त त्पदा-र्थीयत्वभानं तदभावेच प्रवर्तकज्ञाना निर्वाह इत्याशंक्याह (संसर्गेचेति) (सम्बन्धिन एवविशेषकत्वादिति) सम्बन्धिन स्तत्तत्पदार्थस्य सम्ब-न्धांशे विशेषणतया व्याप्यकतावच्छेदक घटकत्वेन तद्विषयतावच्छे·दकत्वादित्यर्थः । सम्वधांशे तत्तत्पदार्थीयत्व • भानमितिशेषः । ननु दृष्टान्ते घटमानयेत्यादौ पदार्थान्तर घटादि संसर्ग ज्ञानपूर्वकत्वस्यैव प्रसिद्धतया अप्रसिद्ध गोकर्मत्वादि• पदार्थ संसर्ग ज्ञानपूर्वकत्वस्य कथं गामभ्याज्येत्यादिनासिद्धिः, जनकीभूत व्यापकता ज्ञानविषयस्यैव साध्यस्यानुमितौ भानादित्य तआह (पक्षधर्मताबलादिति) गवादि पदघटितहेतौ पक्षधर्मताधीबलात् व्यापकता ज्ञानाविषयस्यापि गवादि पदार्थसंसर्गस्य दर्शितसामान्यव्याप्तिबलप्रवृत्तानुमाना त्सिद्धिरित्यर्थः । सामान्यव्याप्तिस्थाने यत्तत्पदार्थवस्त्वन्तरघटितसाध्यसाधनयो र्व्याप्ति ग्रहा दपि तादृशवस्त्वन्तरघटितहेतौ पक्षधर्मताज्ञाना त्तादृशवस्त्वन्तर घटितसा ध्यसिद्धि भवतीत्यन्यत्र दृष्टत्वादिति भावः । (अथैवमिति)"एवं"-विषयता घच्छेदकस्य विषयत्वनियमे(भ्रान्तिज्ञानमपीति) इदं रजतमिति भ्रमविषय कानुव्यवसायेऽपि नियमतो भ्रमस्य . रजतत्वादि विशिष्टपुरोवर्तिविषय कत्वे तदनुव्यवसायस्य भ्रमांशे विशिष्टविषयत्वावगाहिताया अवश्याभ्युपय त्वेन रजतत्वादिविशिष्टपुरोवर्तिन स्तद्विषयतावच्छेदकत्वेन तद्विषयत्या विशिष्टघटका·सद्वैशिष्ट्यस्यापि . विषयत्वादितिभावः । (दृष्टापत्तिरिति)

ईश्वरस्यापि भ्रांतत्वापत्तेः ; इदं रजतमिति भ्रमादिव शुक्तौ रजत॰ ज्ञानवा नयमिति भ्रमस्य ज्ञानात् भ्रांसिद्ध प्रवृत्त्यापत्तेश्च ।

यत्तु भ्रमविषय ॰विषयकत्वन नभ्रमत्वम् , भ्रमविषयाणां सिद्ध्य सिद्धिपराहतत्वात्, इति ।

रजतत्वादिविशिष्टपुरोवर्तिनो भ्रमज्ञानविषयतावच्छेदकत्वे ज्ञानस्य भ्रम॰व मिष्टमेवेत्यर्थः । (ईश्वरस्यापि भ्रान्तत्वापत्तेरिति)ईश्वरज्ञानस्य सर्वविषयक स्य यो धर्मो यत्र वर्तते तद्धर्मविशिष्ट तद्धर्मविषयकत्वनियमात , विशिष्ट विषयकत्वेन भ्रमविषयकत्वा द्विषयतावच्छेदकस्य विषयत्वनियमे तस्य भ्रान्तत्वापत्ते र्दुर्वारत्वा ॰दित्यर्थः । भ्रमज्ञानस्य विशिष्ट विषयकत्वे न तत ॰शुक्तौ रजतार्थप्रवृत्ति र्नियमेन स्यादित्याह(इदमिति) (प्रवृत्त्यापत्तेरिति) भवन्मते इष्टतावच्छेदकविशिष्टपुरोवर्तिविषयकत्वरूप प्रवर्तकतावच्छे दकरूपसत्वादिति भावः । नच-भ्रमत्वस्यासद्विशिष्टयावगाहित्वात्मकस्य ज्ञाने अवगाहित्वविशेषणतयैव भाना त्पुरोवर्तिनि तदभानात् न ततः प्रवृ त्त्यापत्तिरिति वाच्यम ; टीकाकृतासंसर्गतयैवा सद्विशिष्टयभानोप गमा त्तन्मते असत्सम्बन्धेन रजतत्वादिविशिष्टपुरोवर्तिविषयक ज्ञानत्वस्य भ्रमत्वरूपतया तज्ज्ञाने पुरोवर्तिनि रजतत्वादिवैशिष्ट्यावं गाहिताया दुर्वारत्वात् । ननु भ्रमविषयविषयकत्वं न भ्रमत्वापा दकं, अपित्वसद्विषयकत्वमेव, तच्चासद्घटिततया असदित्यापादका प्रसिद्ध्यानापत्तिसम्भव इति अन्येणा मसद्विषयकत्वस्य भ्रमत्वपदार्थत्व मभ्युपगच्छतां भ्रमत्वापादनसमाधान मुपन्यस्यति (यत्त्विति) (भ्रम विषयेति) आपादकप्रविष्टेत्यादिः । सिद्ध्यसिद्धिभ्यां । सत्त्वासत्त्वाभ्यां- "ज्ञानज्ञानस्ये"त्यादिग्रन्थस्य विषयभानविरोध्यसमवधानघटिततया यथा श्रुतनियमपरतावादिनस्तु ॰भ्रमव्यवसायादौ प्रागुपस्थितस्यासद्वैशिष्ट्या

तत्र [समाधानं] वक्ष्यामः । मैवम् , असद्विषय कत्वेन नभ्रमत्वं, भ्रमविषयाणां सत्त्वात् । किन्तु व्यधिकरणप्रकारकत्वेन ।

दिविषयकत्व मपारमार्थिकवैशिष्ट्यविषयकत्वरूपं यदि न भ्रमत्वस्व रूपं अपितु विशेष्यविषयकत्वे सति 'विशेष्याविद्यमानविषयकत्वमेव, तदा ईश्वरज्ञाने शुक्त्यादीनां तदवृत्तिरजतत्वादिवैशिष्ट्यस्य च विषय तया तत्र तादृशासद्विषयकत्व मिष्टमेव ; तदंशे तदवृत्तिवैशिष्ट्य विषयकत्वस्य चापादकाभावः, उक्तनियमस्य तदापत्त्यनुपयोगित्वात, नियमान्तरस्यचा नभ्युपगमा दित्याशयेन भ्रान्तिज्ञप्रवृत्त्यापत्ति मवतार्य पुरोवर्तिविषयकत्वे सतीष्टतावच्छेदकवैशिष्ट्यावगाहित्व मेव प्रवर्तक तावच्छेदक मित्यभिमानमूलकतया 'तदापत्तिं संगमयन्ति । विशे ष्यांशे तत्रासद्वैशिष्ट्यावगाहित्वरूपव्यधिकरणप्रकारकत्वं यथाभ्रमत्वं तथा प्रवृत्तिविशेष्यांशे इष्टतावच्छेदकवैशिष्ट्यावगाहित्वरूपं तदंशे तत्प्रकारकत्वमेव प्रवर्तकतावच्छेदकं, अतो न दर्शितप्रवृत्त्यापत्तिरिति च सिद्धान्ताभिप्रायं वर्णयन्ति । (तत्र [समाधानं] वक्ष्याम इति) असद्विषयकत्वस्य भ्रमत्वरूपताखण्डनेना प्रसक्त्यापादकत्वस्या'सद्घटित तया आपादकत्वव्याघातानुधावनानौचित्यं सूचयिष्यत इत्यर्थः । 'अथैवमिति पूर्वपक्षे स्वयं समाधत्ते (मैवमिति) (असद्विषयकत्वेन न भ्रमत्वमिति) भ्रमत्वं नासद्विषयकत्वाभिन्न मित्यर्थः । भ्रमविष याणां सर्वेषामेव च, " सत्त्वात् "-पारमार्थिकत्वात् । असर्गस्या प्यन्यत्र प्रसिद्धस्यैव भ्रमेभानं, असतो भाने माना भावादिति भावः । (व्य· धिकरण· प्रकारकत्वेनेति) भ्रमत्व मित्य·नुषंगेणान्वयः । ननु · भवतु व्यधिकरण प्रकारकत्वं भ्रम व्यवहारविषयतां ' वच्छेदकं, ततएव-

नच भ्रमस्यज्ञाने व्यधिकरणंप्रकारः, रजतत्व प्रकारकत्वस्य भ्रमेसन्त्वात् । अन्यथा भ्रान्त्युच्छेदः, प्रमाणाभावात ।

भ्रमानु व्यवसायादौ भ्रमत्वापत्ति र्भवेदित्याशंकां निरस्यति (नचेति) नहीत्यर्थः । व्यधिकरणमिति विशेष्यपदं, विशेषणपद स मानलिंगत्वानियमात, अनियतलिंगत्वे नपुंसकत्व मौत्सर्गिकमिति नतस्य विशेषण वाचकपदेन समानलिंगता, प्रकारपदस्य चा जहल्लिंगतया न नपुंसकत्वं । भ्रमानुव्यवसाये शुक्त्यादौ रजतत्वादि प्रकारकत्व स्मारकेपि प्रकारिता विशेषणतयैव रजतत्वा ऽवगाहिता, नतुशुक्त्यादि विशेषणतयेति तदवृत्ति धर्मो नतदंशेप्रकार इत्यर्थः । भ्रम ज्ञानस्य शुक्त्यादौ रजतत्वाद्य प्रकारत्वेपि तद्विषय भ्रमनिष्ठ प्रकारिताया रजतत्वीयताविरहे तादृश प्रकारितायां रजतत्व प्रकारकस्यतस्य व्यधिकरण प्रकारकत्वं दुर्वारमेवेत्याशंकां निराकर्तुं भ्रम निष्ठ प्रकारितायां रजतत्वीयत्व मस्त्येवेति न रजतत्वस्य विशेष्या सम्बद्धत्वरूप वैयधिकरण्यमिति दर्शयति (रजतत्वेति) "अन्यथा"- रजतत्वीय प्रकारिताया भ्रमेसत्त्वे । "भ्रान्त्युच्छेदः"- भ्रमत्वस्य धर्मत्वोच्छेद प्रसंगः । "प्रमाणाभावात् "- प्रमाणं भ्रमभिन्नस्या सत्त्वादिति केचित ।

परंतु असद्वैशिष्टकस्य भ्रमविषयत्वेबाधकं पूवमनुक्त, मतस्तद्बाधकमाह (अन्यथेति) असद्वैशिष्टयाव गाहित्वस्य भ्रमत्वरूपत्व इत्यर्थः । "भ्रान्त्युच्छेदः"- भ्रमत्वासिद्धिप्रसंगः । "प्रमाणाभावात "-तद्ग्राहकस्य तद्घटका सद्विषयकत्वेन प्रमाणत्वाभावात । भ्रमत्व शरीरेसतो विशेषणतया प्रवेशात संसर्गविधयैवासतो ज्ञानमभ्युपगच्छतां टीकाकृता मुक्तभ्रमत्वरय ग्रहासम्भवाच्चेति व्याचक्रः ।

ननु प्रतारकवाक्ये व्यभिचारः, विशेषदर्शनेन तत्र संसर्गज्ञानाभावात्; नच संसर्गमप्रतीत्य वाक्यरचना नसम्भवतीत्यवश्यं तस्य संसर्गज्ञानं संभवतीतिवाच्यं, तावत्पदज्ञानादेव शुकस्येववाक्य रचनोपपत्तेः; अन्यत्रापि तस्यैवतन्त्रत्वादिति चेन्न;- एत द्वाक्यमेतस्य[पदार्थ]संसर्गं बोधयिष्यतीत्याश-

---

(प्रतारकवाक्यइति) भूतलादौ घटाभावादिसत्त्वं ज्ञात्वाप्रयुक्ते भूतलं घटवदित्यादि वाक्यइत्यर्थः (व्यभिचारइति) तत्रवक्तुः प्रकृत संसर्गज्ञानविरहेण तद्घटित साध्याभावादित्यर्थः । तत्र वक्तुस्संसर्ग ज्ञानमेव नकुतं इत्यतआह (विशेषेति ')विशेष दर्शनं प्रकृतवाक्यार्थ ज्ञानविरोधिनिश्चयः, तत्सत्त्वेन, तत्र भूतलादौ घटादिसंसर्गज्ञानस्य वक्तु रनुदयादित्यर्थः । (वाक्यरचनानसम्भव तीति) वाक्यार्थज्ञानस्य वाक्यहेतुत्वादितिभावः । व्यभिचारादिना वाक्यार्थज्ञानस्य हेतुतैवनास्तीत्याह(तावदिति)तावत्पदरूपवाक्यज्ञाना दितइत्यर्थः।"अन्यत्रापि"-बुबोधयिषुवाक्येपि।" तस्यैव"-पदज्ञानादेरेव। एवकारेण वाक्यार्थज्ञानव्यवच्छेदः । कार्यतावच्छेदकसंकोचे व्यभि चारवारणे प्यन्यथासिद्धया वाक्यार्थज्ञानस्या हेतुत्वादिति भावः। वक्तृवाक्यार्थज्ञानस्यान्यथासिद्धत्वेपि तस्यवाक्यार्थबुबोधयिषापूर्वकवाक्ये नियमतोऽपेक्षास्त्येव, वाक्यार्थबुबोधयिषाहेतुभूतवाक्यार्थ ज्ञानज्ञानस्य वाक्यार्थ ज्ञानत्वा दित्याहार्य वाक्यार्थज्ञानं प्रतारकस्यास्त्येवेति तद्वाक्ये तत्पूर्वकत्वरूपं साध्य मस्तीति न व्यभिचार इति समाधत्ते (एत द्वाक्यमिति) (एतस्य [पदार्थ] संसर्गं बोधयिष्यतीति) एतत्पदार्थ

येन वाक्यप्रयोगात्, तस्यापि संसर्गज्ञानात्, योग्यताविरहाच्च ।

अत एव विसंवादिवाक्ये शुंकवदुच्चरिते न व्यभिचारः। शब्दात्संसर्गप्रत्ययस्तु योग्यताभ्रमात्।

संसृष्टैतत्पदार्थज्ञानं जनयिष्यतीत्यर्थः। "तस्यापि" - तादृशाशयवतः प्रतारकस्यापि । ननु - विशिष्टवाक्यार्थज्ञानं विनापि एतस्मिन्नर्थे एतदर्थसंसर्गज्ञानं भवत्वितीच्छया प्रतारकस्य प्रयोग स्सम्भवतीति तत्र व्यभिचारो दुर्वार इत्यत आह (योग्यतेति) तथा च तत्र हेतुरेव नास्ति, हेतुस्थादिशब्देन योग्यतापरिग्रहादिति कुतो व्यभिचार इतिभावः। "अतएव"-योग्यताविरहादेव। "विसंवादिवाक्ये"- बाधितार्थवाक्ये । " शुकवदुच्चरिते "- वाक्यार्थबोधयिषां विनैव तावत्पदमात्रज्ञाना त्प्रयुक्ते। एतेन तत्र वक्तु स्संसर्गज्ञानाभावेन साध्यं नास्तीति सूचितम् । नच तत्र तात्पर्यविरहेणापि हेत्वभावात् योग्यताविरहादेवेत्युपष्टम्भासंगतिरिति वाच्यम् , तत्र भ्रमात्मक संसर्गप्रमोत्पत्तौ तद्विषयक भगवत्तात्पर्यसम्भवात्। नचैवं भगवत्संसर्ग ज्ञानमादायैव साध्यमविकलमितिवाच्यम्, एकपदार्थप्रतियोगिकापरानु योगिकसंसर्गस्य वास्तवस्यसाध्यघटकत्वेनायोग्यस्थले तदप्रसिद्ध्याभगव तोपि तादृशसंसर्गज्ञानासत्वेन तज्ज्ञानपूर्वकत्वरूपसाध्यसत्त्वस्यचानिर्वा हात्। अतएवविसंवादिपर्यन्तानुसरणम् । ननुयोग्यताया हेतौ निवेशेपि विसंवादि वाक्ये हेत्वभावेन संसर्गज्ञानपूर्वकत्वानुमानासम्भवा त्तत्र भ्रमात्मकोपि संसर्गप्रत्ययःकदापि नस्यादित्यतआह(शब्दादिति)तादृशादि त्यादिः(योग्यताभ्रमादिति)योग्यताघटितहेतो स्तत्रा भावेपि तादृशहेतुभ्रमा

अथ संसर्गज्ञानं विना शुकस्यान्यस्य वा संवादिवाक्ये भ्रांतप्रतारकवाक्येच व्यभिचारः, कथं वा तत्र संसर्गप्रमा, वक्तृज्ञानानुमानासम्भवा

दित्यर्थः । वक्तृज्ञान मेव साध्यघटक मित्यभिमानेन योग्यतावत्येव वाक्ये व्यभिचार माशंकते (अथेति) (शुकस्येति) संसर्गज्ञानाभाव वत इत्यर्थः । (अन्यस्येति) तावत्पदज्ञानादेव वाक्यप्रयोक्तुरिति शेषः । वक्तृतात्पर्यस्य हेतुघटकत्वे व्यभिचारो न सम्भवतीति स्थलान्तर माह (भ्रान्तप्रतारकवाक्य इति) विशिष्टवाक्यार्थ मज्ञात्वैव अस्मिन्नर्थे एतदर्थसंसर्गप्रतीति र्भवतिति प्रतिसन्धाय प्रयुक्ते वाक्य इत्यर्थः । (व्यभिचार इति) एकपदार्थे अन्यपदार्थावगाहि वक्तृज्ञानघटितसाध्याभावादिति भावः । वक्तृज्ञातवाक्यार्थबोधरूप योग्यताया हेतुप्रवेशे वाक्यार्थानभिज्ञवाक्ये तादृशयोग्यताविरहेण व्यभिचारासम्भवात् दोषान्तर माह (कथं वेति) " तत्र "-वाक्यार्था नभिज्ञप्रयुक्तवाक्यश्रवणस्थले । "संसर्गप्रमा" - एकपदार्थे परपदार्थ संसर्गज्ञानं (वक्तृज्ञानानुमानासम्भवादिति) वक्तृज्ञातवाक्यार्थबोध घटितहेतो रसत्त्वात् साध्यस्य च बाधादिति भावः ।

यद्यपि स्वरूपसल्लिंगं नानुमिति हेतुः, नवा स्वरूपसद्बाधोनुमिति विरोधीति बाधाज्ञानदशायां योग्यताघटितहेतुभ्रमा त्संसर्गप्रत्यय स्सम्भवति, तथापि फलीभूतज्ञानाभावनिश्चयस्थले बाधनिश्चयसत्त्वेन हेतु भ्रमस्यचासम्भवेन वक्तृज्ञानानुमानासम्भवात् संसर्मज्ञानानुपप त्ति रेतन्मत इत्येतत्परतयैव तद्ग्रन्थसगंतिः । आप्तोक्तत्वस्य यथार्थ वाक्यार्थज्ञानवदुक्ततत्वरूपस्य शब्दप्रामाण्यप्रयोजकत्वे न्यायमतेप्युक्त-स्थले संसर्गप्रमानसम्भवति, तादृश प्रामाण्य प्रयोजकरूपाज्ञानात्, तथा सत्येतन्मतेपि संसर्गप्रमानुपपत्ति र्मदोषाय, नवा तत्र व्यभिचारः ; योग्यताशरीरे वक्तृज्ञातत्वविशेषणस्य प्रवेश्यत्वात् । यद्यप्तो

दिति चेन्न:- यदि तत्र संसर्गप्रमा तदा वेदतुल्यते त्युक्तम् । आकांक्षा योग्यतासत्तिश्च ज्ञातोपयु ज्यते । अन्यथा शाब्दभ्रमानुपपत्तिरिति ॥ उच्यते,

---

वतत्वज्ञानं न्यायनये शाब्दज्ञाने नापेक्ष्यते तदा परमेश्वरीयज्ञानमादाय साध्यसत्त्वा द्वेदइव भ्रान्तंप्रतारकवाक्येपि न व्यभिचारः , संसर्ग ज्ञानवदुक्तत्वपर्यन्तस्य साध्यतानुपगमात् । नवा वक्तृसंसर्गज्ञानानुमाना सम्भवः. हेतु घटकयोग्यताया मुक्तविशेषणस्थ प्रवेश्यत्वादिति " ज्ञाना वच्छेदकतये" ति प्रकृतानुमानात्संसर्गसिद्धेर प्युपपत्तिरिति समाधत्ते (यदीति) (उक्तमिति) उत्पत्तिवाद इत्यर्थः । आकांक्षायो ग्यतासत्तीनां न्यायमते स्वरूपसतीनां शाब्दधीहेतुत्वे तदज्ञानदशायामपि तन्मते संसर्गप्रत्यया त्तदाच वैशेषिकमते उक्तहेतुज्ञानासम्भवेन तद निर्वाहात् शब्दप्रामाण्यं खण्डयितुं नशक्यमित्यतो न्यायमतेप्याकां क्षादीनां ज्ञानं शाब्दधीहेतुरिति व्यवस्थापयति (आकांक्षेति) "ज्ञातोपयुज्यत"इत्यस्य न्यायमतेपीत्यादिः । "अन्यथा" - स्वरूपसतीनां तासां शाब्दबोधकरणत्वे । (शाब्दभ्रमानुपपत्तिरिति) आकांक्षादि भ्रमज न्यशाब्दबोधानुपपत्तिरित्यर्थः । वह्निनासिंचतीत्ययोग्यस्थले स्वरूप सदाकांक्षासत्त्योःसत्त्वेन योग्यताया ज्ञातोपयोगितामात्रेणैव शाब्दभ्रमो पपत्ते राकांक्षासत्त्योस्स्वरूपसत्त्यो र्हेतुताया श्शाब्दभ्रमानुपपत्त्य यो जकतया यथाश्रुतासंगतेः । नचं. आकांक्षादिरहितायोग्यस्थले स्व रूपसदाकांक्षादिहेतुताया अप्याकांक्षादिभ्रमाधीन शाब्दभ्रमानुपपत्ति प्रयोजकतया यथाश्रुतं संगच्छतइति वाच्यम् , तथासत्यपि स्वरू पसदाकांक्षा सत्तिहेतुत्वे योग्यनिराकांक्षादिस्थले आकांक्षादिभ्रमाधीन शाब्दप्रमाया अयनुपपत्त्या तदप्रदर्शनेन न्यूनताया यथाश्रुतेदुरुद्धर-

अर्थज्ञानं प्रवर्तकं, नतु तज्ज्ञानज्ञानं; गौरवात् , व्यभिचाराच्च । अतो रजतज्ञानवा नय मिति ज्ञानं नप्रवर्तकं, किंत्विदं रजतामितिज्ञानं। इदमपि ज्ञानं रजतविषयकमितिचेत् ? सत्यं, नतु रजत त्वप्रकारकं ।

त्वात् । संसर्गसाध्यकाद्यनुमानमुपेक्ष्य संसर्गज्ञानपूर्वकत्वपर्यन्त साध्यकानु मानेन श्रोतुः प्रवृत्त्यादिक मुपपादयतो वैशेषिकस्याभेदादिसंबन्धेन रजता दिप्रकारकेदमादिविषयकप्रवृत्ता विदमाद्यंशे रजतादे रभेदादि संबन्धज्ञान ज्ञानत्वेन हेतुतस्वाशयं मन्यमानस्सिद्धान्ती प्रथमत स्तेनरूपेण प्रवर्तकता मेव खण्डयति (अर्थेति) "तज्ज्ञानज्ञानं" प्रवृत्ति विषयीभूतो योर्थस्तज्ज्ञान विषयकज्ञानत्वावच्छिन्नं । " गौरवात् "- अर्थज्ञानत्वापेक्षया ज्ञानज्ञानत्व स्यावच्छेदकस्य गुरुशरीरत्वात् । (व्यभिचाराच्चेति) ज्ञानाविषयकेदं रजतमित्यादि ज्ञानजन्यप्रवृत्तावि त्यादिः । (रजतज्ञानवानयमितीति) पुरोवर्तिनि रजतसंसर्गज्ञानवा नयमितीत्यर्थः । अर्थज्ञानत्वेनैव प्रवर्तकता, आकांक्षादि मद्वाक्यत्वेन पदधर्मेणार्थधर्मसंसर्गानुमान न सम्भवति, वैयधिकरण्यादित्यतोज्ञानपूर्वकत्वपर्यंतं साध्यम्। अनुमानादपि प्रवृत्त्यादिकार्यनिर्वहति, तत्रापि साध्यतावच्छेदकघटकतया प्रवृत्तिविषयी भूततत्तत्पदार्थं तत्तत्संसर्गभानादित्याशयं प्रकाशयन्वैशेषिकशंकते (इदमपीति) "इदं"- प्रकृतानुमानाधीनं। "रजतविषयकं" -रजतादिवि षयकं (नतु रजतत्वादिप्रकारकमिति) अभेदसम्बन्धे नेदमंशे रज तप्रकारकत्वेत्यर्थः, भावार्थो विवक्षणात् । अन्यथा इदं रजतमिति शाब्दबोधस्यापीद मंशे पदार्थतावच्छेदक रजतत्वाद्यप्रकारकतया

प्रवर्तकञ्च तथा, अन्यथा भ्रांतस्येव भ्रांतिज्ञ
स्यापि प्रवृत्तिप्रसंगः; तदुभयसंकरापत्तिश्च। एतेन
लक्षणाद्यनुरोधात्तात्पर्यग्रहो वाक्यार्थधीहेतुः, तात्प
र्यंच पदार्थसंसर्गविशेषप्रतीत्युद्देश्यकत्वं, तथाच
तद्ग्राहकानुमानादेव तात्पर्यज्ञानावच्छेदकतया
संसर्गासिद्धिरित्यपास्तं.

अङ्गंगतेः । (प्रवर्तकश्चेति) अभेदसम्बन्धेन रजतादिविशेषितेद मांश
विषयक प्रवृत्तिजनकज्ञानमपीत्यर्थः । (तथेति) तादृशविशिष्टावगाहीत्यर्थः
ननु-विशिष्टं विशेषणसम्बन्धविशेष्येभ्यो नार्थान्तरमिति तावद्विषयकत्व
मेव विशिष्टविषयकत्वम् , तथाचोक्तानुमानाधीनं तावद्विषकं ज्ञानंप्रवर्त
कमित्यत आह (अन्यथेति) तावद्विषयकत्वस्यैव विशिष्टविष
यकत्वेचेत्यर्थः । (भ्रान्तिज्ञस्येति) पुरोवर्तिनमभेदसम्बन्धेन रजत
प्रकारेणजानात्ययमिति ज्ञानवतइत्यर्थः । (तदुभयेति) भ्रमतद्विषयक
ज्ञानयोरविशेषापत्ति श्चेत्यर्थः । भ्रान्तिविशेषदर्शीयज्ञानस्यापि भ्रमत्वा
पत्तिरिति यावत । तथा च विशिष्टस्यानतिरेकेपि विशृंखलतया
भासमान तत्तत्पदार्थविषयतातो विशिष्टनिरूपितविषयता विलक्षणैवा
गत्या स्वीकरणीया, सैवप्रवर्तकतावच्छेदिका भ्रमत्वप्रयोजिकाच, तादृ
शीचविषयता नोक्तानुमितावितिं कथन्तस्याः प्रवर्तकतेतिभावः ।
"एतेन"- ज्ञानविशेषणतया संसर्गज्ञानस्या प्रवर्तकत्वेन । इत्यपास्त
मित्यग्रिमेणान्वयः (लक्षणाद्यनुरोधादिति) यष्टीः प्रवेशयेत्यादौ लक्षा
णिकपदघटितवाक्यात्-मुख्यामुख्यार्थ बोधस्य नानार्थस्थले तात्पर्यविषय
योग्यार्थांतरविषयकबोधस्य सर्वत्रा तात्पर्यविषयसंसर्गान्तरबोधस्यच
निर्वाहानुरोधादित्यर्थः (पदार्थसंसर्गविशेषेति)रजतपुरोवर्त्यभेदादीत्यर्थः।
"प्रतीत्युद्देश्यकत्वं-" प्रतीतीच्छयोच्चारितत्वम् । " तात्पर्य ज्ञानावच्छेद
कतया "- तात्पर्यघटक प्रतीतिविशेषणतया ।(सिद्धिरिति) शाब्द
बोधात्पूर्व न्यायसृते प्यावश्यकीतिशेषः । तथाच ततएव प्रवृत्ति

किंच ,— व्यापकतावच्छेदक प्रकारिकानु
मितिः । अतः स्मारितार्थ संसर्ग ज्ञानपूर्वकं,
णीत्यनुमितिस्स्यात् , नतु रजतज्ञानपूर्वंकाणीति।

निर्वाहे किं शब्दस्य पृथक्प्रमाणत्वेनेतिभावः । ननु संसर्गविशेषेणैक पदार्थविशिष्टैरपदार्थज्ञानपूर्वकत्व मेवोक्तहेतुनानुमेयमित्याशंकातो रजतमिदमित्यादितोवाक्या द्रजतत्वादि विशिष्टविषयक प्रवृत्त्यनिर्वाह माह (किञ्चेति) (व्यापकतावच्छेदक प्रकारेकेति) सामान्यव्याप्तिस्थले व्यापकताग्रहे यत्पदार्थातिरिक्तपदार्थानां येन प्रकारेणभानं साध्यशरीरे तत्स्थले तदन्यप्रकारानवच्छिन्न विषयणीत्यर्थः। सामान्यव्याप्तिस्थले पक्षधर्मताबलेना प्रसिद्ध विशेषभाना यथाश्रुतनियमासंभवात । [" ज्ञानपूर्वकाणी " " त्यनन्तरं " रजतादिपदार्थ विशिष्टदमादिपदार्थ ज्ञानपूर्वकाणीतिवे " तिपूरणीयं] (नत्वित्यादि) नतुरजतार्थमिन्नेद मादिज्ञानेत्यर्थः । उक्तानुमानेपदार्थत्वेनैव तत्पदार्थानां व्यापकतावच्छेदक घटकता, नतु विशिष्येतिभावः ।

अथ पदार्थाअपिपदाभ्यां यदिपूर्वोक्तरीत्या सामान्यव्याप्तौ निवेश्यते, तदा पक्षधर्मताबला द्रजतादि पदार्थत्वेनेव रजतत्वादिनापि रजतादि विषयकानुमितिस्सम्भवतीतिचेत् ? यत्तद्वयां पदार्थानिवेशे पदार्थपक्षक संसर्गतानुमानस्यैव सम्भवेन ज्ञानानुमान प्रयासानौचित्यात् , पदार्थपक्षकानुमान वक्ष्यमाणस्य योग्यतारूपहेतु विशेषणनिश्चयासम्भवा दनुमानानिर्वाहरूपदूषणस्य ज्ञानानुमानपक्षेपि सम्भवात् ।

परेतूक्तनियमसत्त्वा त्सामान्यंव्याप्तितः पक्षधर्मताबलादपि नाप्रसिद्धविशेषानुमितिस्सम्भवति । आद्ये व्युत्पत्तिस्थले गवानयनादावेव प्रवृत्तिविषयत्वेन लिंगेन प्रसिद्धज्ञानानुमित्यैव गवानयनादिविषयक ज्ञानसिद्धिरुपगन्तव्ये त्यभिप्रायकोयं ग्रन्थः । अग्रिमार्थ पक्षकानु

तस्मात्प्रवर्तकं ज्ञानं शब्दादेव । अतएवप्रवृत्त्यर्थ मनुवादकता शब्दस्येत्यपास्तं, शाब्दानुमित्यो र्भिन्नप्रकारकत्वादेकविषयकत्वाभावेना ननुवादक त्वात् , तस्यैवप्रमाणत्वात् ।

मानेपीद मादिपक्षे रजतादिसंसर्गसाधने पक्षभिन्नस्यापि रजतादि संसर्गिणस्सत्वात दृष्टान्तसौलभ्येन विशिष्यैव व्याप्तिग्रहस्सम्भवतीति सामान्यव्याप्ते रनादरणीयत्वादग्रे तादृशानुमाना शंकासंगतिः । येन पुंसा क्वचिदपि रजताभेदादि र्नावधारित स्तस्य विशेषव्याप्त्या पक्षरूपेद मादिपदार्थे तदनुमाना सम्भवश्चाधिकं दूषणं बोध्यं । पद पक्षकानुमानेच एकपदार्थे संसृष्टापरपदार्थरूपा पूर्ववाक्यार्थस्य साध्य घटकतया विशिष्यव्याप्त्यनुधावनं क्वापि नसम्भवतीति विशेषइत्याहुः ।

(शब्दादिति) तत्र प्रमाणतया स्वीकृतादिति शेषः । एव कारेणोक्तानुमानव्यवच्छेदः । " अतएव " - अनुमानतश्शाब्दबोधप्र काररजतादिविषयक तत्संसर्गकज्ञानासम्भवादेव । ' अपास्त ' मित्य नेनान्वयः (अनुवादकतेति) उक्तानुमानागृहीत पदार्थसंसर्गाविष यके विशिष्यरजतत्वादि पदार्थतावच्छेदकप्रकारेण रजतादिगोचरानु भवान्तरे हेतुतेत्यर्थः (शब्दस्येति) स्वीक्रियतइतिशेषः । तथाच मतस्य प्रमाणता, अगृहीतग्राहिणएवानुभवस्य प्रमात्वादितिभावः । अतएवेत्यस्यार्थं स्वयमेव विवृणोति (शाब्दानुमित्योरिति) " भिन्न प्रकारकत्वात् " - तत्तत्पदार्थत्व रजतत्वादिप्रकारकत्वात् । " एक विषयकत्वाभावेन "- एकविधविशिष्टार्थकत्वाभावेन । " अननुवादक त्वात " - रजतत्वाद्यवच्छिन्न रजतादिघटितविशिष्टार्थे नुवादकत्वा सम्भवात् । " तस्य " - शब्दस्य । " प्रमाणत्वात " - तादृश विशिष्टार्थएव प्रमाणत्वात् । यादृशविशिष्टार्थः पूर्वमगृहीतः तादृशवि

नन्वेते पदार्था स्तात्पर्यविषयमिथ स्संसर्गवन्तः,

शिष्टार्थविषयकानुभव स्तादृशार्थे प्रमेत्यस्यैवागृहीतग्राह्यनुभवः प्रमेत्ये तदर्थत्वादितिभावः (एतेपदार्थाइति) इदं रजतमित्यादौ येनरज तत्वेदंत्वादिनार्थानां पदादुपस्थितिः तत्तद्रूपावच्छिन्नपर एवैतच्छब्द इतिसूचयितुं.' पदार्था ' इत्युक्तं, नतु पदार्थत्वेनापि तेषां निवेशः, सामान्यरूपेण निवेशेप्रयोजनाभावः च्छाब्दबुद्धौ नैयायिकानां.तद्रूपा भानात् । तथाच रजतेदमादयइत्यर्थः (तात्पर्यविषयेति)

अथ तात्पर्यविषयत्वं साध्यघटक संसर्गविशेषणं संसर्गत्वेन संस र्गनिवेशनएवसम्भवति, विशेषरूपेण संसर्गनिवेशे तात्पर्यविषयत्व स्याव्यावर्तकत्वात् ; तथाचोक्तानुमानेन विशिष्यपदार्थावगाहिन्या अनु मिते स्सम्भवेपि विशिष्यसंसर्गावगाहिन्या स्तस्या असम्भवेन प्रवर्तक ज्ञानानिर्वाहः; तात्पर्यविषयत्वं परित्यज्यविशेषरूपेण संसर्गप्रवेशे द्वितीयहेतौ संसर्गपरेति पदविशेषण वैयर्थ्यं, अग्रेच विमलश्चंद्रमित्यादौ नदीकच्छयो स्संसर्गस्य तात्पर्याविषयतया व्यभिचारप्रदर्शनस्या संगति रितिचेत् ? यथाश्रुते तदनुमाने विशिष्यसंसर्गसाधकतानुपपत्तिरूपदूष णमाग्रिममूलाभिप्रेतमेव । तात्पर्यमनन्तर्भाव्य विशिष्यसंसर्गानुमान मेव यदि निष्कर्षानुसारिणां परेषां मतं, तदा तत्रापि संसर्गज्ञानेच ' यवंत्वि ' त्यादिना वक्ष्यमाणमेव दूषणं । अथवा नैयायिकानामिव परेषां मतेपि संसर्गज्ञाने तात्पर्यज्ञानापेक्षा निर्वाहाय तात्पर्यस्य हेतुप्रवेश आवश्यकः । एवंच तत्सार्थक्याय विशेषरूपेण प्रवेशितेपि संसर्गे तात्पर्य विषयत्वं निवेश्यते । एकपदार्थस्य परपदार्थोपरक्तसंसर्गाविद्धेरवोद्देश्यतया तन्निर्वाहायमिथइति । तेन परस्पर संसर्गं स्साध्यइति लभ्यते । एवंच साध्ये तात्पर्यस्य संसर्गांशे निवेशन एव हेतौ तदंशे तात्पर्याविषयत्वं संसर्गांतरघटितहेतुमत स्तात्पर्याविषयतत्संसर्ग घटितसाध्यवत्त्वा निर्वाहेण प्रसक्तव्यभिचारवारकतया सार्थकमिति साध्येपि तात्पर्य

आकांक्षादिमत्पदस्मारितत्वात् ,

विषयत्वं संसर्गविशेषणमावश्यकं । एवमतात्पर्यविषयपदार्थप्रतियोगिक तात्पर्यविषयसंसर्गसिद्धिवारणाय संसर्गप्रतियोगिभूतहेतुघटकार्थे तात्पर्य विषयत्वस्यावश्यं निवेशनीयतया साध्यघटकसंसर्गप्रतियोगिन्यर्थे तद्विशेषणं देयं, अन्यथा हेतौ तद्विशेषणस्य व्यभिचारावारकतया वैयर्थ्यापत्तेः । वस्तुतस्तदर्थोपरागेण संसर्गविशेषप्रतीतिर्भवतीत्याकारकेच्छा घटित संसर्गतात्पर्यस्य तदर्थघटितस्य निवेशेनैवोपपत्तेः तदर्थतात्पर्यविषयत्व रूपविशेषणान्तरं न प्रवेश्यं । हेतो स्तात्पर्यविषय संसर्गघटितत्वेच ' विमलजलं नद्याःकच्छेमहिषश्चरती ' त्यग्रे संसर्गतात्पर्यघटित साध्यासत्त्वेनव्यभिचारस्य प्रदर्शनं हेतौ तात्पर्यप्रवेशोनास्तीत्यभिमाने नैव । नच रजतादिपदार्थप्रतियोगिकाभेदसंसर्गस्य पक्षभिन्नार्थांतरेपि सत्वेन दृष्टान्तसौलभ्या द्विशेषव्याप्तिरेव शक्यग्रहेति किं दर्शितसा मान्यव्याप्त्यादरेणेतिवाच्यम् , तादृशसंसर्गस्यार्थांतरे सत्त्वेपि तादृशा र्थे तादृशसंसर्ग तद्घटितहेतूभयवत्त्वाग्रहदशायां तयो र्व्याप्तिग्रहास म्भवेन तादृशविशेषव्याप्तितः पक्षेसंसर्गसिद्ध्यनुपपत्तेः, तदानीमपिच न्यायमते क्षत्र तत्संसर्ग बोधात् । नचैवमपि तत्संसर्गयो रेकस्यैव यत्त्वतत्त्वेन निवेशोस्तु, किमर्थं उभयो स्तथानिवेशइति वाच्यं, यदा हेतुमत्तया गृह्यमाणेर्थांतरन्यार्थस्यापि प्रकृतसंसर्गः प्रकृतार्थस्यान्योपि संसर्गो नगृहीतः तदा अन्यपदार्थप्रतियोगिक प्रकृतसंसर्गस्य प्रकृतपदा र्थप्रतियोगिकान्यसंसर्गस्य तद्घटितहेतौ तादृशव्याप्तिग्रहादेव सिद्ध्या पत्त्योभयोरिव यत्त्वतत्त्वेनोपादानस्यावश्यकत्वात् ।

(आकांक्षादीति) एतदर्थं तत्संसर्गतात्पर्य घटितै तत्पदाकांक्षा दिमत्पदस्मारितत्वादित्यर्थः । उक्तसामान्यव्याप्तौ घटादिरूपार्था धेय त्वादिरूपसंसर्गतात्पर्यघटित घटादिपदाकांक्षादिमदादिमादिपदस्मारितो घटादिप्रतियोगिकाधेयत्वादि संसर्गकर्मत्वादिरेव शुद्धोदृष्टान्तः ।

एतदर्थं तत्संसर्गतात्पर्यघटितोक्ताकांक्षा च एतदर्थ प्रतियोगिकत्व स्वानुयोगिक. [त्वैतदर्थ] त्वाभ्यां• वक्त्रा एतत्पदेन प्रतिपिपादयिषितोय एतत्संसर्ग स्तत्पदेन प्रतिपिपादयिषितोय एतत्संसर्गस्तत्प्रतिपिपादयिषयोच्चरितत्वेति स्वैतत्पदोभय व्यतिरेकप्रयुक्त स्वानुयोगिकत्वे तदर्थप्रतियोगिकत्वोपरक्ते तत्संसर्गानुभवाभावकत्वम् । सत्यंतद्दळप्रवेशात्पुत्रोराज्ञः पुरुषोपसार्यतामित्यादौ पुरुषादौ तात्पर्यविषय राजसंसर्गाभावेन व्यभिचारप्रसंगस्य नावकाशः । तत्र स्वपदं हेतुमत्कं यत्र सम्पाद्यं तादृशार्थपरम् । यद्यपि घटः कर्मत्वगानयनं कृतिरित्यादावा कांक्षाप्रसंगवारक विशेष्यदळस्य हेतावप्रवेशेपि न तत्र व्याभिचार प्रसक्तिः, घटकर्मत्वादिसंसर्गे तात्पर्यासत्वे सत्यंतस्यैवाभावात् तत्सत्वे साध्यस्यापि सत्वात् ; तथापि तदप्रवेशेघटः कर्मत्वमित्यादौ घटकर्मत्वादिपद तदर्थघटित हेतुमत्ताज्ञाना त्तत्पदार्थसंसर्गसिद्धि र्दुर्वारैवेति तद्वारणाय हेतौ तद्दळप्रवेश आवश्यकः । नच व्यभिचारावारकतया तद्दळवैय्यर्थ्यं दुर्वारमिति वाच्यम् , तत्सार्थक्यायसाध्येपि तत्पदव्यतिरेकप्रयुक्त स्वानुयोगिक तत्पदार्थप्रतियोगिक तत्संसर्गानुभवाभावकत्वे सतीत्यस्य निवेश्यत्वात् । साध्ये एतद्दळनिवेशेघटः कर्मत्वमित्यादौ कर्मत्वरूपार्थे एतद्दळनिर्वाहेण तद्विशिष्टसाध्यवत्त्वा सम्भवाद्व्यभिचारप्रसक्त्या तद्वारकतया हेतावेतद्दळ सार्थक्यात् । तद्दळेच प्रथमस्वपदमाकांक्षावत्त्वेनोपादेयं यद्विशेष्यवाचक तत्तत्पदं तत्परम् । चरमंच स्वपदं पूर्वोक्तार्थपरम् ।

इदन्तुबोध्यम्-घटःकर्मत्वमित्यादावेत द्विशेष्यदळभ्रमाद्व्यन्वयबोधवारणाय प्रकृतिप्रत्ययार्थान्वयबोधे प्रकृतिप्रत्ययानुपूर्वी विशेषज्ञानस्य हेतुताया आवश्यकत्वान्न्यायमते प्येतद्दळज्ञानं न शाब्दबोधहेतुः; तथाच कथमस्य हेतुप्रवेशः । एवं वैशेषिकमतेन्वयानुभवस्यानुमिति रूपतया तत्र पदस्या हेतुतया तद्व्यतिरेकोनान्वयानुभवाभावप्रयोजकः । एवं तदभाव

(?) इति वाच्यम्, तथासति कर्मत्वं घटसंसर्गि एतत्कर्मत्वपद स्मारितत्वा दित्यत्र स्वतोसतोवानुमानात्, कर्मत्वादौ घटादिसंसर्गसिद्धचा वैशेषिकमतेपि घटः कर्मत्वमित्यादौ वप्याकांक्षाया दुर्वारत्वात् । तस्मात् घटमानयतीत्यादौ कर्मत्वकृत्यादि रूपविभक्त्यानर्थे नामधात्वाद्यर्थ घटा नयनादे स्संसर्गविशेषसाधने [न] तन्नामधात्वादिपदप्रकृतिक तत्तत्सुप्ति ङ्गादिपदस्मारितत्वं हेतूकरणीयम् । सामान्यव्याप्तौच यत्त्वतत्त्वेनपदानां निवेशेनामत्व धातुत्वादिनानिवेशः कार्यः । अन्यत्सर्वं पूर्ववत् । यदि नामधात्वादिपदानां नामत्व धातुत्वादिना ज्ञानं विनापि न्यायमतेपि संस र्गसिद्धिः, तदायमपि प्रकारोनसाधीयान् । घटपदत्वाम्पदत्वादिनानाम पदसुप्पदादीनां निवेशेच घटपदप्रकृतिकाम्पदान्तरस्मारितार्थांतरेपि येन तादृशपदस्मारितत्वरूपसाधनं घटपदतात्पर्यविषयसंसर्गरूपसाध्यंवा न गृहीतं तस्य .घटमित्यनः कर्मत्वे घटसंसर्गसिद्धयनुपपत्तिः, दृष्टान्ता भावादितिदूषणं बोध्यम् ।

आद्यिपदात्तत्तदर्थनिरूपितयोग्यतासत्त्योः परिगृहः । पदनिष्ठयोग्यता च स्वाबाधिततत्तदर्थप्रतियोगिकतत्संसर्गकं यत्स्वं तदुपस्थापकत्वम् । स्वपदं पूर्वोक्तार्थपरं । स्वाबार्धितत्वंच स्वनिष्ठाभाव प्रतियोगित्वप्रमा विषयत्वाभावः, स्वनिष्ठाभावाप्रतियोगित्वमेववा । योग्यतानिवेशात्तदर्थ प्रतियोगिकतत्पद तात्पर्यविषयतत्संसर्गकसाध्यशून्ये तत्पदाकांक्षास त्ति मत्पदस्मारितार्थे न व्यभिचारः । पदनिष्ठासत्तिः तत्पदार्थोपस्थि त्य व्यवहितस्वोपस्थितिजनकत्वं । एतच्च योग्यतातः पृथङ्नानिवेश्यं, निरुक्तयोग्यताघटकार्थोपस्थित व्यवहितान्तविशेषणप्रवेशा देषोप पत्तेः । अन्यथोपस्थापकत्वस्य द्विधानिवेशेनगौरवात् । हेतावेतन्निवे शात् नीलोघटोद्रव्यं पटइत्यादौ .व्यवहितोपस्थितिविषय नीलपटाथो स्संसर्गस्य तात्पर्यविषयत्वे अबाधितत्वे चाकांक्षायोग्यतामात्रघटितहेतु

(?) अत्र काञ्चनपङ्क्तय उच्छिन्ना अस्मदुपलब्धेषु सर्वेष्वपि पुस्तके ष्विति तथैवात्र मुद्रितम् ।

ज्ञानात्तत्सिद्धिप्रसंगस्य नावकाशः । तादृशविशेषणस्य व्यभिचारवारकत्वानुरोधेनच तैदर्थोपस्थित्यव्यवहितोपस्थितिविषयत्वेसतीति • साध्येनिवेशनीयं । साध्येतन्निवेशेचासंत्तिघटितसाध्यस्यतादृशार्थेऽसत्त्वेन व्यभिचारप्रसक्त्या तद्वारकत्वेन हेतुस्थ तद्विशेषणसार्थक्यात् । उक्त स्थले ऽव्यवहितोच्चरित प्रथमान्तनीलपदसाकांक्ष प्रथमान्तपदजन्य पटोपस्थितेर्यत्र तत्पदनिराकांक्ष भिन्नविभक्तिक तदव्यवहितपदान्तर जन्य नीलोपस्थित्याव्यवधानं तत्र नीलघटयोरभेदसंसर्गासिद्धिवारणाय साकांक्षत्वं पदविशेषणम् । तैत्पदंजन्यत्व मव्यवधानप्रतियोगिन्यां हेतुस्थासत्ति घटकोपस्थितौ निवेश्यम् । तत्सार्थक्याय ह्याध्यस्था सत्ति घटकतादृशोपस्थितावपि तन्निवेश्यमिति संक्षेपः ।

अथ निराकांक्षस्थले ऽनाहत्तस्थले च केवलयोग्यता घटितलिंगे व्याप्तिपक्षधर्मता ज्ञानसत्वे शाब्दबोधानंगीकर्तृभिर्नैयायिकैरप्यानुमानिक संसर्गधीरवश्य मुपेयतएव, तथा च तत्र तत्र संसर्गासिद्धिवारणाय हेता वाकांक्षासत्ति प्रवेशनं तत्सार्थक्यायसाध्ये तत्प्रवेशनंचायुक्त मित्यय मेतदर्थप्रतियोगिके तत्संसर्गवा नेतत्संसर्गघटिते तत्पदार्थयोग्यता वत्पदस्मारितत्वादित्येवानुमान मुचितमिति चेत् ? निराकांक्षादिस्थले आकांक्षाघटित लिंगकानुमाना द्वाक्यार्थज्ञानस्योभयसिद्धत्वे• प्याकां क्षादिमद्वाक्यज्ञानादवगते वाक्यार्थे श्रुतोयमर्थइति व्यवहारो नतु तदन्यशब्दज्ञानादवगतइति नियमनिर्वाहाय हेतावाकांक्षाप्रवेशन मुक्तम् । तथाच यादृशशब्दज्ञाना च्छाब्दबोधः परेषां तादृशशब्दलिंग कानुमिति सामग्र्या अनुमितिरितिनाभियमः । एवं च तादृशसा मग्री जन्यत्वानुसन्धानं विनापि तैथा व्यवहारात्तादृशसामग्रीणामनु गमाच्चानुमिति व्यावृत्तानुगतशाब्दक जातेरेवतादृशव्यवहारनियामकत्व मावश्यकमितितु सिद्धान्तनिगर्वः ।

प्रथमहेतु प्रविष्टानिरुक्त पदविशेषणासत्ति • योग्यताशरीरघटका व्यवहितोपस्थितिविषयत्वरूप स्वावाधित तदर्थसंसर्गकत्व रूपार्थनिष्ठा

योग्यतासत्तिमत्त्वेसति-संसर्गपरपदस्मारितत्वाद्वा ।
अनाप्तोक्ते योग्यताविरहा न्नव्याभिचारः, तत्र
बाधकसत्त्वात्, तज्जन्यज्ञानस्य भ्रमत्वात् ।

सत्ति योग्यतारूप तदुभयसहित साकांक्षपदस्मारितत्वस्य हेतुतायां लाघवमित्याशयेन तथैव हेतुतामाह (योग्यतेति) अत्रापि संसर्गपरपद स्मारितत्व प्रविष्टहेतावेवा व्यवहितान्तविशेषणं देयं, नतु तद्विशेषण विशेषितोपस्थिति विषयत्वस्य पृथङ् निवेशः, स्मृतिविषयत्वस्य द्विधा निवेशेन गौरवात । संसर्गपरत्वं च पूर्वहेतुस्थं संसर्गघटिताकांक्षा वत्त्वमेव, तद्घटकविशेष्यदळा प्रवेशे पूर्वोक्तदोषस्य दुर्वारत्वात । अन्वयप्रयोजकरूपवत्त्वं योग्यतेत्यभिमानमूळां तादृशयोग्यतात्वस्य बाधि तत्व रूपयोग्यताशून्ये व्यभिचाराशंकां निरस्यति (अनाप्तोक्त इति) सदोषपुरुषेण तत्संसर्गवत्तया बुबोधयिषिते संसर्गशून्ये तदन्वयप्रयो जकरूपवत्यर्थ इत्यर्थः (योग्यताविरहादिति) हेतुघटकेत्यादिः । तत्रैव कुतोनास्तीत्याकांक्षाया माह (तत्रेति) तथा च बाधक प्रमा विरहरूपयोग्यतैव हेतु प्रविष्टेति भावः । नन्वन्वय प्रयोजक रूपात्मकयोग्यताधीरेव शाब्दधीहेतुः, नस्वपर साधारणबाधकप्रमाविर हधीः, तस्य वाक्यार्थधीपूर्वं तज्जन्यज्ञानस्य भ्रमत्वाधधारणात; तथा च परैरप्यन्वय प्रयोजकरूपस्यैव हेतु घटकतावाच्या, तस्यचोक्तस्थ लेपि सत्त्वेनव्याभिचारो दुर्वारएवेत्याशंक्याह (तज्जन्यज्ञानस्येति) तथा च यद्यन्वयप्रयोजक रूपात्मकयोग्यताज्ञानस्य शाब्दधी हेतुता तदातत्र शाब्दभ्रमानुपपत्तिः, शाब्दभ्रमे योग्यताभ्रमरूपदोषस्य हेतु त्वात्तादृशयोग्यताया श्लोकस्थलेसत्त्वेन तद्भ्रमासम्भवादिति बाधकप्रमा विरहरूपयोग्यतैव शाब्दधीप्रयोजिका; तस्या स्संशयसाधारणधिय एव हेतुतायां वक्तव्यतया प्रथमं तदनिश्चेयताया अकिंचित्करत्वात; अतः

एकाकारवाक्यस्यापि बाधकसत्त्वासत्त्वाभ्यां योग्यायोग्यत्वात् ।

अथ—प्रतिपत्तुर्जिज्ञासां प्रतियोग्यता, सा च श्रोतरि तदुत्पाद्यसंसर्गाविगमप्रागभावरूपाकांक्षा, बाधकप्रमाविरहोयोग्यता, अव्यवहितसंसर्ग प्रतियोगिज्ञानमासत्तिः, ताश्चस्वरूपसत्योहेतवः,

---

परमतेपिसैव लिंगविशेषणमिति न व्यभिचारइतिभावः । ननु – पय सासिंचित्यादि वाक्यं स्थिरजलपरं यद्ययोग्यंस्या त्तदाजलान्तरपरमपि योग्यं नस्यात , एकानुपूर्वीकवाक्ये उभयव्यवहारविरहा दित्याशंकां बाधि ताबाधितरूपार्थभेदेनैकानुपूर्वीकवाक्येपि योग्ययोग्यव्यवहारस्येष्टतयानि राकरोति(एकेति)"बाधकसत्त्वासत्त्वाभ्यां"-विभिन्नार्थयो र्बाधाबाधाभ्यां । आकांक्षादीनां पूर्वानुमाने ज्ञातोपयोगितायां व्यवस्थापितत्वेपि पुनस्तस्या असम्भवमाशंक्यनिराकरोति (प्रतिपत्तुरिति) यस्य पुंसश्शाब्दबोधोजन नीयः तस्येत्यर्थः । एतत्स्वरूपकथनं । " श्रोतरी " त्याकांक्षाया आ त्मनिष्ठतयाहेतुत्वलाभाय । शब्दानष्ठतया हेतुत्वे एकपुरुषनिष्ठशा ब्दबोधानुत्पादमादायान्यस्य शाब्दबोधेजातेपि तत्प्रसंगात (तदुत्पा द्येति) तत्तत्पदविषयक तदनुसन्धान जन्यप्रकृतसंसर्गबोधप्रागभाव रूपेत्यर्थः (आकांक्षेति) तदनुसन्धानावच्छिन्न. तत्तत्पदयोराकां क्षेत्यर्थः । अस्याश्च विषयासिद्धिरूप जिज्ञासायोग्यतारूपत्वं, संशय विरोधिसाधकबाधकमानाभावस्य संशययोग्यतात्ववत् . (बाधकेति) प्रकृतसंसर्गबाधकेत्यर्थः (अव्यवहितेति) प्रकृतसंसर्गनिरूपकैकार्थो पस्थित्यव्यवहितार्थोपस्थितिरित्यर्थः (स्वरूपसत्योहेतवइति) न्यायमते

नतु ज्ञाताः, गौरवात् ; तद्बोधंविनान्वयानुभवे विळम्बाभावात् , ससँर्गनिरूप्यत्वेन प्रथमं दुरव धारणत्वाच्च, - इतिनता लिंगविशेषणमितिचे न;- योग्यताशून्येपि तदभिमानेनसँसर्गप्रत्ययात् ।

ज्ञानविषयतामपुरस्कृत्यैव शाब्दबोधहेतवइत्यर्थः । कार्यान्तरे प्रागभाव स्यानुमित्यादौच प्रतिबन्धकबाधनिश्चयाभावस्य विशिष्टबुद्ध्यन्तरेविशेष णस्यच स्वरूपसतएवहेतुताया इष्टत्वादितिभावः । नन्वेकत्रयस्य याद्दशस्य हेतुता, अन्यत्रापि तस्य तादृशस्यैव हेतुतेतिनानियमइत्यतआह (गौरवादिति) ताद्दिषकज्ञानत्वेन ज्ञानविषयत्वेनवा हेतुत्वापेक्षया तत्त्वमात्रेण हेतुत्वे लाघवादित्यर्थः । ज्ञानव्यतिरेकेण कार्योत्पादे ज्ञान हेतुताकथं गौरवेणनिराक्रियतइत्यत स्तदसिद्धिमेवाह (तद्बोधंविनेति) उक्ताकांक्षादिज्ञानव्यतिरेकेणेत्यर्थः । " विळम्बाभावात् " - अनुत्पत्तेर सिद्धेः । "संसर्गनिरूप्यत्वेन"-वाक्यार्थभूतप्रकृतसंसर्ग घटितत्वेनेत्यर्थः । " ताः "- आकांक्षायोग्यतासत्तयः (लिंगविशेषणमिति) भवन्तीति शेषः । तथासति तज्ज्ञानशून्यकाले संसर्गानुमित्यसम्भवेन शाब्द प्रमित्यन्तरस्यावश्यकतापातादितिभावः । स्वीयबाधग्रहाभावएव स्वरू पसन् हेतुः, योग्यताच स्वपरसाधारणबाधप्रमाभावएव, नत्वसौ तथा, तथासत्ययोग्यस्यापीदृशविशेषे ऽबोधकतापत्तेरित्याशयेन प्रथमं योग्य ताज्ञानस्य हेतुत्वं व्यवस्थापयति (योग्यताशून्येपीति) वह्निनासिं चतीत्यादाविति शेषः । " तदभिमानेन "- योग्यताभ्रमेण । " संस र्गप्रत्ययात् "- न्यायमते शाब्दसंसर्गभ्रमात् । तथाच शाब्दज्ञान सामान्ये स्वरूपसत्यायोग्यताया नहेतुत्वं सम्भवति, अपितु भ्रमप्रमा साधारणतज्ज्ञानस्येतिभावः । ननु योग्यताशून्यस्थले संसर्गशाब्दधी

अन्यथा शाब्दाभासोच्छेदप्रसंगः । राजा पुत्रमाकांक्षति पुरुषंवेतिसंशये विपर्ययेच वाक्यार्थधीप्रतिबंधाच्च ।

नोपेयतएवेत्यतआह (अन्यथेति) तत्र संसर्गशाब्दबोधानंगीकार इत्यर्थः (शाब्दाभासोच्छेदप्रसंगइति) शाब्दभ्रमोच्छेदापत्तिरित्यर्थः । योग्यस्थलीयशाब्दबोधस्य प्रमात्वनियमादयोग्यस्थले शाब्दबोधानुपगमे शाब्दभ्रमस्थलाभावः । योग्यताया मीदृशीयुक्तिः- तत्र योग्यताया उपयोगित्वमुभयसिद्धं, ज्ञातायास्स्वरूपसत्त्यावा तथात्वमित्यत्रैव विवादइत्याशयेनाभिहिता । योग्यतास्थलीयो बाधनिश्चयाभावस्स्वनिष्ठशाब्दहेतुरितिचे दुच्यते, तदानैतद्युक्त्यवकाशइतिबोध्यं । अन्वयानुभवप्रागभावएवान्वयानुभवे स्वरूपसन् हेतुः, तद्रूपाकांक्षा न लिंगशेषणं, अपितु समभिव्याहाररूपेत्याशयेनाकांक्षा निश्चयहेतुतायां युक्तिमाह (राजेति) राजपदं पुत्रपदसाकांक्षं, किंवा न तत्साकांक्षं अपितु पुरुषपदसाकांक्षमिति सशयेसतीत्यर्थः (विपर्ययेचेति) राजपदं न पुत्रपदसाकांक्षमिति विपरीतनिश्चयइत्यर्थः । " वाक्यार्थधीप्रतिबन्धात् "- राजपुत्रान्वयबोधानुदयात् । तथाच यत्संशयव्यतिरेकानिश्चयाविरुद्धादिव्यभिचारिबलादाकांक्षा निश्चयहेतुत्वसिद्धिरितिभावः ।

इदमुपलक्षणं - अन्वयप्रतियोग्युपस्थितेस्स्वरूपसत्त्या हेतुत्वे व्याप्तस्थलेपि क्रमिकोपस्थितीनां शाब्दबोध प्राक्काले असत्त्वेन सर्वत्र समूहालम्बन तावत्पदार्थोपस्थिते शाब्दबोध प्राक्काले वह्न्युपेयतया गिरिर्भुक्तमग्निमान् देवदत्तेनेत्यनाप्तस्थलेपि समूहालम्बन स्वीकारे शाब्दबोधस्सुघट इत्याप्तव्यानाप्तस्थलयोरविशेषः, अतः क्रमिकोपस्थितीना मव्यवधानरूपाया आसत्ते र्ज्ञानमवश्यं कारणमुपेयम्, अतस्तस्यां हेतुप्रवेशेपि न दोषः, शाब्दबुद्धौ पदार्थस्मृते रुक्त युक्त्या ज्ञानापेक्षाव्यवस्थितौ स्मारितत्वस्य हेतु प्रवेशेपि नविरुद्धयत इत्यपि बोध्यम् ।

योग्यतायाश्च संशयसाधारणं ज्ञानमात्रंहेतुः ।

स्वपरबाधकप्रमाविरहः ॰

ननु समभिव्याहाररूपाकांक्षाशरीरे तत्तत्पदार्थत्वेनेवा न्वयप्रति योगि घटितासत्तिशरीरेपि प्रकृतसंसर्गानिवेशेपि विशेषणस्य प्रकृत ससर्गावशिष्याबाधितत्वरूपयोग्यता संसर्गघटितत्वेन शाब्दबोधात्पूर्वं दुरवधारैव; नच संसर्गघटितत्वेपि निरुक्तयोग्यता नैकपदार्थसंसृष्टापर पदार्थरूपविशिष्टवाक्यार्थघटितेति प्रथमन्तदवधारणं सम्भवतीतिवाच्यं, विशेष्यविशेषणसंसर्ग सन्देहदशायां तत्संसर्गेपि विशेष्यनिष्ठाभाव प्रतियोगित्वसंशयस्यौ चित्यावर्जिततया तादृशाभावा प्रतियोगित्व रूपाबाधितत्वस्य दुर्निश्चयतया तन्निश्चयस्य शाब्दबुद्धाषपेक्षितत्वे उक्त संशयानन्तरं शाब्दबोधानुपपत्ते र्दुर्वारत्वा दिति युक्त्यावारयंति (यो ग्यतायाश्चेति) (संशयसाधारण मिति) संशयसाधारणरूपावच्छिन्न मित्यर्थः (ज्ञानमात्रमिति) मात्रपदं कृत्स्नार्थकम् । तथा च ग्राह्य संशयदशायां योग्यताया दुर्निश्चयत्वेपि योग्यतासंशया च्छाब्दबोधो पपत्त्या शाब्दबोधे तस्या ज्ञातोपयोगित्वं निराबाधमिति भावः । शाब्द बोधे नैयायिकै स्संशयसाधारणतज्ज्ञानहेतुतास्वीकारेपि वैशेषिकमते नुमितौ तन्निश्चयापेक्षा दुर्वारैव, हेतुमत्ता निश्चयस्यानुमिति हेतुत्वा, दिति संशयकाले तेषां मते संसर्गज्ञाननिर्वाहइति वन्मते दूषण स्वयमेवाग्रेवक्ष्यते । संशयाभावे स्वीयबाधकप्रमाविरहस्य स्वस्मिन् बाधकप्रमाया मसत्यां, निश्चयसम्भवेपि परकीयबाधक प्रमासंशयस्य दुरुच्छेदतया बाधकप्रमाविषयत्व सामान्याभाव रूप योग्यता विषये न निश्चेतुं शक्यते, तत् कथमुक्त संशयसाधारणज्ञान मात्रं हेतुरित्याशंकामपनेतुं क्वाचित्कं तादृशयोग्यतानिश्चयसम्भव मुप पादयति " स्वपरेत्या " दिना । " स्वपर बाधकप्रमाविरहः "- विशेष्ये विशेषणसंसर्गाभाव प्रमाविषयत्वसामान्याभावः, विशेषणसंसर्गे विशे

क्वचिन्निश्चीयतेपि, यथा – इहघटोनास्तीत्यत्र, स्वयोग्यानुपलब्ध्या घटाभावनिश्चयेना न्यस्यापि घटप्रमाविरहो निश्चीयते । क्वचिद्बाधकप्रमामात्र विरहसंशयेप्यन्वयबोधः,बाधसंशयस्यादूषणत्वात् ।

ष्यनिष्ठाभाव प्रतियोगित्व प्रमाविषयत्वाभावोवा (क्वचिदिति) विषये कदाचिदिति शेषः (इहघटोनास्तीत्यत्रेति) एतादृश शाब्दबोधपूर्व कालइत्यर्थः (स्वयोग्यानुपलब्ध्येति) 'स्वस्य'- प्रतिपन्नुः । प्रतियोगिसत्त्व प्रसञ्जितप्रतियोगिकत्वरूप योग्यतावत्याभूतले घटानुपलब्ध्या कदाचि त्स्वस्य घटाभावरूपलिंगनिश्चयेन (अन्यस्यापि घटप्रमाविरह इति) स्वपरसाधारण घटप्रमाविषयत्वाभावरूप योग्यतेत्यर्थः । " निश्चीयते "- अनुमीयते । घटाभावस्य घटप्रमाविषयत्व सामान्याभाव व्याप्यत्वा दिति भावः । घटाभावस्येव तत्संसर्गस्याप्यभावो घटस्वरूपएवेति घटप्रमाविषयत्वाभावस्य घटाभावशाब्दबोधौपयिकयोग्यतात्वम् । विशे ष्येविशेषणाभाव प्रमाविषयत्वाभावो योग्यतेति निष्कृष्टमतानुसारेणेदं मुक्तम् । प्रत्यक्षादिसिद्धे शशाब्दबोधाविरोधितया प्रात्यक्षिक 'घटाभावनि श्चयानन्तरमपीह घटोनास्तीति शाब्दबोधसम्भवो बोध्यः । ननु बाधक प्रमाविषयत्वाभाव रूपयोग्यतासंशयस्य बाधकप्रमाविषयत्व रूपबाधवि षयकतया विशिष्टज्ञानविरोधितया योग्यतासंशयात् कथंशाब्दनिश्चय इत्यतआह (क्वचिदिति) "प्रमामात्र विरहसंशये"-ग्राह्याभावप्रमाविषयत्व सामान्याभावसंशये । "अन्वयबोधः"-शाब्दसंसर्गनिश्चयः (बाधसंशय स्येति) ग्राह्यसंशय पर्यवसितस्येतिशेषः। "अदूषणत्वात्" - परोक्षनिश्चया विरोधित्वात् । ग्राह्यसंशयकाले शाब्दानुमित्यो स्सर्वानुभव सिद्धस्या दित्यर्थः । ननुयोग्यतायाः शाब्दबोधंप्रति स्वरूपसत्या अपि हेतुता नोपेयसहस्यंतो न शाब्दभ्रमानुपपत्तिरिति तज्ज्ञानहेतुत्वं निर्युक्तिकम् ,

किंच तवापि योग्यतादिकं प्रामाण्ये प्रयोजकं, आप्तोक्तत्वस्य तथात्वे गौरवात् , अनाप्तोक्तेपि संवादेनप्रामाण्याच्च । एवंच ज्ञायमानकरण प्रामाण्यप्रयोजकतया तद्वत्ता ज्ञानमावश्यकमिति तासां ज्ञानं हेतुः ।

अयोग्यतानिश्चयदशायां लौकिकसन्निकर्षाद्यजन्यविशिष्टबुद्धि सामान्य हेतु बाधनिश्चयाभावविरहादेव शाब्दबोधानुत्पत्त्युपपत्तेरित्याशंक्य, योग्य ताज्ञानादीनां शाब्दनिष्ठप्रामाण्यप्रयोजकत्वं व्यवस्थाप्य, तेन लिंगेन तज्ज्ञानहेतुतां व्यवस्थापयति " तवापी " त्यादिना । " योग्यतादिक " मित्यादिपदा दाकांक्षासत्तिपरिग्रहः । " प्रामाण्ये " - शाब्दप्रमा करणत्वपर्यवसिते । नन्वनाप्तोक्त शाब्दवारणायैव योग्यता प्रमाणतावच्छेदककोटौ निवेशिता, तत्स्थाने आप्तोक्तत्वमेव किं ननिवेश्यत इत्याशंक्य निरस्यति " आप्तोक्तत्वस्ये " त्यादिना । "तथात्वे"- प्रामा ण्यप्रयोजकत्वे (गौरवादिति) भ्रमप्रमाद विप्रलिप्साकरणापाटवरूपदो षचतुष्टयशून्यत्वरूपाप्तत्वस्यापि गुरुमूर्तिकतयावच्छेदकगौरवादित्यर्थः । ननु प्रकृतवाक्यार्थ यथार्थज्ञानवत्त्वमेवाप्तत्वं, ननु दोषचतुष्टयशून्यत्वम् मिति न गौरवमित्यतआह (अनाप्तोक्तइति) वाक्यार्थज्ञानशून्य शुकादु क्तेपीत्यर्थः । " संवादेन "- वाक्यार्थज्ञानस्या बाधेनेत्यर्थः । तथा च तत्साधारण्यविरहेण नाप्तोक्तत्वस्य तथात्वमिति भावः । " एवं च "- मिलितस्य योग्यताकांक्षादेः प्रामाण्यप्रयोजकत्वे च । " तासां ज्ञानं हेतु " रित्यग्रिमेणास्य सम्बन्धः.। कुतस्तत्याकांक्षायामाह (ज्ञायमान करण इति) ज्ञायमानत्वेन यत्करणं तन्निष्ठं यत्प्रामाण्यं तत्प्रयोजकं, ज्ञायमानत्वावच्छिन्ने प्रमाकरणत्वावच्छेदकमिति यावत् । "तद्वत् ताज्ञानं "- तद्रूपप्रकारकज्ञानम् । " आवश्यकं "-तत्प्रमायामवश्यं कार

तच्च समभिव्याहारविशेषादिनेति ।

मैवं—यत्र विमलंजल मित्यश्रुत्वैवनद्याःकं च्छेमहिषश्चरतीति शृणोति तत्राकांक्षादिकमस्ति, नच नदीकच्छयोः

णम् । अत्र ज्ञायमानत्वादिरूप विशेष्यतावच्छेदकतापन्नं सद्यत्प्रमाकरणतावच्छेदकं तत्तत्प्रमाकरणतायांप्रकारितासम्बन्धेनावच्छेदकमिति समुदितार्थः । प्रत्यक्षप्रमाकरणतावच्छेदकज्ञायमानत्वस्यच ज्ञानेनतत्प्रमाहेतुरिति तत्रव्यभिचारवारणाय ज्ञायमानत्वरूपावच्छेदक विशेष्यतावच्छेदकत्वनिवेशः । ज्ञायमानत्वस्य तद्विशेष्यतावच्छेदकतापन्नस्य न करणताऽवच्छेदकत्वमिति न तत्र व्यभिचारः । योग्यतादेश्च ज्ञायमानत्व विशेष्यतावच्छेदकतयैव शाब्दबोधकरणतावच्छेदकत्वान्नासिद्धिः । अनुमितौ च लिंगस्य ज्ञायमानत्व विशेष्यतावच्छेदकतापन्नेन व्याप्त्यादि मत्त्वरूपलिंगत्वेन करणतया व्याप्त्यादेरत्र दृष्टान्तताबोध्या । क्वाचित्क योग्यतादिविषयतया सिद्धसाधनवारणाय जनक ज्ञानप्रकारत्व मुपेक्ष्य प्रकारतया जनकतावच्छेदकत्व रूपसाध्यादरः । साध्यसाधनशरीरेयत्त्वतत्त्वेन प्रमामनिवेश्य प्रमात्वेनैव निवेशे योग्यतादि हेतुकानुमिति जनकज्ञान विषयतया सिद्धसाधनं स्यादिति सामान्यमुखव्याप्त्याशाब्द प्रमायां तज्ज्ञानस्य हेतुतासिद्ध्यर्थं यत्त्वतत्त्वाभ्यां तन्निवेशः । "तच्च"-शाब्दबोधप्राक्काले नियमत आकांक्षादिज्ञानञ्च (समभिव्याहा [रविशेषा] रादिनेति) तद घटकसमभिव्याहारादि • ग्राहकप्रकरणादिनेत्यर्थः (तत्राकांक्षादिकमस्तीति) जलमित्यन्ताश्रवणेन जलेन सह नद्यन्वयबोधानुत्पत्त्या नदीकच्छपदयो रजनितान्वयबोधकरूपाकांक्षादिकमस्तीत्यर्थः । जलमित्यन्ताश्रवणं नदीजलान्वयबोधकारणान्तराभावस्याप्युपलक्षणं (नचेति) नास्तित्यर्थः (नदीकच्छयोरिति)

संसर्गइतिव्यभिचारात् । अतएव नतन्मात्रं प्रयोजकं प्रामाण्ये ।

अथ यावत्समभिव्याहृतेत्यपि लिंगविशेषणं, कतिपयस्मारिर्णस्तु संसर्गप्रत्ययो लिंगाभिमानादितिचेन्न;—तत्संदेहेपि वाक्यार्थावगमात् ।

आकांक्षादिमत्पदस्मारितेत्यादिः (संसर्गइति) मिथइत्यादिः । तात्पर्यविषयइतिशेषः । अन्यथा नदीकच्छयो स्संसर्गाभावाभावेन व्यभिचारप्रवृत्तेः (व्यभिचारादिति) तात्पर्यविषयसंसर्गघटितसाध्याभावादिति भावः । नन्वेवमाकांक्षादिमत्त्वस्य संसर्गतात्पर्यविरहेण प्रमानुत्पादकतादृशपदद्वयसाधारण्येनातिप्रसक्ततयाप्रामाण्यप्रयोजकत्वमपि नस्यादित्यत्वे ष्टापत्त्यासमाधत्ते (अत एवेति) संसर्गतात्पर्यविरहेण तत्राप्रामाण्यादेवेत्यर्थः । " तावन्मात्रं "- तात्पर्यसहिताकांक्षादित्रयम् । नदीपदसमभिव्याहृतपदाश्रवणस्थले प्रदर्शितं व्यभिचारमुद्धर्तुं हेतु घटकपदे विशेषणान्तर प्रवेशमाशंकते (अथेति) यावत्समभिव्याहृतत्वं-श्रूयमाण स्वसमभिव्याहृत यावत्पदकत्वम् । " लिंगविशेषण "- पदविशेषणतया लिंगघटकम् । तथा च तत्र नदीपद समभिव्याहृत जलपदस्य श्रूयमाणतया नोक्तविशेषणघटितहेतुः नदीपदार्थइति न व्यभिचारइति भावः । नन्वेतद्विशेषणप्रवेशे शोभनं घटमानयेत्यादौ घटादिपदसमभिव्याहृत शोभनादिपदाश्रवणेपि ज्ञायमानस्य घटैकर्मत्वादिसंसर्गस्य भवन्मतेनुपपत्तिः, घटादिपदस्य उक्तविशेषणानाक्रान्ततया तत्स्मारित घटार्थे उक्तलिंगाभावादित्यत आह (कतिपयेति) (लिंगाभिमानादिति) उपदर्शित हेतो स्तत्रासत्त्वेपि तद्भमादित्यर्थः । यत्र श्रूयमाण पद समभिव्याहारस्य प्रकृतपदे सन्देहादिः तत्रोक्तलिंगस्य न भ्रम सम्भवइति तत्रापि श्रूयमाणपदस्मारितार्थान्वय संसर्गबोधोत्पत्त्योक्त विशेषणप्रवेशासम्भवइति दूषयति (नतदिति) समभिव्याहृतपद

तत्र संसर्गभ्रांतिरितिचेन्न;— अन्यकारणा
भावे . पदमेवभ्रांतिजनकं, तथाचादुष्टं सत्तदेवा
भ्रांतिं जनयत्केनवारणीयं । असंसर्गग्रहइति
चेन्न;— संसर्गेबाधकाभावात्

अथ - आप्तोक्तत्वं लिंगविशेषणं,

न्तर सन्देहस्थले संसर्गानुमानासम्भवेन शब्दस्य संसर्गप्रमाया-
गमेपि तत्र बाधितसंसर्गस्यैव बोधोभ्युपगम्यतइति प्रमारूपसंसर्ग बोध
जनकत्वं शब्दस्य न सिद्धमिति कुतस्तत्प्रामाण्यमिति शंकते (तत्रेति)
(अन्यकारणाभाव इति) उक्तस्थळ इत्यादिः। सतीति शेषः। संसर्गभ्रमस्य
कारणान्तरासत्त्वेनेत्यर्थः। "भ्रान्तिजनकं"-भ्रान्तिकरणं, स्वीकरणीयम्।
"अदुष्टं"- संसर्गबाधरूप दोषासम्बहितम् 'तदेव'- पदरूपकारणमेव।
" अभ्रान्तं "- संसर्गप्रमाम् । ननूक्तस्थळे संसर्गबोधस्वीकार
एवोक्तयुक्त्या शब्दस्यप्रामाण्यसिद्धिः, सएव न स्वीक्रियते, अपि
त्वसंसर्गाग्रहमात्रं, इत्याशंकते (असंसर्गाग्रहइति) यत्र संसर्गबोध
आनुभाविकः तत्र बाधकसत्त्वेन तदनुपपत्तेरनुभवापळापोयुक्तः, नतु
कथञ्चित्तदुपपत्तौ, प्रकृतेचं शब्दप्रामाण्यबाधकविरहेण तदुपपत्त्या नां
नुभवापळापसम्भवइति दूषयति (नेति) विमळश्चळमित्यादौ व्यभि
चारस्य हेतौ परस्पर समभिव्याहारेण उभयपदार्थयो र्मिथस्संसर्गता
त्पर्येणवा घटिताया आकांक्षाया निवेशेन वारणसम्भवात् वयन्तिव
त्यादिना योग्यताघटितहेतो स्सर्वत्र निश्चयासम्भवरूप .दुरुद्धरदोषेण
वैशेषिकमतं स्वयं निराकरिष्यते, प्रकारान्तरेणोक्त व्यभिचारोद्धार
माशंकते (अथेति) (आप्तोक्तत्वमिति) यत्पदार्थे. यत्पदार्थसंसर्ग
वत्त्वं साध्यं तत्पदार्थ ह्रय संसर्गविषयक यथार्थज्ञानत्वं त्पुरुषोच्चरि
तत्वमित्यर्थः । तादृशज्ञानजन्यत्वमितियावत् । "लिंगविशेषणं"-

तदेवचलिंगं, नच नदीकच्छयो स्संसर्गे आप्तो
क्तत्वं, आप्तोक्तत्वञ्च प्रामाण्ये तंत्रमिति तद्रूपया
ज्ञायमानस्य हेतुत्वेन तत्र ज्ञानमावश्यकं, व्या
प्तिमत्तया ज्ञातस्येव लिंगस्य,

लिंगघटक परस्पराकांक्षादि मत्पदविशेषणमित्यर्थः । " तदेवच "- आकांक्षादिकं परित्यज्य तादृशाप्तोक्तत्ववत्पदस्मारितत्वमेवच (लिंग मिति)- तथाच स्वार्थानुयोगिक यत्पदार्थ प्रतियोगिकसंसर्गविषयक यथार्थज्ञानजन्य पदार्थस्मारितो योर्थ स्स तात्पर्यविषय तत्पदार्थ संस र्गवा नित्येव सामान्यरूपाभिरुपगन्तव्या । अत्र घटः कर्मवमित्यादि निराकांक्षस्थले नासन्नस्थलेच तात्पर्यसत्वे साध्यसत्त्वा त्सम्बन्ध ता त्पर्यासत्वे सतात्पर्यवाक्यएव संसर्गज्ञानस्य जनकतयासंसर्गज्ञाना जन्यत्वेन, अयोग्यस्थले यथार्थसंसर्गनिश्चयाभावेन हेत्वसत्त्वाद्व्यभि चाराप्रसक्तया,आकांक्षाद्युपादानमनर्थकमितिभावः । प्रकृते व्यभिचार मुद्धरति (नचेति) नहीत्यर्थः । " नदीकच्छयो स्संसर्गे "- नदीक च्छसंसर्गघटितं । आप्तोक्तत्वं, नदीकच्छपदार्थयो रस्तीतिशेषः । तथाचोक्तहेत्वभावा न्न व्यभिचारइतिभावः । शब्दप्रामाण्यमते आ प्तोक्तत्व ज्ञानस्य शाब्दसंसर्गज्ञानाहेतुत्वेन तदज्ञानदशायां संसर्गज्ञाना नुरोधेन शब्दप्रामाण्यमावश्यकंस्यात् , एतन्मतेपि तज्ज्ञानहेतुतांव्य वस्थापयति (आप्तोक्तत्वञ्चेति) " प्रामाण्ये " - शब्दप्रामाण्ये । " तन्त्रं "- प्रयोजकं । " इति "- अतः । " तद्रूपया "- आप्तोक्त त्व प्रकारेण । " ज्ञायमानस्य " - शब्दस्य । " हेतुत्वेन "- शाब्दबोधजनकत्वेन । " आवश्यकं "- शाब्दज्ञानेपेक्षितं (लिंगस्येति) हेतुत्वेनेत्यादिकमनुषज्यते । अत्र हेतुत्वेनेत्यस्यानुमितिहेतुत्वेनेत्यर्थः ।

ननु वाक्यार्थगोचर यथार्थज्ञानवदुक्तत्वरूप आप्तोक्तत्वं वाक्या र्थज्ञानात्पूर्वं दुर्ग्रहं, तज्ज्ञानयाथार्थ्यग्राहकस्य तज्ज्ञानजन्यप्रवृत्तिसंवादादेः

तदवगमश्च लोकेभ्रमाद्यमूलकत्वेन, महाजन परिग्रहेण वेदे स्मृतौच, इतिचेन्न;—यत्रकुत्रचि दाप्तत्वमनाप्तस्यापि । सर्वत्राप्तंत्वमप्रसिद्धं, भ्रांतेः पुरुषधर्मत्वात् । प्रकृतवाक्यार्थ यथार्थ ज्ञानवत्त्वं चाप्तत्वं प्रथमं दुर्ग्रहं, भ्रमाद्यमूल कत्वस्य प्रवृत्तिसंवादादेश्च तद्ग्राहकस्याज्ञानात् ।

पूर्वमग्रहा, दिति कथमुभयमते तदपेक्षेत्यत स्तद्ग्राहकमाह (तदवग मश्चेति) तन्निश्चय इत्यर्थः । " लोके "- लौकिकवाक्ये । " भ्रमा द्यमूलकत्वेन " – भ्रमादिरूपवक्तृदोषा प्रयोज्यत्वे सति वाक्यार्थज्ञानव दुक्तत्वेन; तेन शुकादिवाक्य व्युदासः । " महाजनपरिग्रहेण " – शिष्टानां कर्तव्यतया वेदबोधितयागाद्याचरणेन, शिष्टाचारविषयार्थ प्रतिपादकत्वेनेति यावत । एतच्च उक्तभ्रमाद्यमूलकत्वस्या म्युपलक्ष णम्, तस्यापि वेदेसत्वात ; आप्तत्वं विकल्पयदूषयति (यत्रं कुत्र चिदिति) वाक्यार्थइति शेषः । यत्किंचि द्वाक्यार्थगोचर यथार्थ ज्ञानवत्त्वमित्यर्थः । " अनाप्तस्यापि "- बाधितवाक्यप्रयोक्तुरपि (सर्व त्राप्तत्वमिति) स्वज्ञातयावद्वाक्यार्थ गोचरयथार्थज्ञानवत्त्वमित्यर्थः । (अप्रसिद्धमिति) ईश्वरयोगिभिन्ने कुत्रापि न प्रसिद्धमित्यर्थः । "भ्रांतेः "- किंचिदर्थभ्रान्तत्वस्य । " पुरुषधर्मत्वात "- असर्वज्ञ समस्तपुरुष साधारणत्वात् (दुर्ग्रहमिति) ग्राहकाभावेनेत्यादिः । तथा च वाक्ये आप्तोक्तत्वमपि ग्राहकाभावेन दुर्ग्रहमितिभावः । ननूक्तमेव भ्रमाद्य मूलकत्वादिकं तद्ग्राहकमस्त्वित्यत आह (भ्रमेति) (प्रवृत्तिसंवादेति) संवादिप्रवृत्तिं प्रयोजकत्वेत्यर्थः । " अज्ञानात "-वाक्यार्थज्ञानात्पूर्वं सिध्येतु मज्ञानत्वात् । वक्तुः प्रकृतवाक्यार्थज्ञाने कथंचित् ज्ञातेपि तत्र प्रथमतो

प्रवृत्तिश्च संदेहादपि ।

किञ्च—प्रकृतंवाक्यार्थेयमभ्रांतो यथार्थ ज्ञानवान्वेति संसर्ग मप्रतीत्य ज्ञातुमशक्यं, वाक्या र्थस्यापूर्वत्वात् ।

वयंतु ब्रूमः — बाधकप्रमाभावोयोग्यता,

भ्रमत्वशंकासम्भवेन तत्र याथार्थ्यस्य दुरवधारणत्वात, प्रवृत्तेः पूर्वं प्रवृत्तौ संवादस्य च तथात्वादिति भावः ।

नन्वेवं शब्दप्रामाण्यपक्षेपि तदधीनवाक्यार्थज्ञाना त्प्रवृत्त्यनुपपत्तिः, तादृशज्ञाने जातेपि वक्तृज्ञानइव तत्रापि प्रामाण्यसंशयसम्भवा, न्निश्चित प्रामाण्यकज्ञानस्यैव तत्त्वात , प्रवृत्तिपूर्वं प्रामाण्यनिश्चायकस्य संवादि प्रवृत्तिजनकत्वरूपलिंगस्य निश्चेतुमशक्यत्वा, दित्याशंक्य; सन्दिग्धप्रा माण्यकतया संशयोत्पादेप्यर्थज्ञानात्सकम्पाप्रवृत्तिर्भविष्यति, तस्याश्च संवादित्वं गृहीत्वा तज्जनकज्ञाने प्रामाण्यं निश्चित्य तदुत्तरकालएव च निष्कम्पं प्रवर्ततइति समाधत्ते (प्रवृत्तिश्चेति) आप्तत्वस्या पूर्वप्र कृतवाक्यार्थ घटिततया तस्य तदुक्तत्वस्यच साध्याप्रसिद्धयाप्यनुमाने- न दुर्ग्रहत्वमित्याह (किञ्चेति) (वाक्यार्थेऽभ्रान्तइति) भ्रमत्वाभा वविशिष्टैक पदार्थसंसृष्टापरपदार्थ ज्ञानवानित्यर्थः । " यथार्थज्ञानवा " नित्यत्रापि ' प्रकृतवाक्यार्थ ' इत्यनुषज्यते । तथाचैकपदार्थसंसृष्ट परपदार्थविषयक तत्संसर्गज्ञानवानित्यर्थः । उक्तरीत्यादर्शितहेतो र्व्यभि चारवारणसम्भवा त्स्वयं दूषणान्तरमाह (वयन्त्विति) (बाधकप्रमा भावइति) विशेष्यविशेषणसंसर्गाभावप्रमाया विशेषणसंसर्गे विशेष्य वृत्त्यभावप्रतियोगित्वे प्रमायावा विशेष्यतासम्बन्धावच्छिन्नप्रतियोगित्वा

साच न लिंगविशेषणं, बाधकप्रमामात्रविरह स्य सर्वत्र निश्चेतु मशक्यत्वात् , तत्संशयेपि शब्दादन्वयबोधाच्च । शब्दप्रामाण्येतु योग्यताया स्संशयनिश्चयसाधारणं ज्ञानमात्रं प्रयोजकमिति शब्दः प्रमाणमिति ।

कोभावइत्यर्थः (नलिंगविशेषणमिति) लिंगं वेतिशेषः । यत्रश ब्दा त्पदार्थसंसर्गप्रत्यय स्तत्र सर्वत्र लिंगतावच्छेदकतया लिंगतया वा नानुमिति निर्वाहकमित्यर्थः (प्रमामात्रविरहस्येति) बाधकप्र मासामान्यविरहस्येत्यर्थः (सर्वत्रेति) शाब्दसंसर्गप्रत्ययात्प्रागिति शेषः । उक्तरीत्या क्वचिन्निश्चयसम्भवेन सर्वत्रेत्युक्तं (निश्चेतुमशक्यत्वा दिति) लिंगतावच्छेदकांशे लिंगांशे वा संशयरूपपरामर्शस्यानुमित्य जनकत्वादितिशेषः ।

नच ग्राह्यसंशयस्यानुमित्यनुगुणतया तदन्यसंशयभेदस्यैवानुमित्यौ पयिकनिश्चयत्वघटकत्वोपगमा द्योग्यतांशे संशयादपि परामर्शादनुमिति र्निष्प्रत्यूहेतिवाच्यं; ग्राह्याभावकोटिक संशयान्यत्वेन ग्राह्याभावातिरिक्तप रस्परविरोधिप्रकारकान्यत्वेनवा नुमितिहेतुत्वोपगमे निश्चितस्वव्या प्तिक सन्दिग्धसाध्यरूपलिंगा त्सर्वत्र साध्यनिश्चयापत्तेः । नच साध्या भाववद्वृत्तित्वरूपव्याप्तिज्ञानस्य लिंगतावच्छेदकाविषयकस्याप्यनुमिति हेतुतया लिंगतावच्छेदकांशे संशायत्वंमकिंचित्करं, तथाच संदि ग्धयोग्यता घटितधर्मावच्छिन्नोक्तलिंगादप्यनुमिति र्निराबाधा; एवं बाधा भावरूपयोग्यताया बाधसंशयस्थले ग्राह्याभावत्वेन दुर्निश्चयत्वेपि व्याप्य त्वेन निश्चयसंभवा द्योग्यताहेतुकापि संसर्गानुमिति स्संभवतीतिवाच्यं; हेतुतावच्छेदकस्य पक्षवृत्तौ संदेहे पक्षेहेतुतावच्छेदकविशिष्टसन्देहस्यो चित्यावर्जितत्वया व्याप्यतावच्छेदक विशिष्टवत्तानिश्चयं विनापक्षे केव

लव्याप्यत्वपुरस्कारेणापि व्याप्यवत्त्वनिश्चयासंभवः द्विरोधिनिश्चयाच त्वेन व्याप्यत्वस्य भानेबाधकाभावात् । अतएव पर्वतीयहेतौ अयंधूमो धूलीपटलंवेति सन्देहे हेत्वंतरस्या लोकादेरनिश्चये न पर्वतेवह्न्यनुमितिः । अयमालोको धूमोवेति संशयस्थले व्याप्यतावच्छेदकतया गृहीतान्य तरत्वादिना पक्षे धूमादिनिश्चया नंतरमेवानुमितिः ।

अथ माभूत्सर्वत्र योग्यतया स्तदघटितहेतोर्धानिश्चयः, तथापि तद् निश्चयस्थले निश्चययोगितयास्वीकृतात्तात्पर्यरूपलिंगादेव संसर्गानुमिति स्संभवति; अनुमानञ्च कर्मत्वादिकं घटादिसंसर्गि घटादिसंसर्गितया बुबो धयिषितत्वादित्याकारं; नच घटादिसंसर्गशून्यस्याप्यर्थस्य तत्संसर्गितया भ्रांतस्य प्रतारकस्यवायाबुबोधयिषा तद्विषयत्वादुक्तलिंगं व्यभिचारीति कुतस्तत स्संसर्गानुमितिसम्भवइति वाच्यं, तादृशव्यभिचारास्फूर्ति दशायां भ्रमात्मक तल्लिंगधर्मिकव्याप्तिज्ञाना नन्तरम्स्फूर्तिदशायां च भ्रमा नधीनत्वादि रूपविशेषणावच्छिन्न बुबोधयिषाविषयक व्याप्तिप्रमा तोनुमिति सम्भवात् ; तदानीं बुबोधयिषा भ्रान्तत्वादिसंशये तादृश विशेषणनिश्चयासम्भवेपि नक्षतिः, तदानीं नैयायिकाभिमत संसर्गप्रत्य यस्योत्पादेपि तत्र भ्रमाधीनवाक्यजन्यत्वसंशयेन प्रामाण्यसंशया त्तत: प्रवृत्त्याद्यनिर्वाहा त्तत्र संसर्गबोधस्यानभ्युपगमसम्भवात् । नचैवं क्व चिदेकपदार्थे परपदार्थसंसर्गानुमिति सम्भवेपि नैयायिकमतसिद्धस्यै कपदार्थांशे साक्षात्पदार्थांतरप्रकारकबोधस्य समानाकारानुमिति र्नस्यं भवति, क्वचित्पदार्थस्यैव साध्यत्वोपगमेन तदुपपादनेपि यत्नाभावकर्म त्वादौ नञ् विभक्त्यार्थे घटादेर्वृत्त्यनियामकानुयोगित्वाधेयत्वादि संस र्गभानं तत्र तादृशसंसर्गस्य व्यापकत्वाघटकत्वेन तेन सम्बन्धेन घटादिप्र कारकत्वेनाभावादिभानं दुर्घटमेवेतिवाच्यं, वृत्त्यनियामकसंसर्गस्याभा वप्रतियोगितानवच्छेदकत्वेपि व्यापकताघटकसम्बन्धेन प्रतियोगिवैय धिकरण्य घटितव्याप्तौ तत्सम्बन्धावच्छिन्न प्रतियोगितापर्याप्ता निवेशा द्वृत्त्यनियामकसम्बन्धस्यापि व्यापकताघटकत्वसम्भवात् । नचैव मा कांक्षाया वाक्यार्थबोधानुपयोगितया साकांक्षानाकांक्षयो रविशेषेणबट

कर्मकानयादि प्रत्यायनेच्छया घटमानयेत्यादिवद् घटःकर्मत्वमानय नमित्यादिकमपि व्युत्पन्नैः प्रयुज्येतेतिवाच्यं, नैय्यायिकमतेपि निरा कांक्षपदेभ्यः पदार्थोपस्थिता वेकपदार्थे परपदार्थानुमितिसम्भवेन दार्शि तप्रयोगस्य दुर्वारत्वात *। तात्पर्यरूप हेतु स्साकांक्षत्व ज्ञानादेव झटिति गृह्यतइति साकांक्षमेववाक्यं प्रयुज्यतइति समाधानस्य च तुल्यत्वादि ति चेत्? सत्यम्, तथापि व्याप्तिज्ञानविरहदशायामपि न्यायमते पदे भ्यस्तत्तदर्थसंसर्गबोधा त्तदानीमनुमित्यसम्भवेन शब्दस्य पृथक् प्रमा णयमावश्यकम् *। सर्वत्रैव व्याप्तिग्रहः कल्प्यते, सामग्र्यन्तरकल्पना पेक्षया कल्पितसामग्रीकल्पने लाघवादिति चेत्? तथापि घटकर्मकानय नानुकूल कृतिमच्छेत्रादिरूप विशेषणपरम्पराघटित वाक्यार्थस्थले यत्र न्यायमते वान्तरवाक्यार्थबोध मन्तरेणैव विशेष्येविशेषणमिति रीत्या महावाक्यार्थ बोधः तत्र वैशेषिकमते कर्मत्वानयनादौ क्रमेण क्रमेण घटकर्मत्वाद्यनुमित्युत्पत्त्यैव विशिष्टसाध्यप्रसिद्धिनिर्वाहा च्छिरेणैव ताद्दशवाक्यार्थबोध इति वैषम्यम् । नहि विशिष्टसाध्यप्रसिद्धिमन्तरेण विशेष्येविशेषणस्य तत्र च विशेषणान्तरस्य व्याप्यवत्ताज्ञाना त्समूहाल म्बनरूपा द्विशेष्येविशेषणमित्यादिरीत्या विशिष्टविशेषण समूहालंबनानु मिति सम्भवः, तादृशव्याप्यवत्ताज्ञान समुदायस्य विशिष्टबाधाद्यभाव सह कृतस्य विशिष्टविशेषणकानुमिति सामग्रीत्वे पर्वतोवह्निव्याप्यवानभाव व्याप्यवांश्च, अभावश्च वह्नित्वावच्छिन्न प्रतियोगिताकत्व व्याप्यवानिति समूहालम्बनात्पर्वतो वह्निमान्नवेति संशयानुमित्यापत्तेः । ज्ञानव्याप्यवानी श्वरः ज्ञानंच जन्यत्वव्याप्यवदिति प्रमापरामर्शादीश्वरादौ बाधाभावग्रहेण जन्यज्ञानादिप्रसंगात् । अभावत्व सामानाधिकरण्येन साध्यीयत्वभासक लिंगज्ञानसहितात्पक्षे अभावसाध्यकलिंगज्ञाना द्व्यतिरेकिसाध्यके सर्वत्र सत्प्रतिपक्षसम्भवेनानुमानत स्तादृशसा-यसिद्ध्युच्छेदापाताच्च । सामान्यव्याप्तया अप्रसिद्धिविशेषसिद्धिरित्यपि न संभवति, घट कर्मकानयनकृत्यादि रूपविशिष्टवाक्यार्थो प्रसिद्धौ तत्तात्पर्य घटित लिंगे पक्षधर्मताज्ञानासंभवात् ।

किंच शाब्दस्य विलक्षणानुभवस्या नभ्युपगमे ऽयमर्थश्रुत इति व्यवहारविषयस्या शक्यनिर्वचनता स्यात् । 'श्रुधातो रनुमित्यर्थ कत्वे धूमादिलिंगकानुमिति मादाय यत्रपर्वते वह्निरनुमित इतिव्यवह्रियते तत्रापि श्रुतइति व्यवहारापत्तिः । नच शाब्दलिंग कानुमिते श्रुधात्वर्थतया नायमतिप्रसंगइतिवाच्यम् , शाब्दलिंगकाकाश पदवाच्यत्वानुमिति मादाय तादृशसाध्यादौ श्रुतइति व्यवहारापत्तेः । स्मारितत्वसंबंधेन शब्दस्य लिंगतायां स्वदर्थघटकत्वे प्याकांक्षादिज्ञानशू न्यकालीनां तादृशसंबंधेन पदलिंगकानुमिति मादाय तद्विषये श्रुतव्यवहा रापत्तेः न नैयायिक सिद्धसामग्री समवहितोत्तरानुमितेःश्रुधात्वर्थत्वे तादृश सामग्री प्रतिसंधानासत्वे तथाविध व्यवहारानुपपत्तिः, शाब्दधीभेद भिन्नानां सामग्रीणामननुगमेन व्युत्पत्त्यनुपपत्तिश्च ।

एतेन श्रुधातोः श्रावणप्रत्यक्षमेवार्थः, कर्मप्रत्ययस्य च श्रूयते शब्द इत्यादौ प्रतिपत्त्यनुबन्धिविषयताविशेषार्थकत्वेपि अयमर्थः श्रुतइत्यादौ व्यापारानुबंधिविषयतैवार्थः, उच्यते- उक्त इत्यादौ तादृशविषयतायाः अपिकर्मप्रत्ययार्थतायाः कल्प्तत्वाद्, श्रावणप्रत्यक्षीया नुमित्यात्मकव्या पारविषयतायाश्चार्थे सत्वाच्छ्रुतइत्यादि व्यवहारस्तत्रोपपद्यत इतिनिरस्तं; उपदर्शितानुमिति मादाया तिप्रसंगस्य दुर्वारत्वात् । घटाद्दृष्टोघटइत्याद्य प्रयोगेण विषयमुद्रया हेतुतातोविलक्षणायाएव हेतुतायाः पञ्चम्यर्थतया चैत्रवाक्याच्छ्रुतोयमर्थइयादौश्रवः श्रावणप्रत्यक्षार्थकत्वे श्रावणप्रत्यक्षे वा कर्मस्य विषयत्वेपि तादृलिंगहेतुताविरहेण पंचम्यनुपपत्तिश्च । नच कर्मप्रत्ययार्थघटकज्ञाने वाक्यार्थीनुत्वान्वयबोधेन पंचम्युपपत्तिरितिवाच्यं, तादृशज्ञाने हेतुपञ्चम्यर्थस्यान्वये तादृशज्ञानस्यानुमिति रूपस्य व्याप्यव्या पधीनतया व्याप्तेश्श्रुतइत्यादि व्यवहारापत्तेः । तस्माच्छाब्दोविलक्ष णानुभवएव अर्थःश्रुत इत्यत्र श्रवोर्थइति तत्स्वीकारआवश्यकः । नच तत्स्वी कारेपि श्रावणप्रत्यक्षमेव स्मृणोत्यर्थः, तज्जन्यशाब्दानुभवविषयत्वरूपं

व्यापारानुबन्धिविषयत्वमेव कर्मप्रत्ययार्थोऽस्त्विति वाच्यं; तथासति शाब्दबुद्धेरधिकविषयकतया गुरुशरीरस्य तादृशशाब्दानुभवविषयत्व विषयक शाब्दत्वस्य तत्पदाकांक्षादि ज्ञानकार्यतावच्छेदकतया गौरवप्रसंगात, शाब्दबुद्धावेवधातोरशक्त्यंतरकल्पनौचित्यात् ।

अथास्तु शाब्देविलक्षणानुभवः, सोऽप्यनुमितिविशेष एवेत्यनुमाने शाब्दान्तर्भावः; नच तादृशानुभवेनुमितित्वं न प्रत्यक्षसिद्धं, प्रत्यक्षा न्यानुभवत्वलिंगक तनुमानंचा प्रयोजकमितिवाच्यं, शाब्दानुभवेनुमि तित्वोपगमे समानविषयकप्रत्यक्षसामग्र्या अनुमितौ कल्पतप्रतिबंधक तयैव तादृशसामग्रीकाले शाब्दबोधवारणे शाब्दबुद्धित्वावच्छिन्नं प्रति तादृशसामग्र्याः प्रतिबंधकत्वा कल्पन लाघवोपष्टब्धानुमानादेव शाब्द बोधेनुमितित्वसंभवात् ; नच शाब्दत्वानुमितित्व प्रकारकेच्छयोः पृथ गुत्तेजकत्वानुरोधेन प्रतिबंधकताभेदआवश्यकः, एकत्रैद्विविधेच्छोत्ते जकत्वोपगमे शाब्दत्वप्रकारकेच्छाबलादसत्यां शाब्दसामग्र्यां शाब्दा न्यानुमित्यापत्तेरितिवाच्यं, यत्रविषयें प्रत्यक्षसामग्रीकाले शाब्दत्वप्रका रकेच्छाबशात्र शाब्दबोध स्तादृशानंतविषये शाब्दबोधे तत्समान विषयक प्रत्यक्षसामग्र्याः प्रतिबंधकत्वान्तराकल्पने लाघवस्यानपवा दात् । एवं वैशेषिकमते समानविषयक * ल्पने लाघवमितिचेन्न; शाब्द त्वस्यानुमितित्वव्याप्यत्वे शाब्दसामग्र्या व्याप्त्यादिज्ञान घटिततया गुरु शरीरत्वेन भिन्नविषयक प्रत्यक्षादौ तत्प्रतिबंधकतायामवच्छेदक गौरवात् । लिंगादिभेदेनैकैकविषय एवन्यायमतापेक्षया शाब्दसामग्री बाहुल्येन प्रतिबंधकताबाहुल्याच्च ।

अथ यथान्वयव्यतिरेकि लिंगकानुमित्यो स्सामग्र्योभेदेप्येकजाती यता तथा व्याप्तिज्ञाननिरपेक्षपदज्ञानाद्धि घटितसामग्र्याश्शाब्दानुभव जनकत्वेपि तस्यानुमितिजातीयत्व मविरुद्धमिति वैशेषिकैरपि व्या प्तिज्ञानस्य शाब्दसामग्रीघटकत्वं नोपगंतव्यम्, अन्वयव्यतिरेक

---

* अर्ध कियानपि ग्रंथः पतितः ।

व्याप्तिज्ञानयोः परस्परजन्यानुमितावित्र शाब्दबोधेनुमितित्वस्वीकारेपि तत्रव्याप्तिबुद्धे र्व्यभिचारस्य तदव्यवहितोत्तरत्वस्य तत्कार्यतावच्छेदकत्वेनैव वारणात्, अनुमितित्वावच्छिन्नं प्रत्यभावज्ञानत्वेन व्याप्ति ज्ञानस्य करणत्वा दाकांक्षाज्ञानादिजन्यतावच्छेदकगर्भे नुमितित्वा प्रवेशेपि शाब्दसामग्र्या अभावज्ञानरूपानुमितित्वावच्छिन्न करणघटित त्वेन तज्जन्यबोधस्यानुमितित्वोपपत्तेः । नच पक्षतायाश्शाब्दबोधे व्यभिचारवारणाय पक्षता जन्यता वच्छेदककोटौ शाब्दान्यत्वं वैशेषिकैः प्रवेश्यमितितन्मते गौरवमितिवाच्यं, तल्लिंगकेच्छाविरहविशिष्टसिद्धय भावरूपाया: पक्षताया अन्यलिंगकानुमितौ लिंगानुपधानमते व्यभिचार वारणाय जन्यतावच्छेदककोटा वव्यवहितोत्तरत्व संबंधेन तादृशा भावविशिष्टसिद्धय च्छिन्नभेदस्यावश्यं निवेश्यतया शाब्दबोधेपि तत एव व्यभिचारवारणात । परामर्शाजन्यज्ञानेऽनुमितित्व मपसिद्धांतभये नाभ्युपगमानर्हमितिचेन्न;- पक्षताया अजन्येनुमितित्ववादिनां परामर्शाज न्येनुमितित्वमपि नापसिद्धांतः । एतेन यादृशसंसर्गेण यादृशप दार्थस्य क्वचिदपि न निश्चयः एवं तत्संबंधावच्छिन्न तदभाव स्यापि न क्वचिन्निश्चयः तादृशपदार्थस्य तत्संसर्गविषयकबोधो नानुमाना न्निर्वहति, अन्वयव्यतिरेक दृष्टांतविरहेण व्याप्त्यवधार णासंभवात; नच सामान्यव्याप्त्या अप्रसिद्धस्यापिसिद्धे रुक्तावा न्नैवमिति वाच्यम्, प्रकृतसाध्यव्याप्तेः प्रकृतहेतौ विशिष्टपरामर्शासम्भवे नानुमिते रनिर्वाहादिति परास्तम् ।

मैवं, व्याप्तिज्ञाननिरपेक्ष शाब्दजातीयबोधस्वीकारेपि बाधकाभा वात्, अनुमितिरेव तादृशविशेषत्वं किं न स्वीक्रियत इत्यत्र विनिगमक स्याति दुर्लभत्वात । तथासत्यपि समानविषयक प्रत्यक्षसामग्र्या एकैक प्रतिबन्धकतानिर्वाहेण दर्शितलाघवाक्षतेः । पदज्ञानस्यापि शाब्दबोधे पदविषयकत्वमनिवेश्य ज्ञानत्वादिना कारणतासम्भवात । एकैकविध शाब्दप्रयोजकानुपूर्वी विशेषरूपाकांक्षादीना मननुगततया

तज्ज्ञानजन्यतावच्छेदके तदव्यवहितोत्तरत्वस्यावश्यं निवेशनीयतया नुमितौ तद्व्यभिचारानवकाशात् । एकैकपदार्थेपरपदार्थरूपयोग्यतायां एकैकविधतया एकैकविधशाब्दधीप्रयोजकतया तज्ज्ञानजन्यतावच्छेदके तज्ज्ञानाव्यवहितोत्तरत्वनिवेशनं नोभयोरावश्यकमिति वाच्यम्, बाध निश्चयाभावस्य कल्पनहेतुतयैव निर्वाहे योग्यताज्ञानहेतुतायां एव शाब्द बुद्धावसिद्धः । प्राचीनैरनुमितावपि संशयसाधारणविशेषण संसर्ग ज्ञानहेतुतास्वीकारा योग्यताज्ञानस्यानुमितौ व्यभिचारानवकाशाच्च । अनुमितेश्शाब्दधीविशेषत्वमतेनुमिनोमीत्यनुव्यवसायस्थाने शृणोमीत्य नुव्यवसायवारणमपि शाब्दबुद्धेरनुमितिविशेषत्वे शृणोमीत्यनुव्यव सायस्थाने ऽनुमिनोमीत्यनुव्यवसायरीत्यैव सम्भवति । अनुमितित्वस्य शाब्दत्वव्याप्यत्वे पदज्ञानघटितसमानविषयक विशेषसामग्रीकालेनु मितिवारणाय तत्र तादृशसामग्र्याः प्रतिबन्धकत्व कल्पनाधिक्यमिति चेत्; शाब्दत्वस्यानुमितित्व व्याप्यतामतेपि समानविषयेनुमितौ विशिष्ट परामर्शादिसत्वे शाब्दबोधवारणाय तत्र परामर्शादिघटित सामग्र्याः प्रतिबन्धकताधिक्यम् । तत्रशाब्दबोधात्मकानुमितेरेतन्मतेभ्युपगमे विपरीतमते प्युक्तस्थलेनुमित्यात्मक शाब्दस्वीकारस्संभवतीति न सामग्रीप्रतिबंधकताधिक्यम् । एतन्मते तत्रानुमित्यात्मक शाब्दबो धस्वीकारे नुमिनोमीत्यनुव्यवसायापत्तिस्तु न, शाब्दत्वस्यानुमितित्व व्याप्यतामते प्यनुमितित्वाविशिष्टानुमिति सामग्र्यादशायां शाब्दात्म कानुमिति स्वीकारे शृणोमीत्यनुव्यवसायापत्ति संभवादित्यलमति विस्तरेण ।

मीमांसकमते उक्तयुक्तिभिश्शाब्दानुभवो नुमिति भिन्नजातीयएव, तत्सामग्र्याऽऽकांक्षाज्ञानघटितादिलक्षणी । किंतु लौकिकशाब्देन प्रमाणं, तज्जन्यशाब्दबोधपूर्वं मनुमानेन तद्विषयकवाक्यार्थग्रहा तादृशशाब्दबो धस्य गृहीतग्राहित्वेनानुवादरूपत्वा दगृहीतग्राहिणएवज्ञानस्य प्रमा त्वात् । नचैवमनुमितेः परामर्शगृहीत साध्यंपक्षादिमात्र ग्राहित्वात्प्र

जरन्मीमांसकास्तु – लोके वक्तृज्ञानानुमाना
त्तदुपजीविसंसर्गानुमानाद्वा

मात्वानुपपत्तिरितिवाच्यम्, स्वान्यूनाकार स्वपूर्ववर्तिस्वसमानाधिकरणं निश्चयकं यत्तदन्यत्वमगृहीतग्राहित्वमेव प्रमालक्षणमिति परामर्शस्यानुमिति विषयसाध्यतावच्छेदकावच्छिन्न विशिष्टपक्षतावच्छेदकावच्छिन्ना विषयकत्वेनानुमिति विषयसकलवस्तु विषयकत्वेपि तदन्यूनाकारतावि रहेणानुमितेः प्रमात्वोपपत्तेः । प्रमाणंतु वेदरूपशब्दएव, तत्प्रतिपाद्यो यादृशविशिष्टार्थ स्तस्य शब्दशब्दोपजीविप्रमाणभिन्न प्रमाणागम्यत्वेन वेदजन्यशाब्दबोधात्पूर्वं प्रमाणान्तरेणाग्रहणात् । लोकेत्वनुमानाधीन वाक्यार्थज्ञानस्य शाब्दबोधसामग्रीसमवधाने नपेक्षितत्वेपि स्वसामग्री वशादेवनियमतो वाक्यार्थगोचरानुमिति श्शाब्दबोधात्पूर्वं जायतइति प्राचोमीमांसकावदंति । गुरवस्तुविशिष्टवाक्यार्थज्ञानं विनाशाब्दबोध सामग्रयेव दुर्घटेति यथार्थतात्पर्यज्ञानस्य शाब्दबोधकारणताव्यवस्थापने नैवोपपादयन्ति । तन्नायासेन जरन्मीमांसक मतनिराकरणसम्भवा त्तदेव मतमादावुपन्यस्यति (जरदिति) " लोके " - लौकिकवाक्य श्रवणस्थले (वक्तृज्ञानानुमानादिति) अयं वक्ता प्रकृतवाक्यार्थ गोचर यथार्थज्ञानवान्, भ्रमाद्यजन्ये तद्वाक्यप्रयोक्तृत्वादित्येतादृशानुमाना दित्यर्थः (वाक्यार्थसिद्धाविति) अनेनसाध्ये याथार्थ्यघटकतयैक पदार्थे परपदार्थसंसर्गसिद्धावि-युक्तम् । तद्वद्विशेष्यक तद्वत्वावगाहित्व रूपयाथार्थ्यशरीरे एकपदार्थधर्मितावच्छेदकतया पदार्थतावच्छेदकां तरप्रवेशा देकपदार्थतावच्छेदकावच्छिन्न संसृष्टापरपदार्थतावच्छेदक वच्छिन्न रूपवाक्यार्थस्य याथार्थ्यभाने नियमतो भानानिर्वाह इत्यत आह (तदुपजीवि संसर्गानुमानाद्वेति) तादृशवक्तृज्ञानमनुमानोपजीवि न एतत्पदार्थं स्वत्पदार्थसंसर्गी तत्प्रकारक यथार्थज्ञानविशेष्यत्वादित्यतः

वाक्यार्थसिद्धौ शब्दस्यानुवादकत्वं, वेदेतु तदभावा त्स्वातन्त्र्येण प्रामाण्यमिति वदन्ति; तच्च, वेदे कल्पित सामग्रीतो लोकेपि संसर्ग प्रत्ययात् । अन्यथानुवादकतापि नस्यात् ।

पदार्थपक्षक पदार्थान्तरसंसर्ग साध्यकानुमानान्तराद्वेत्यर्थः । " वाक्यार्थ सिद्धौ "- विशिष्टानुभवग्राह्यवाक्यार्थस्य निश्चये । " शब्दस्य " - लौकिकवाक्यस्य । " अनुवादकत्वं " - प्रमाणान्तरगृहीतग्राहिज्ञान जनकत्वम् । नत्वगृहीतग्राहिजनकत्वरूपं प्रामाण्यमिति शेषः । " तद भावात् "- अपौरुषेयतया वक्तु रभावात् वक्तृ वाक्यर्थज्ञानानुमाना धीनवाक्यार्थ सिद्ध्यभावात् । " स्वातन्त्र्येण " - अगृहीतग्राह्य नुभवजनकत्वेन (वेदेकल्पितसामग्रीवदिति) वेदजन्यशाब्दबोधे यादृश्या कांक्षादि ज्ञानघटिता सामग्री कल्पना तादृशसामग्रीत इत्यर्थः । " संसर्ग प्रत्ययात् "- पदार्थद्वयसंसर्गविषयक वेदजन्यबोधाविजातिय संसर्ग बोधस्यानुमानिक वाक्यार्थनिश्चयं विनैवोपपत्तेरित्यर्थः । वेदवत्प्रामाण्य स्यावश्यकत्वादितिशेषः । ननु लोकवेदयो नैकाशाब्दानुभव सामग्री, वाक्यानुपूर्वीभेदेनाकांक्षाभेदात , तथाच लौकिकवाक्य स्थलीयाकांक्षाज्ञानादे स्संसर्गबोधसामग्रीत्वमेव न कल्प्यतइति कथं लौ-किकवाक्यस्य प्रामाण्यमित्यतआह (अन्यथेति) लौकिकवाक्येआकां क्षादिज्ञानघटितायां स्सामग्र्या अकल्पनइत्यर्थः । " अनुवादकता "- गृहीतग्राह्यनुभव जनकता । तथाचं लौकिकवाक्यादपि शाब्दानुभ वस्यानुभवानुरोधेन परैरपि स्वीकरणीयतया देवामपिलोकस्थले शाब्दा नुभवसामग्रीकल्पनमावश्यकमितिभावः । ननु शाब्दानुभवानुरोधेन पद आकांक्षादिमत्त्वज्ञानस्यावश्यकतया पदार्थसंसर्गानुमापकतादृश पद स्मारितत्वरूपलिंगस्य पदार्थज्ञानमावश्यक मित्यनुधितिसामग्रीसाधेन

लिंगस्य पूर्वत्वेपि व्याप्तिस्मृतिविळम्बेन तद्वि
ळम्बात् । अनाप्तोक्तौ व्यभिचारा द्वेदतुल्यापि
सामग्री न निश्चायिकेतिचेन्न;—चक्षुरादे स्तथात्वे-
न तच्छंकायामपि प्रमापकत्वात् ।

तत्संसर्गानुमिति श्शाब्दबोधात्पूर्वं नियमतोभविष्यति; नच तल्लिंगजा नघटितानुमितिसामग्रीकाले पदाकांक्षादिमत्वज्ञानसत्वेन शाब्दसाम ग्र्याआपत्तत्वेन तस्यास्समाने विषयेनुमितिसामग्र्यपेक्षया बलवत्वेना नुमितेरवनभवितु महतीतिवाच्यम् . शाब्दबोधे आकांक्षादि मत्पदज्ञान जन्यपदार्थोपस्थिते र्हेतुतया तद्विळंबेन तादृशशब्दस्यानुवादकत्वस्य दुर्वारत्वादित्यतआह (लिंगस्य पूर्वत्वेपीति) पक्षेलिंगतावच्छेदक प्रका रेणलिंगस्य निश्चितत्वेपीत्यर्थः (व्याप्तिस्मृति विळंबेनेति) उद्बोधक समवधानानियमेन तद्विरहस्थळे व्याप्तिस्मृत्यसभवेनेत्यर्थः । " तद्वि ळबात् "- अनुमानविळबात, शाब्दबोध पूर्वकालेनुमित्यनियमादिति यावत । शंकते (अनाप्तोक्ताविति) अनाप्तोक्तवाक्यइत्यर्थः । " व्यभि चारात् "- अप्रामाण्यदर्शनात (न निश्चायिकेति) न निश्चयं जन यितुं समर्थेत्यर्थः । सर्वत्रैव लौकिकवाक्ये भ्रमजनकत्वसद्दचारिता कांक्षादिं मद्वाक्यत्वरूप धर्मदर्शनेन तत्संशयसंभवा त्तस्य च फलीभू तानिश्चय प्रतिबंधकत्वादितिभावः । एवंच लौकिकवाक्ये भ्रमजनकत्व संशयनिवृत्यर्थमाप्तोक्तत्व निश्चयस्स्वीकरणीयः, तस्य च वाक्यार्थनिश्चय रूपतया तत्पूर्वकस्य शाब्दबोधस्य लोकस्थळे गृहीतग्राहित्व नियमइति शंकितुराशयः । निश्चयसामान्ये यथप्रामाण्यसंशयस्य विरोधितोपे यते तदादोषमाह (चक्षुरादेरिति) "तथात्वेन"-दोषसमवधानदशायां भ्रमजनकत्वेन । "तच्छंकायामपि"-चक्षुष्टादिरूपसाधर्म्य दर्शनेना प्रा- माण्यशंकायामपि । " प्रमापकत्वात् " - प्रत्यक्षनिश्चयजनकत्वात् ।

ज्ञायमानं करणं सन्देहे न निश्चायकं, लिंगवादिति चेन्न;— संशयोहि न वाक्ये, तस्य निश्चयात् ।

तथाच व्यभिचारेणाप्रामाण्यसंशयो नप्रतिबंधक इतिभावः । ननु अप्रामाण्यसंशयाभावस्य निश्चयसामान्ये हेतुत्वासंभवेना ऽप्रामाण्यसंशयस्य प्रतिबंधकत्वासंभवेपि ज्ञायमानकरणकनिश्चये प्रामाण्यसंशयस्य प्रतिबंधकत्वं संभवतीति शब्दोनतत्संशयदशायां निश्चायकः, ज्ञायमानकरणत्वात् . व्यभिचारादिसंशयद्दशायां लिंगमिवेत्याशंकते(ज्ञायमानमिति)यत्र निश्चये ज्ञायमानत्वेनयत्करणं तत्संदेहदशायां न तन्निश्चयजनकमित्यर्थः । (लिंगवदिति) यथानुमित्यात्मक साध्यनिश्चयकरणभूतं लिंगव्याप्त्यादि संदेहदशायां साध्यानिश्चायकमित्यर्थः । एतन्निश्चयं संशयसामान्यनिवेशो न संभवति, घटादिसंदेहदशायां धूमादेर्वह्न्यादिबोधकशब्दस्य च तन्निश्चायकत्वात् । अतः करणधर्मिकसंशयविशेषो निवेश्यः। तत्रच करणतावच्छेदकस्य ज्ञायमानत्वस्य धर्मितावच्छेदकतया यद्रूपंतथा तत्संशयनिवेशस्संभवति, व्याप्त्यादे स्तथानुमिति करणतावच्छेदकत्वात्, लिंगेतत्संशयदशायां तस्यानुमापकत्वात्, अतश्शब्दस्य तादृशरूपाकांक्षादिसंशयोपि न, वाक्येतस्य निश्चयात्, शब्दत्वरूपधर्म संशयदशायामनिश्चायकत्वमिष्टमेव, आप्तोक्तत्वं गौरवान्नकरणतावच्छेदक, मितितादृशसंशयान्तर्भावेन नियमपक्षंदूषयति (संशयोहीति) प्रकृतसाध्यघटकइत्यादिः (न वाक्यइति) वाक्यत्वपरम् । तथाच शब्दरूपे धर्मिण्याकांक्षादिमच्छब्दत्वरूपवाक्यत्वं कोटिक इत्यर्थः । "तस्य"- तादृशवाक्यत्वस्य । "निश्चयात्"- शाब्दनिश्चयपूर्वं वाक्येनिश्चितत्वादित्यर्थः । तथाच वाक्यत्वस्य शब्दे संशयकाले अनिश्चायकत्वसाधने सिद्धसाधनमितिभावः । यद्यप्याप्तोक्तत्वनिश्चयस्या प्रामाण्यसंशयनिवृत्त्यर्थमपेक्षाया एवशंकितुरभिप्रेतत्वा द्वाक्यत्वसंशयघटितनिय

न तज्जन्यज्ञानप्रामाण्ये, तस्य तदुत्तरकालीन त्वात् । नाप्तोक्तत्वे, तन्निश्चयस्यां नंगत्वात् ।

मनिराकरणमफलं, तथाप्यनभिप्रेतार्थं मादायापि सामान्यशब्दार्थावित कैण तत्पक्षदूषणं संगच्छते । फलीभूतज्ञानधर्मिक प्रामाण्यसंदेहस्य करणे प्रमाकरणत्व संशयपर्यवसायिनः निश्चयविरोधित्वे आप्तोक्तत्व निश्चयापेक्षाया आवश्यकत्वा त्तादृशसंशयांतर्भावेण नियमपक्षं दूषयति (तज्जन्यज्ञान प्रामाण्यइति) स्वजन्यज्ञानधर्मिक प्रामाण्यकोटिक इत्यर्थः। प्रकृतसाध्यघटकसंशयइत्यनुषज्यते । " तस्य " -ज्ञानप्रामाण्यसंशयस्य । "उत्तरकालीनत्वात्" -ज्ञानरूपधर्मिज्ञाने सत्येव तदुत्पत्तेरौत्सर्गिकत्वात् । तथाच तत्संशयस्य निश्चयविरोधित्वपि शाब्दनिश्चयपूर्वकाले तत्सामग्र्य नियमेन तदनावश्यकत्वात् सर्वत्र तन्निवर्तकाप्तोक्तत्व निश्चयानपेक्षया नतो केशाब्दनिश्चयस्य गृहीतग्राहित्वमितिभावः । प्रामाण्यसंशयस्य ज्ञायमान करणजन्य निश्चयप्रतिबन्धकत्वाभ्युपगमेनैत दुक्तम् । वस्तुत स्तादृशसं शयस्य ग्राह्यसंशयपर्यवसितस्य ग्राह्यसंशयवत्परोक्ष निश्चयाविरोधित्वमे वेतियन्निश्चयः स्वकारणकनिश्चया (?) तत्संदेहघटितनियमबला दाप्तोक्त त्वसंदेहस्य शाब्दनिश्चय हेतुत्वस्यैवानुपगमादित्यर्थः । तन्निश्चयस्य हेतुत्वो पगमे 'तत एवशब्दस्यानुवादकतासिद्धेः प्रयासवैफल्यं, तदनुपगमे च यन्निश्चयइत्यादौ यत्पदेनाप्तोक्तत्वोपादानासंभवा तत्संशयस्य शाब्दबोधविरोधिता नोक्तनियमात्सिद्धयतीतिभावः । ननु - उक्तनियम बलादाप्तोक्तत्वसंशय विरोधिता तद्बला त्तन्निश्चय हेतुताच मास्तीत्, तथा प्याप्तोक्तत्वसंशयकाले शाब्दबोधानुत्पादस्यानुभाविकतया तन्निर्वा हायाप्तोक्तत्वनिश्चयस्य शाब्दबोधेपि हेतुत्वं दुर्वारमेवेति तत्पूर्व वाक्यार्थ

(?) अत्र काश्चनपङ्क्तयः पतिताः ।

ननु- लोके आप्तोक्तत्वसन्देहे वाक्यार्थधीर्नेति तन्निश्चयो हेतुः; तथा च वाक्यार्थगोचर यथार्थज्ञानजन्यत्व ग्राहका त्तदुपजीविनो

निश्चयस्यावश्यकेतेति शंकते(नन्विति)"लोके"-लौकिकवाक्ये । " सन्देहे"-सन्देहदशायां । "तन्निश्चयः"-आप्तोक्तत्वनिश्चयः । "हेतुः" शाब्दबोधकारणं । वाक्यइतिशेषः । तथापि कथमनुवादकता शब्दस्येत्याकांक्षायां शाब्दबोधात्पूर्वं वाक्यार्थज्ञानस्य नियमेनसत्त्वमुपपादयितु माप्तोक्तत्वस्य प्रकृतवाक्यार्थघटितत्वं प्रदर्शयन्नाप्तोक्तत्वग्रहस्यैव वाक्यार्थज्ञानत्वमाह (तथाचेति) आप्तोक्तत्वग्रहस्य शाब्दधीहेतुत्वे चेत्यर्थः । (वाक्यार्थ गोचर यथार्थ ज्ञानेति) वस्तुगत्यैकपदार्थ संसृष्टो यो परपदार्थ स्तद्गोचरज्ञानेत्यर्थः (ग्राहकादिति)तज्ज्ञानजनकादित्यर्थः । वाक्यार्थधीरित्यनेनान्वयः । शाब्दबोधात् प्राङ्नियमतइति पूर्वं पूरणीयं । वाक्यार्थज्ञानंविना वाक्यार्थघटित निरुक्ताप्तोक्तत्वस्य दुर्ग्रहतया प्तोक्तत्वग्रहा त्पूर्वमनुमानांतरादेकपदार्थे परपदार्थ संसर्ग ज्ञानमाव श्यकं, तदादायापि शाब्दबोधेगृहीतग्राहित्वमक्षतमित्याह (तदुपजीविन इति)बहुव्रीहिणा तदुपजीव्यादनुमानांतराद्धेत्यर्थः । आप्तोक्तत्वग्रहे वाक्यार्थज्ञानानुमानांतर मनपेक्ष्यैव शाब्दबोधसंभवा त्तदुपजीवकानुमानांतराद्धेति यथाश्रुतार्थासंगतेः । वस्तुतो यथार्थज्ञानवदुक्तत्व रूपाप्तोक्तत्वानुमानानंतरं तदधीनसंसर्गानुमानं नियमतोभवतीत्यभिमानिनं वादिशानुमानपरैव तदुपजीविन इत्यादि फक्किका, अतएव वेदस्थले नाप्तोक्तत्वशंकाविरोध्य• पौरुषेयत्व निश्चयाधीन संसर्गानुमानमादायानुवाद कत्व प्रतिबन्दिप्रदर्शनमप्येतनं संगच्छते, उभयत्र संसर्गानुमानस्यै वावश्यकतया तुल्यत्वात् ।

नुमाना द्वाक्यार्थधीरितिचेन्न;- वेदे तंद्रहितस्यापि सामर्थ्यावधारणात् , तदनिश्चयेपि वेदानुकारेण पठ्यमान मन्वादि वाक्ये ऽपौरुषेयत्वाभिमानिनो गौडमीमांसकस्यार्थ निश्चयात् ।

यद्यपि आप्तोक्तत्वशरीर घटकयाथार्थ्यग्रहस्य विशेषणांशे सधर्मितावच्छेदकक्तत्वानियमा द्विशेषणसंसर्गांशे सधर्मितावच्छेदक कस्य शाब्दवाक्यार्थबोधस्य नियमेन गृहीतग्राहित्वानिर्वाहः, तदुपजीवक संसर्गानुमानं च शाब्दबोधानुपयोगितयानावश्यकमेव; एवं विशेषणांशे निर्धमितावच्छेदकक आप्तोक्तत्वग्रहेपि न नियमस्तादृश सधर्मितावच्छे दककवाक्यार्थग्रहापेक्षेत्याप्तोक्तत्व ग्रहोपजाव्यनुमानांतरमादायापिन शब्दप्रामाण्यभंगः ; नचाप्तोक्तत्व ग्रहापेक्षणीयानुमानस्य विशेषण संसर्गांशे निर्धमितावच्छेदकक संसर्गज्ञानजनकत्वमसंभवि, अनुमिते रसाध्यांशे पक्षतावच्छेदक धर्मितावच्छेदकक्तत्व नियमादितिवाच्यम्, तथापि विशिष्य पदोपस्थाप्यतावच्छेदकावच्छिन्न पक्षकानुमान विनाप्ये कपदार्थसंसर्गितया वक्तृज्ञानविशेष्य एतत्पदार्थसंसर्गवान् अभ्रांतपु रुषीय तत्पदार्थसंसर्ग ज्ञानविषेष्यत्वादित्यनुमानतोपि वाक्येदार्थिता प्तोक्तत्व ज्ञानसंभवादिति; तथाप्याप्तोक्तत्व ज्ञानहेतुतामेवासह मानस्तामेव खण्डयितुं प्रथमतोवेदजन्य बोधसाधारण शाब्दत्वाव च्छिन्नं प्रतितद्धेतुतां व्यभिचारेण निरस्यति (वेदइति) वेदान्त गतस्य वाक्यस्याप्तोक्तत्व ग्रहविषयत्वारहितस्यापि मीमांसकादि शाब्दबो धजनकत्वदर्शनादित्यर्थः । लौकिकवाक्यजन्य शाब्दत्वावच्छिन्न हेतुतायां नास्य व्यभिचारस्य विरोधितेत्यालोच्य लौकिकमन्वादिवाक्यजन्यबोध व्यभिचारमाह (तदनिश्चयेपीति) आप्तोक्तत्वानिश्चयेपीत्यर्थः । " गौड मीमांसकस्यार्थनिश्चया " दित्यग्रिमेणान्वयः । मन्वादिवाक्य

नचासौ भ्रांतिः, बाधकाभावात् । पौरुषेयत्व निश्चयदशायांमपि तस्य तथात्वात् । नचा संसर्गाग्रहमात्रं तत्,

---

तेगौडमीमांसकस्य शाब्दवाक्यार्थनिश्चयादित्यर्थः । वाक्यार्थ निश्चयात्पूर्व मामोक्तत्वनिश्चयाभाव साधक ' मपौरुषेयत्वाभि मानिन ' इत्यन्त विशेषणम् । अपौरुषेयत्व मवक्तृकत्वम्, तन्निश्चयो विपरीतनिश्चय विषयामोक्तत्वरूप सवक्तृकत्व विशेषग्रहविरोधित्वा त्तदग्रहसम्पादकः । अपौरुषेयत्व भ्रमनिर्वाहकं मन्वादिवाक्येषु वेदा नुकारेण पठ्यमानत्वविशेषणम् । वेदस्येव स्वरविशेषेणमन्वादिवाक्ये पठ्यमाने तत्र वेदत्वभ्रमा द्वेदाभिज्ञाप्या पौरुषेयत्वाभिमान निर्वाहः । दाक्षिणात्य मीमांसकस्याधीतवेदतया तत्र वेदत्वभ्रमासम्भवात् ' गौड'ति मीमांसकविशेषणम् । मीमांसकत्वं च वेदेष्वपौरुषेयत्व निश्चयोपयो-गीत्युपात्तम् । ननु मन्वादिवाक्ये ष्वपौरुषेयत्वभ्रमवत स्तदर्थानार्थ निश्चयोपि भ्रमरूपएव, अतो नोक्तव्यभिचारावकाशः, प्रमात्वस्यैवां मोक्तत्वनिश्चयजन्यतावच्छेदकतायाः स्वीकरणीयत्वा दित्याशंकान्नि रस्यति (नचेति) "असौ"- उक्तार्थनिश्चयः (बाधकाभावभ्रमेति) विषयबाध विरहादित्यर्थः । ननु व्यभिचारवारणाय तादृशनिश्चये बाधितजातीय बाधितव्यक्तिविषयकत्व मेवोपगन्तव्यमिति शंकान्नि रस्यति (पौरुषेयत्व निश्चयेति) आप्तोक्तित्व निश्चयेत्यर्थः । "तस्य"- प्रमारूप तद्वाक्यार्थीनार्थ निश्चयस्य । "तथात्वात्" -अपौरुषेयत्वा भिमानकालीन तद्वाक्यजन्यार्थ भ्रमत्वमानविषयकत्वेनानुभवात् । तथाच प्रमात्वस्यैव तस्य बाधितविषयकत्वोपगमासम्भव इति भावः (असं सर्गाग्रहमात्रमिति) अगृहीतासंसर्गक धर्मधर्मिविषयक स्मरणरूपम्, नतु पदार्थैक्य संसर्गानुभवरूपमित्यर्थः । "तत" - तादृश गौड

अर्थस्य तथाभावेप्यसंसर्गाग्रहत्वे संसर्गोच्छेदा
पत्तेः। नचाप्तोक्तत्वनिश्चय रूपकारणबाधा त्संसर्ग
ज्ञानबाधः, व्यभिचारेण हेतुताया एव बाधात् ।
लौकिकत्वेन ज्ञाते तदङ्गमितिचेन्न;—मानाभावात्।

मीमांसकज्ञानम् । तथा च न तत्र व्यभिचार इति भावः । " अर्थस्य "- वाक्यार्थस्य । "'तथाभावेपि "- अबाधितत्वेपि । " असंसर्गाग्रहत्वे "- उक्तासंसर्गाग्रहत्वमात्रोपगमे । " संसर्गग्रहोच्छेदापत्तेः " - शब्दस्य संसर्गानुभावकत्वोच्छेदापत्तेरित्यर्थः । संसर्गानुभावकत्वमन्तरेणाप्य संसर्गाग्रहा त्प्रवृत्त्याद्युपपत्तेरिति भावः । अनुवादकत्वमपि शब्दस्यन स्यादिति शेषः । ननूक्तकारणबाधेन प्रकृतसंसर्गग्रहासम्भवेना वा संसर्गाग्रहमात्र मुपेयते, संसर्गग्रहसम्भवेतु नतत्परित्याग इत्याशंका निरस्यति (नचेति) " संसर्गज्ञानबाधः "- संसर्गग्रहा सम्भवः (-व्यभिचारेणेति) उक्तस्थले संसर्गज्ञानस्य सविवादत्वेपि व्यभिचार सन्देहेनेत्यर्थः (हेतुतायाएव बाधादिति) शाब्दबोधे आप्तोक्तत्व हेतुताया एवासिद्धेरित्यर्थः । तथा च तस्य हेतुतासिद्धौ उक्तस्थले तदभावेन संसर्गग्रह रूपकार्याभावसिद्धिः, तत्सिद्धौ च तत्र व्यभिचार शंकानिरासेन तद्धेतुतासिद्धिरित्यन्योन्याश्रय इति भावः । लौकिक वाक्यजन्यशाब्दत्व रूपकार्यतावच्छेदक गर्भे लौकिकस्थले तत्त्वेन ज्ञायमानत्व " निवेशा व्यभिचारः, उक्तमन्वादिवाक्यस्या पौरुषेयस्व भ्रमविषयतया पौरुषेयत्वरूप लौकिकज्ञानाविषयत्वा दित्याशंकते (लौकिकत्वेनेति) " ज्ञाते " - वाक्ये । " तत् " - आप्तोक्तत्वम् । " अंग "- सहकारि ज्ञानविषयः (इतीति) न व्यभिचार इति शेषः । " मानाभावात् " - उक्तक्रमेण व्यभिचारवारणसम्भवे प्याप्तोक्तत्व

वाक्यार्थस्या पूर्वत्वेन लिंगाभावेन तद्ग्रहासम्भवात् । नन्वनाप्तोक्तत्व शङ्काव्युदासोऽङ्गं, सच वेदेऽपौरुषेयत्व निश्चयात्, लोकेचाप्तोक्तत्वावधारणादितिचेन्न;— तस्याशक्यत्वात् ।

निश्चयहेतुताया अप्रामाणिकत्वादिति भावः । नन्वन्वय व्यतिरेकानुविधानमेव तद्धेतुतायां मानमित्याशंक्य तदेवनेत्याह (वाक्यार्थस्येति) आप्तोक्तत्व घटकस्य प्रकृतवाक्यार्थस्येत्यर्थः । " अपूर्वत्वेन "— नियतपूर्व प्रतीतिकत्वाभावेन । " लिंगाभावात् " - साध्याप्रसिद्धया लिंगत्वाग्रहात्, व्याप्तिग्रहासम्भवादित्यर्थः । तथा च नियतान्वयव्यतिरेकानुविधानग्रहएवासम्भवीत्यर्थः । ननु माभूदाप्तोक्तत्वनिश्चय शाब्दबोधेकारणम्, तथाप्य नाप्तोक्तत्वशंकायां नशाब्दबोधइत्युक्तत्वा त्तन्निवर्तनार्थं माप्तोक्तत्वनिश्चयो भवतापि लौकिकस्थलेवश्योपेगन्तव्यः, तत्र तच्छंकाया निवर्तकान्तराभावादित्याशंकते (नन्विति) (सचेति) तच्छंकाव्युदासश्चेत्यर्थः (आप्तोक्तत्वावधारणादिति) यद्यप्य पौरुषेयत्वाभिमान विषय लौकिकवाक्ये तादृशाभिमानादेवा नाप्तोक्तत्वशंका निरास सम्भवस्त त्तजन्यबोधे आप्तोक्तत्वग्रहानपेक्षया तस्य प्रामाण्यमनपवादमेव, तथापि लौकिकत्वेन ज्ञायमानवाक्यस्य प्रामाण्यासम्भवान्नैयायिकाना मभिमतसिद्धिः, तादृशवाक्यस्यानुवादकतयैव च परेषामभिमतसिद्धि रिति भावः (तस्या शक्यत्वादिति) आप्तोक्तत्वनिश्चयस्य शाब्दबोध पूर्वमशक्यताया उक्तत्वादित्यर्थः । तथाच नाप्तोक्तत्वशंकासत्त्वेपि शाब्दबोधस्स्वीकरणीयः, एवं यत्र स्वतस्सिद्ध एतच्छंकाविरह स्तत्रा प्तोक्तत्वनिश्चयानपेक्षया लौकिकत्वेन ज्ञातस्यापि वाक्यस्य प्रामाण्यं निष्प्रत्यूहमिति भावः । यदि च अनाप्तोक्तत्वशंका व्युदासार्थं लौकिक वाक्ये तन्निवर्तकस्या प्तोक्तत्वनिश्चयस्य नियतापेक्षा तदावेदस्थलेपि

यदि चापौरुषेयत्व निश्चये सत्येव वेदा दर्थप्रत्यय स्तदा दोषवत्पुरुषाप्रणीतत्वे सत्या कांक्षादिम त्पदस्मारितत्वेन वेदे पदार्थ संसर्गासिद्धि रस्तित्वति वेदोप्यनुवादकस्स्यात् । तदुक्तं -"व्यस्तपुन्दूषणा शङ्कैस्स्मारितत्वात्पदैरमी । अन्विता इतिनिर्णीते वेदस्यापि न तत्कृतः ॥ "

तच्छंकानिवर्तका पौरुषेयत्वनिश्चयस्य नियतापेक्षतया तत्राप्यानुमानिक पदार्थसंसर्गधीसम्भवेन वेदोप्यनुवादकस्स्यादित्याह (यदिचेति) (दोषवदिति) दोषवत्पुरुषाप्रणीतत्वे सत्याकांक्षादिमत्पदं तत्स्मारि तत्वेन हेतुनेत्यर्थः । बाधकमानाभावरूपयोग्यताया स्सर्वत्रदुर्निश्चयत्वा द्धेतौ प्रवेशासम्भवेन तद्भर्महेतोरदोग्ये व्यभिचारवारणाय सत्यन्तं दोषवदनुक्तत्वे सतीत्यर्थकम् । यद्यपि वेदस्थले पुरुषाप्रणीतत्वस्य पदविशेषणत्वेनैवोपपत्तिः, तथापि पुरुषे दोषवत्त्वविशेषणं लोक वेदसा-धारणेक हेत्वभिप्रायेण (तदुक्तमिति) आचार्यैरिति शेषः (व्यस्तेति) " दूषणाशंका " - वक्तृदोषाशंका, दोषवत्पुरुषाशंकेति यावत , सा, " व्यस्ता "- निरस्ता, यै स्तादृशैः, तादृशाशंका शून्यैः पदैरिति यावत् । पदानां तादृशाशंकाशून्यत्व कथनेन तेषु तच्छंकानिवर्तक तादृशपुरुषानुक्तत्व ज्ञानविषयत्वं सूचितम् । तावता तदप्रणीतत्व विशेष णावच्छिन्न पदस्य हेतु घटकतालाभः । तथा च तादृशपदस्मारितत्वा द्धेतोः । " अमी "- पदार्थाः । " अन्विताः "- संसृष्टाः । " इति निर्णीते " - शाब्दबोधात्पूर्व मेतादृशानुमित्यात्मक निश्चयेसम्भवति (वेदस्येति) " तत् "- अनुवादकत्वम् । न कृतइत्यर्थः । तथा च अनाप्तोक्तत्वशंकाया यत्र कारणान्तराभावेनासम्भव स्तत्रापौरुषेयत्व निश्चयादिकं विनैव संसर्गधीर्वेदादिति तत्प्रामाण्यव त्तल्यन्यायेन लोक

नचैवं शब्दस्य प्रमाणत्व मपि, अनुमानादेव वाक्यार्थ प्रतीतेरिति ।

प्राभाकरास्तु—व्यभिचारि [शब्द] व्यावृत्त

स्थले प्याप्तोक्तत्व निश्चयापेक्षाया अनैयत्येन प्रामाण्यं निष्प्रत्यूहमित्या शयः । वेदस्थले सर्वत्रा पौरुषेयत्वनिश्चयापेक्षायां शाब्दानुभवमन्तरे णैव प्रवृत्त्यादिनिर्वाहा त्तादृशविलक्षणानुभवोपि नासिद्ध्येदित्याह (नचै वमिति) " प्रमाणत्वमपि "- स्वातन्त्र्येणानुभवकरणत्वमपि । निर्वहे दिति शेषः । " अनुमाना " दित्यनन्तरं सर्वत्रेति पूरणीयम् । लोके वेदेचेति तदर्थः (वाक्यार्थप्रतीतेरिति) भवताशाब्दबोधात्पूर्व मुप गमादिति शेषः । सामग्र्यन्तरकल्पनाभावादिति भावः । शाब्दबोधे वाक्यार्थज्ञानाधीन यथार्थतात्पर्यज्ञानापेक्षां व्यवस्थाप्य प्राभाकरै र्लौकिक शब्दस्यानुवादकत्व मुपपाद्यम्, शाब्दबुद्धौ यथार्थतात्पर्यस्य ज्ञातोप योगित्वेच शब्दनिष्ठ* प्रयोजकत्वस्यैव साधकंतावक्ष्यते, तत्सिद्ध्येनति प्रसक्तस्य शब्दप्रामाण्यप्रयोजकस्यावश्योपेयता, तादृशरूपस्यच तत्प्रयो जकरूपान्तरखण्डनेन परिशेषाद्यथार्थतात्पर्यस्य तःप्रयोजकत्वंसेत्स्यती त्याशयेनाह (व्यभिचारिव्यावृत्तमिति) व्यभिचारिव्यावृत्तंत्वं यद्धर्म प्रकारकप्रमोपधान प्रयोजकस्तद्धर्मप्रकारक प्रमास्वरूपायोग्यव्यावृत्तत्वं । यद्यपि ह्रदोवह्निमानित्यादि मुख्यार्थपरवाक्यमपि ह्रदादिपदंलक्ष्यार्थं पर्वतादौ वह्न्यादिप्रमास्वरूपयोग्यं, तदन्यव्यावृत्तत्वं तादृशवाक्यत्वादि साधारणं; तथापि तद्धर्मप्रकारक यथार्थतात्पर्यशून्यत्वरूपायोग्यत्व विवक्षया न दोषः । तद्भ्रमजनकव्यावृत्तत्वन्तु नार्थः, पर्वतोवह्निमानिति वाक्येनापि लक्षणाद्युपस्थापितह्रदादौ वह्न्यादिभ्रमजनना त्तद्वाक्यनिष्ठ यथार्थतात्पर्यस्येवासंग्रहात् । अप्रमाणरूपस्य प्रमाप्रयोजकत्वं न संभवति, अप्रमाणवाक्ये तदभावसत्वेपि प्रमोपधानविरहेण

---

* अत्राल्पीयान् ग्रन्थः पतितः ।

मव्यभिचार्यनुगत प्रमाप्रयोजकमुपेयं, यदभावाद नाप्तोक्तवाक्या दप्रमा ।

तदभावस्य प्रमानुपधानाप्रयोजकत्वादिति प्रामाण्यप्रयोजकतानिर्वाह प्रयोजकत्वेन, व्यभिचारिव्यावृत्तत्व विशेषणोपादानं (अव्यभिचार्य नुगतमिति) तद्धर्मप्रकारक प्रमाकरण यावद्वाक्यसाधारणमित्यर्थः । अतथाभूतत्वे व्यभिचारेण प्रामाण्यप्रयोजकत्वा निर्वाहात् । एतस्यापि विशे षणस्य तन्निर्वाहकत्वेनोपादानं व्यभिचारिव्यावृत्तत्वे तदभावस्य प्रामाण्याभावप्रयोजकतया । तस्य प्रामाण्यप्रयोजकता निर्वाहकत्वं स्वय मेव प्रकाशयति (त [य] दभावादिति) " अना [प्तोक्त] प्तवाक्यात् "- अप्रमाणवाक्यात् । " अप्रमा "- प्रमाया अनुत्पादः । यद्यप्य नाप्त वाक्यादिति पंचम्यर्थ तज्जन्यत्वस्य प्रमायामन्वयोपगमे प्रतियोग्य प्रसिद्धिः. अभावान्वये अयोग्यत्वमेव, तथाप्यभावान्वयिन आनन्तर्यस्य पंचम्यर्थतोपगमाददोषः । अनन्तरमितिपदं वा पूरणीयम् । नच यथार्थतात्पर्यस्य प्रमाहेतुत्वे गुरूणां प्रमाया गुणजन्यतास्वीकरप्रसंग इति वाच्यम्, प्रमात्वस्य यथार्थतात्पर्यजन्यतानवच्छेदकत्वेन तस्य गुणत्वाप्रसक्तेः; तद्धर्मप्रकारकशाब्दत्वस्यैव कार्यतावच्छेदकत्वात् । नचा तात्पर्यविषयीभूतार्थस्य शाब्दबोधवारणाय तात्पर्यस्यैव शाब्द बोधहेतुत्व मास्तां, किं यथार्थतात्पर्यपर्यन्त हेतुतयेति वाच्यम्, वह्नि मानित्यादि सतात्पर्यवाक्यादेव वह्निशून्यविषयक वह्निप्रकारकबोध वारणाय वह्न्यादिप्रकारकबोधे यथार्थवह्न्यादिप्रतीति गर्भतात्पर्यग्रह हेतुताया आवश्यकत्वात् ।

नच तादृशशाब्दबोधस्य तन्मते असिद्धयासामग्र्यभावेन तदापत्त्य सम्भवाद्यथार्थतात्पर्यस्य हेतुत्वकल्पनं नसम्भवतीति वाच्यं तादृशविशि ष्टबोधस्याप्रसिद्धावेपि वह्निप्रकारकताया वह्न्यादिशून्ये प्यापत्तिसम्भवात् ।

अयथार्थपदार्थभासक योग्यताज्ञानादीनां पर्वतादिविशेष्यक वह्न्यादि प्रकारक योग्यताज्ञानित्वादिनैव हेतुत्वकल्पना द्रव्यादिप्रकारतानिरूपित वह्न्यादिमत्पर्वतविशेष्यता प्रयोजिकैव तद्व्यष्टेर्लाघवेति वह्न्यादिशून्य ह्रदादौ वह्न्यादिविशेष्यतायाः नापत्तिसम्भवः, नच योग्यता ज्ञानस्य समानविशेष्यता प्रत्यासत्त्यैव विशेष्यविशेषणान्तर्भाव्यैव हेतुताभ्वीक्रियते लाघवात्, तथा च विशेषणान्तर्भिधर्मेण तद्बोधे विशेष्यतापत्ति दुर्वारेवेति वाच्यम्, समानाकारकज्ञान शाब्दबोधयो स्समानविशेष्यकत्वानियमेन समानविशेष्यताप्रत्यासत्त्या तयोर्हेतु हेतु मद्भावा सम्भवादिति चेन्न; - समानविशेष्यता प्रत्यासत्त्यसम्भवेपि समान धर्मितावच्छेदकताप्रत्यासत्त्या धर्मितावच्छेदकविशेषमनन्त र्भाव्यैव शाब्दबुद्धौ योग्यताज्ञानहेतुत्व कल्पनात द्रव्यत्वावच्छिन्न धर्मिक वह्न्यान्वयबाधापत्तेः दुर्वारत्वात । अतो धर्मितावच्छेदक विशेषनियन्त्रित एव शाब्दबोधयोग्यताविधेः कार्यकारणभावस्यात् । तथा च द्रव्यत्वाद्यवच्छिन्नधर्मिकयोग्यताज्ञानाऽजायमानवह्न्यान्वय बोधे तदवच्छिन्नस्य वह्न्यादिमतएव धर्मितावच्छेदकता न तादृशस्य वह्न्यादिशून्यस्येत्यत्र नियामकाभावः । अतः यथार्थोपपदस्य शाब्दबोधे तत्तद्धर्मप्रकारतानिरूपित विशेष्यतानियामकत्वमावश्यकम् । तच्च स्वाव यव प्रतीतिनिष्ठयाथार्थ्यं घटकविशेष्यतासंबंधेन यथार्थ तात्पर्यस्य हेतुतया निर्वहतीतिदिक् ।

[इदमापाततः- अनुमितौ वह्न्यादिशून्यस्य भ्रमात्मकहेतुसंज्ञानध र्मितावच्छेदकाश्रयस्य तद्विशेष्यतयैव प्रकारकत्वेनैव • पक्षधर्मता धियो हेतुतायाः कल्पनीयतया तत्तद्धर्मप्रकारतानिरूपित विशे ष्यतासंबन्धेनज्ञानं प्रति तद्वृत्तित्व विशिष्टत्वेन हेतुतयैव दोऽन्यथा व्यभिचारणसंभवात । तद्धर्मस्यां सत्यवस्थायामपि तद्धर्मविशिष्ट वह्न्यान्वयाव्यभिचारेण तत्त्वेन हेतुत्वासंभवात, तदुपेक्षितम् ।]

अन्यथा कार्यवैचित्र्यं नस्यात् । तच्च ज्ञातमु
पयुज्यते,

निरुक्तरूपाभावस्य प्रमाविरहप्रयोजकत्वानुपगमे किमनिष्टमित्यत आह (अन्यथेति) " कार्यवैचित्र्यं "-प्रमारूपकार्यस्य शाब्दाभासस्यैवोत्पादरूपं (नस्यादिति) आकांक्षादिसत्त्वेन तत्र तदनुत्पादप्रयोजकांतरस्य दुर्घटत्वादितिभावः । इदानीं यथार्थतात्पर्यस्यसत्त्वेन प्रमाप्रयोजकतायां निर्धारितत्वा द्विशेषरूपावच्छिन्ने तत्र ज्ञातोपयोगित्वा साधक ज्ञानोपयोगित्व हेतो र्दुरवधारणतया संदिग्धासिद्धतेतिसामान्यत एव तज्ज्ञातोपयोगिता साध कानुमाने ज्ञानमेवावच्छेदकं नतु तद्विषयत्वं गौरवादिति । तत्रशाब्दबोधं प्रतिज्ञातोपयोगित्व रूपसाध्यासत्वेपिनाहतो बाधः, अवच्छेदकसंबंध व्यावृत्तायां अवच्छेद्याश्रयेविशेषणविधया विवक्षणावच्छेदकतायां एवपक्षतावच्छेदक घटकत्वात् । करणतावच्छेदकस्य ज्ञानस्यवारणाय शाब्दवृत्तीति । विषयतायां वृत्त्वनियामकतया तेन सम्बन्धेन ज्ञानस्यसम्बद्धत्वेपि तद्दूषणाभावः । नच पक्षतावच्छेदकसामानाधिकरण्येनैव साध्यमनुमीयताम्, तत्रांशतो बाधस्या दोषतया किं शाब्दज्ञानवारणेनेति वाच्यम्, आकांक्षादावंशतोसिद्धे साधनस्यादोषत्वाय पक्षतावच्छेदकावच्छेदेनैव साध्यस्यसाधनीयत्वात् । शाब्दवृत्तिशाब्दबोधानुपयोगि नभोवृत्तित्वादिधर्मे बाधवारणायविशेष्य दळम् । किंचित्साध्यकशाब्दरूप लिंगवृत्तिव्याप्तत्वादा वह्नित्विकरणतावच्छेदके शाब्दप्रमोपयोगि ज्ञानविषयत्वाभावेन साध्यशून्ये बाध वारणाय शाब्दत्वं प्रमाविशेषणम् । गुरुमते भावस्याधिकरणस्वरूपतया शाब्दवृत्तौ बाधाभावत्वान्वयासम्भवादभावत्वादौ शाब्दबोधकारणतावच्छेदके वारणायकरणतापर्यन्तनिवेशः । साध्यमाह (ज्ञात मुपयुज्यत इति) शाब्दज्ञानोपयोगि ज्ञानविषयइत्यर्थः । शाब्दज्ञानकारणतावच्छेदक विषयतावदिति यावत् । अतश्शाब्दबोध्यजनकाकांक्षादिविषय

[illegible] परमेश्वरज्ञानस्यविषयतया न सिद्धसाधनसम्भवः। यथार्थतात्पर्यं तादृशसाध्यसिद्धौ तद्विषयज्ञानत्वेन शाब्दधीकारणत्व सिद्धिपर्यवसाना यथार्थतात्पर्यज्ञानस्य शाब्दबोधनियतापेक्षया शब्दस्या नुवादकतासिद्धिरिति भावः ।

अथ गुरुमते तादृशतात्पर्यज्ञानं न शाब्दबोधेकारणम्, तद्धि ष्टि शब्देविशेषणविधया विषयतासम्बन्धेन ज्ञानस्यावच्छेदकतया पि तदवच्छिन्न शब्दनिष्ठविषयताक ज्ञानस्यशाब्दबोधे पेक्षयोद्देश्यसिद्धेः स्वतन्त्रकारणतायां निर्युक्तिकत्वात्; नच ज्ञायमानतात्पर्यविशिष्टशब्द स्तद्विशिष्टशब्दज्ञानं वा हेतुरित्यत्र विनिगमनाविरहा दुभयहेतुतासि द्धिरिति वाच्यं, शब्देनानुभवतीति व्यवहारानुरोधेन शब्दस्य कारणतायां आवश्यकत्वात् । अन्यथा ज्ञायमान शब्दकरणतापक्षे ज्ञानेतरपुरुषीयावस्य निवेश्यतया गौरवेण शब्दज्ञानस्यैव सामानाधिक रण्य प्रत्यासत्त्या हेतुतायास्सिद्धिप्रसंगात् । अनुमितिस्थलेतु व्याप्त्या दिविशिष्टलिंगज्ञानस्य व्यापारतानिर्व्यूहाय कारणतायां आवश्यकत्वात्, शाब्दस्थले च पदार्थोपस्थितेरेव व्यापारतेति विशेषादितिचेत्? अस्तु तर्हिस्वावच्छिन्नविषयता संबंधावच्छिन्न ज्ञानवृत्ति शाब्दज्ञानकरणता वच्छेदकरूपमेव ज्ञातोपयोगित्वम् । "व्याप्तिवदि"ति दृष्टान्तस्य सूत्रस्थसामान्यव्याप्त्यभिप्रायेणसंगतेः।

अथैवमपि तात्पर्यज्ञानापेक्षानसिद्ध्यति, हेतौ यथार्थतात्पर्यत्वे ज्ञातोपयोगिता व्याप्तिविरहेण तेनरूपेण ज्ञातोपयोगितापर्यंतस्य साध्य त्वासंभवात्, इदानीं तात्पर्यस्य यथार्थत्वेन हेतोरक्षतया *पक्षतावच्छेद कावच्छेदेन ज्ञातोपयोगिता साधनस्य बाधादप्यसंभवात्, तेनरूपेण ज्ञानस्य हेतुतया गुरुणाप्यनुपगमादिति चेन्न;- स्वनिष्ठ शाब्दज्ञानोप योगितावच्छेदकरूपेण शाब्दज्ञाने ज्ञातोपयोगतासाधनेनैव समीहि तनिर्वाहात्, परिशेषेण यथार्थ तात्पर्यत्वावच्छिन्नस्यैव शाब्दज्ञानोपयो

---

* अयं किंवा नपि ग्रंथः पतितः ।

ज्ञायमानकरणे ज्ञानोपयोगि व्यभिचारिवैलक्षण्यात्,

गिताया व्यवस्थापनीयतया उक्तसाध्यसिद्धयैव यथार्थ तात्पर्यज्ञानहेतु तासिद्धि पर्यवसानात. व्यतिरेपि स्वनिष्टानुमितिरूप ज्ञानोपयोगित्वा वच्छेदकव्यापित्वेन तादृशज्ञाने ज्ञातोपयोगितया दृष्टान्तसंगतेः। अथवा शाब्दप्रमाकरणतावच्छेदकत्वेन ज्ञायमानकरणे ज्ञातोपयोगिव्यभिचारि व्यावृत्तस्य न पक्षता, अपितु शाब्दप्रमाकरणतावच्छेदकत्वोपलक्षित रूप विशिष्टस्यैव, तादृशरूपस्य यथार्थतात्पर्यत्वरूपतया तद्विशिष्टपक्षे ज्ञातो पयोगित्वसिद्धयैव तत्सर्माहितसिद्धिः। कारणतावच्छेदकतावच्छेदकत्व स्योपलक्षणतयेः तद्विशिष्टयथार्थ तात्पर्यत्वावच्छिन्नविषयकज्ञानस्या हेतु त्वेपि नबाधः। हेतुमाह (ज्ञायमानइत्यादि) "ज्ञानोपयोगः"-ज्ञानरूपकार्य घटित सह कारित्व, तत्र ज्ञायमानकरणनिरूपितत्वस्य सम्भ्यर्थस्यान्वयः। उपयोगित्वस्य वृत्त्येकदेशत्वेपि तस्य क्रियान्वेन निरूपकस्याप्याधार मभेदतया कारकत्वेन तदन्वितविभक्त्यर्थ निरूपितत्वस्योपयोगेन्वयः। तत्सहकारित्वं च ज्ञानरूपकार्यघटितं तज्जन्यज्ञानकारणतावच्छेदक त्वं। ज्ञानंच प्रकृतेशाब्दं। ज्ञायमानकारणजन्यत्वंच ज्ञायमानत्वावच्छि न्न करणताकत्वं। तथाच ज्ञायमानत्वावच्छिन्न करणताकशाब्दज्ञान करणतावच्छेदक 'मुपयोग्यं' तार्थ. । ज्ञायमानत्वावच्छिन्न शाब्द ज्ञानकरणतावच्छेदकत्व पर्य्यवसितं । ज्ञायमानत्वावच्छिन्नायाः ज्ञान करणतायाः एव ज्ञायमानत्वावच्छिन्न करणताक ज्ञानकरणतात्वेनाभिधानं ज्ञायमानत्वव्यावृत्तायां ज्ञायमानत्वरूपावच्छेदक विशेष्यतावच्छेदकतया कारणतावच्छेदकतायालाभाय। तेन ज्ञायमानत्वरूपकरणतावच्छेदके ज्ञातोपयोगितासिरहेपि नक्षतिः। व्यभिचारिवैलक्षण्यत्वं व्यभिचारिण्या वृत्तत्वम्। तच्च विसंवादिप्रवृत्तिजनके ज्ञानकरणतावच्छेदकत्वम्। एवं

क ज्ञायमानत्व रूपावच्छेदक विशेष्यतावच्छेदकविधया शाब्दज्ञानकरण तावच्छेदकावैसति भ्रमकरणतानवच्छेदकत्वं प्रकृतहेतुः । यद्यज्ज्ञान करणतायां ज्ञायमानत्व विशेष्यतावच्छेदकतया वच्छेदकत्वैसति भ्र मकरणतानवच्छेदकं तत्तज्ज्ञानेज्ञायमानमुपयुज्यत इति सामान्यमुखी व्याप्तिः । ज्ञायमानत्व विशेष्यतावच्छेकतयेत्यनुक्तौ प्रत्यक्षकरणता वच्छेदकेंद्रियत्वादौ प्रत्यक्षं प्रतिज्ञातोपयोगित्व शून्ये नुमित्यादिकरणताव च्छेदक ज्ञायमानत्वे व ज्ञातोपयोगित्वशून्ये व्यभिचारस्स्यादितदु पादानम् । मनोयोग बाधाभावाद्धेरनुमित्यादि ज्ञानोपयोगिनोपि तत्क रणतानवच्छेदकत्वा त्परामर्शत्वादेरनुमिति करणतावच्छेदकस्याप्य तथा त्वा व्यभिचारः । व्याप्तिभ्रमजन्यानुमित्यादिस्थलीया गृहीतासंस र्गक धर्मधर्मिविषयक ज्ञानद्वये ज्ञायमानत्वविशेषित ज्ञायमानव्याप्त्या धसंसर्गग्रह शून्यत्वावच्छिन्नस्य व्याप्त्यादि भ्रमविषयलिंगत्य करणतया तादृशज्ञानद्वय करणतावच्छदका संसर्गाग्रहे व्यभिचारवारणाय विशेष्य दलम् । नचधूमलिंगक पर्वतादि पक्षकानुमिति स्थानाभिषिक्तागृहीता संसर्गकधूमविषयक ज्ञानद्वयस्य विसंवादिप्रवृत्त्यैजनकतया तत्करणताव च्छेदक व्याप्त्याद्य संसर्गाग्रहे व्यभिचारइति वाच्यं, धूलीपटलादौ वह्न्यादि व्याप्यसंसर्गाग्रहस्य वह्निव्याप्य धूलीपटलवान् ह्रदइत्यादि भ्रमेपि प्रयोजकत्वात । वस्तु तस्तु विसंवादिप्रवृत्तिजनकत्वेन नज्ञान द्वय रूपभ्रम उपादेयः, किन्तु ज्ञानद्वयत्वेन स्मृतित्वेनवेति संवादिप्रवृ त्तिजनक ज्ञानद्वयजनकासंसर्गाग्रहस्यापि तादृशज्ञानकरणतावच्छेदक त्वान्नव्यभिचारः । एतेन किंचिल्लिंगनिष्ठाया व्याप्तेः पक्षधर्मताया वा असंसर्गाग्रहस्य भ्रमानुपयोगिन स्संवादिप्रवृत्तिजनकज्ञानोपयोगिन स्त्वेपि न तत्र व्यभिचारः ।

मिश्रानुयायिनस्तु (ज्ञायमानकरण इति) यज्ज्ञानं प्रतिज्ञातोपयो गित्वं साध्यं ज्ञानावच्छिन्न तज्ज्ञानकरणतावतीत्यर्थः । सप्तम्यर्थस्य प्रकारस्य ज्ञानोपयोगित्वस्यान्वयः । क्रियायोगाभावेन ज्ञायमानकरणस्या

धारस्याप्यकारकतया कारकाधिकारीयेण " आधारोधिकरण " मिति सूत्रेणाधिकरणसंज्ञाविरहेण " सप्तम्यधिकरणेच " तिसूत्रेण सप्तमी विधानानिर्वाहे प्युरासिक्लोमेत्यादिव स्कथंचि दाधारसप्तम्युपपत्तिः । तथाच ज्ञानावच्छिन्न तज्ज्ञानकरणतावद्वृत्ति सज्ज्ञानोपयोगित्वं विशेष णदळार्थः । उपयोगित्वं कारणतावच्छेदप्रयोकजकसाधारणं प्रयोजक त्वं । लिंगपरामर्शादे रनुमित्याद्युपयोगिनोपि लिंगादिरूपकरणवृत्तिता विरहा त्तत्र व्यभिचारः । आत्मान्यत्वेन ज्ञायमानकरणस्य विशेषणी यतयात्म लिंगकानुमिति कारणतादृशपरामर्शस्य तादृशकरणात्मनिष्ठ त्वेपि न व्यभिचारः । इन्द्रियनिष्ठप्रत्यक्षज्ञानोपयोगिनिदोषाभावे न्द्रियमनोयोगादौ व्यभिचारवारणाय ज्ञायमान करणोपादानम् । इंद्रि यस्यापि स्वलिंगकानुमितौ ज्ञायमानतया करणत्वात्तज्ज्ञाननिरूपित ज्ञाना वच्छिन्न करणतानिवेशः । अनुमित्यनुपयोगिनि ज्ञायमान तत्तत्करणलिं गनिष्ठरूपादौ व्यभिचारवारणाय तज्ज्ञानोपयोगितानिवेशः । लिंगतया धूमतदीयरूपादौ भयलिंगकानुमित्युपयोगिनि तादृशानुमिति करणनिष्ठे तदीयरूपादौ तदनुमितिज्ञातोपयोगितया साध्यसत्वेन न व्यभिचारावकाशः । गुरुमते सिद्धचभावस्यानुमितावहेतुतया न तत्रव्यभिचारप्र सक्तिः । बाधाद्यभावस्य विशेष्यनिष्ठस्य भ्रमसामग्रीतया व्यभिचारि व्यावृत्तत्व विरहेण न तत्रव्यभिचारः । तद्बळाभावेनैवात्ममनोयागादौ मनोलिंगकानुमिते र्ज्ञायमानकरणे मनसिवर्तमाने तादृशानुमित्युपयोगिनि न व्यभिचारः । व्यभिचारिव्यावृत्तत्वं च भ्रमसामग्रय प्रविष्टत्वम् । तच्च न तदनुपधायकत्वं, येन यदात्ममनोयोगेन तल्लिंगकानुमितिरेव जनिता नतु स्मृति स्तत्र व्यभिचारेदुर्वारस्स्यात् , किंतुतन्निष्ठकार्यतानिरूपित कारणतावच्छेदकरूप शून्यत्वम् । आत्ममनोयोगत्वादेस्तादृश रूपतया तद्धति न व्यभिचारः । नच व्याप्तेस्तात्पर्यत्वस्य च क्वचित्तादृश रूपतया सदृशरूपतया वोद्बोधकत्वेन स्मृतिहेतुतया दृष्टान्तासिद्धिस्व रूपासिद्धी इतिवाच्यं, तज्ज्ञानस्यैवोद्बोधकविधया हेतुत्वोपगमात् , नतु ज्ञायमानस्य तस्य । अथवास्मृत्यनुभव साधारणधर्मवच्छिन्न कार्यतानिरू

प्रमाहेतुत्वाद्वा, व्याप्तिवच्छब्दशक्तिवच्चेति । अन्यथा शब्दाभासोच्छेदप्रसङ्गः । नचाप्तोक्तत्वं तथा, संवादात्प्रमाणे शुकादीरिते भ्रांतप्रतारक संवादिवाक्यें वेदेच तदभावात्; आप्तोक्तत्वानुमाने व्यभिचारिव्यावृत्तलिङ्गाभावाच्च । भावेवा तद्धतएव शब्दस्य प्रत्यायकत्वात्

एतेन - अप्रमाहेतुत्वं नभ्रमप्रमाद विप्रलिप्सा करणापाटवानां, परस्परंव्यभिचारात; मिळि

पित कारणताशून्यत्वमेव निवेश्यम् । उद्बोधकजन्यतावच्छेदक स्मृति निष्ठधर्मश्च नानुभवसाधारण इतिनोक्तासिद्धचोरवकाशः । अतएव लिंग परामर्शादे स्स्मृतिजनकत्वेपि स्मृत्यनुभवसाधारणधर्मस्य तज्जन्यतान वच्छेदकतयैतद्धर्मेनासाधारण्यात्करणे आत्मान्यत्वं निवेश्यैव तत्रव्यभिचारोनिराकृतः । उपेक्षात्मक परामर्शस्यैव स्मृत्यजनकतया तत्रव्यभिचारस्य स्मृत्यजनकत्वनिवेशेन दुर्वारतया पूर्वकल्पे प्यात्मान्यत्व निवेशनानुसरणमितिवदंति ।

हेत्वंतरमाह (प्रमाहेतुत्वादिति) ज्ञानान्यत्वेसति ज्ञायमानत्वाव च्छिन्नकरण प्रमित्यसाधारण्यादित्यर्थः । अत्रापि यत्स्वत्वेनोपादाय सामान्यव्याप्तिरादरणीया । सल्लिंगपरामर्शादे व्यभिचारवारणायस त्यंतम् । अन्यथाप्तार्थापि लोकवत्तात्पर्यस्याध्यापकादीच्छाघटितत्वे केन चिद्पुंसो स्वतंत्रेण कपिंजल चतुष्टयालंभनादिकर्तव्यताया स्ततोबोधसंभ वात्ताडशोप्यर्थो वेदार्थतया अबाधितस्स्यात, वेदार्थस्या बाधितत्वानि

तस्याव्यापकत्वात् ; किन्त्वाप्तोक्तत्वाभावस्या प्रमा हेतुत्वं, तदभावश्चाप्तोक्तत्वं प्रमाहेतुः, इत्यपास्तं;— आप्तोक्तत्वस्य प्रथमंलिङ्गाभावेन ज्ञातु मशक्य त्वात् ।

अतएव व्यभिचारशङ्काविरहो हेतुः, सा च लोकेभ्मादि मूलेत्याप्तोक्तत्वानुमाना दुच्छि द्यते, वेदे चा पौरुषेयत्व निश्चयेन, इति निरस्तं;— अभिमतवाक्यार्थस्या पूर्वत्वेन साध्याप्रसिद्धेः, वेदे सदोषपुरुषाप्रणीतपदस्मारितत्वेन संसर्गासिद्धे रनुवादकतापत्तश्च ।

नापिदोषाभावः, भ्रान्तप्रतारक वाक्य जन्य ज्ञाने प्रत्यक्षेणा गृहीतसंवादे तदभावात् । दोषाभावस्य हेतुत्वात्तत्रवाक्यम्मूकमेव, व्यवहा रस्तु प्रत्यक्षादितिचेन्न;— अनुभवापलापापातात् , तद्धेतुत्वे विवादाद्देप्यनुवादकतापत्तेश्च ।

किंच दोषाभावस्य प्रमाहेतुत्वे ऽप्रमायांदो षः कारणम । तस्य च प्रत्येकं हेतुत्वेव्याभिचारः। मिळितस्यतत्त्वे -एकस्माद प्रमानस्यात । भ्रमादीनां प्रत्येकं दोपत्वेननुगमः । मिळितस्य तु तत्त्वे एक स्मादप्रमानुदयप्रसंगः ।

तस्मा ल्लाघवा द्यथार्थतात्पर्यकत्वं शाब्द प्रमाप्रयोजकं । तच्च यथार्थवाक्यार्थप्रतीतिप्रयोजन कत्वं लोकवेदसाधारणं । तदभावादप्रमा,सएवदोषः; नहि जात्यैव कश्चिद्दोषः । तद्विघातकत्वाच्च भ्रमादीनां दोषत्वं । अतएव प्रतारकवाक्यं शुका दिवाक्यं च प्रमाणं, संवादात् । अतएवान्य घटा भिप्रायेण गेहे घटोस्तीत्युक्ते यत्र घटांतरं दृष्ट्वा तमानयति तत्रान्यपरत्वा च्छब्दो न प्रमाणं, व्यव हारस्तु प्रत्यक्षादेव । यष्टीः प्रवेशयेति च मुख्यार्थ बोधेनप्रमाणं, यत्परश्शब्दस्मशब्दार्थइतिन्यायात् ।

तच्च तात्पर्यं ज्ञातमुपयुज्यते, ज्ञायमान करणे ज्ञानोपयोगिव्यभिचारिवैलक्षण्यात् , व्या प्तिवच्छक्तिवच्च । अन्यथा - अन्यपरादन्यान्वय बोधोनस्यादिति शाब्दाभासोच्छेदप्रसंगः । तद्भ्रम च्च शाब्दभ्रमः । अतएव यष्टीः प्रवेशयेत्यत्र लक्षणा नानार्थे विनिगमनाच्च, तयो स्तात्पर्यग्रह मूलकत्वात् । यदिच यत्र वास्तवं तात्पर्यं तं श ब्दोबोधयति, तदा लक्षणायां मुख्यार्थान्वयानुप पत्त्युपयोगो नस्यात् । अतएव पचतीत्युक्तेऽन्योक्ते- न स्वयं स्मृतेनवा कलायपदेनोपस्थिते कलायं

पचतीत्यन्वयबोधोनभवति, तात्पर्यानिश्चयात् । नच तात्पर्यग्राहकस्य प्रकरणादेः प्राथम्यादावश्यकत्वाच्च शब्दसहकारिता नतु तात्पर्यग्रहस्येतिवाच्यम, तेषा मननुगतत्वेन परस्पर व्यभिचारादहेतुत्वात् । तात्पर्यग्राहकतात्व नुगतानामपि, व्याप्यत्वा ङ्गमादीनामिव ।

तच्च तात्पर्यं वेदेन्यायगम्यं,

यमादित्याशंकायां यस्मिन्नर्थे वेदस्यानादितात्पर्यं स एवंवेदार्थ इत्यु च्यते । तादृशएवार्थे अबाधितत्वनियमः, क्षनादितात्पर्यं च वेदस्यन्या यावधार्यतात्पर्यकेर्थ इत्यिसमाधिः, अतोवक्तृतात्पर्यस्य न्यायान्नधार्यता माह (तच्चेति) " न्यायगम्यं " - न्यायावधार्यं । न्यायश्चाध्वरमीमां सायां जैमिनिप्रकाशित तात्पर्यनिश्चायकयुक्तिः । युक्तिश्चानुमानम् , अनुमानानुग्राहकतर्कोवा । कपिंजलानालभेतेत्यत्र बहुवचनार्थं चतुष्ट्वा पेक्षयात्रित्वस्य प्रथमोपस्थितत्वमेव तत्रबहुवचनतात्पर्यानुमापक मिति । यद्यपि संख्यापरिगणने चतुष्ट्वादिरूपबहुत्वाद्यपेक्षया त्रित्वस्य प्रथमोपस्थितत्वेपि सर्वत्र चतुष्ट्वाद्युपस्थितौ त्रित्वोपस्थित्यपेक्षया त्रित्वस्य न प्रथमोपस्थितत्वं, कादाचित्कंच बहुचतुष्ट्वाद्यपेक्षत्वं; तथापि त्रित्वाद्विछिन्न तदध्यधिकरणैकत्वापेक्षाबुद्धिरेव चतुष्ट्वादि व्यंजिकेतिमते चतुष्ट्वाद्यपेक्षयात्रित्वस्य प्राथमिक प्रत्यक्षविषयत्वरूपं प्रथमोपस्थितत्वं तात्पर्यग्राहकमिति तेषामाशयः । तद्धितुकं तात्पर्यानु मानंच-त्रित्वं वैदिकैतद्बहुवचन पदतात्पर्यविषयः, तदर्थत्वेसति तदी यार्थान्तरापेक्षया प्रथमोपस्थितत्वात् , यो यदर्थत्वेसति यदीयार्थान्तरापे

यस्यन्यायात्तात्पर्यमवधार्यते सएववेदार्थः । लोकेच नकेवलं न्यायानुसारि तात्पर्यमिति न न्यायगम्यं, किंतु पुमभिप्रायनियंत्रितं, न्यायाविषयेपि पुरुषे इच्छाविषय प्रतीतिजनकत्वात्पुंवचसाम् ।

क्षया प्रथमोपस्थित स्सतत्तात्पर्यविषयइति सामान्यतोव्याप्तिः । यद्वा इदं बहुवचनपदं त्रित्वपरं, स्वार्थांतरापेक्षया प्रथमोपस्थित तात्स्वार्थक्य बहुव चनत्वादिति । अत्रपूर्ववत्सामान्यतोव्याप्तिरूह्या । एवंचरमोपस्थिति कत्वा चतुष्ट्वादे रनादितात्पर्याभाव मवधार्य पारिशेषेणापि तादृश त्रित्वे तादृशतात्पर्यावधारणसंभवः । चतुष्टयालंभनादौ तात्पर्ये अपूर्व चतुष्टयोपगमेगौरवम्, अन्यथालाघवमित्यतस्त्रित्वे तात्पर्याव धारणमित्यन्ये (यस्येति) तथाचैत्यर्थदिः । लोकेवेदतोविशेषं दर्शयति (लोकेचेति) लौकिकवाक्येचेत्यर्थः (न केवलं न्यायानुसारीति) न्या यविषयेप्यनादितात्पर्या तात्पर्यं न्यायविषयएवेति न नियमइत्यर्थः (नन्यायगम्यमिति) न्यायात्त्रित्वमेव तात्पर्यविषयो नचतुष्ट्वादिकमित्य वधारणस्याविषयइत्यर्थः । नियमाभावेन तद्वधारणासंभव इतिभावः । नियमाभावं दर्शयति (किंत्विति) प्रयोक्तृपुरुषा र्थप्रतिपिपादयिषाधी नमित्यर्थः (न्यायाविषयेपीति) न्यायाविषमात्रेपीत्यर्थः । चतुष्ट्वादा वितिशेषः (पुरुषेति) पुरुषस्येच्छाविषयो यापप्रतीति स्तज्जनकत्वा न्नत्वादित्यर्थः (पुंवचसामिति) घटान्यनयेत्यादि वाक्यप्रयोगपरम्परया इत्यर्थः । तथा च तत्रापि शेषा नादितात्पर्यमिति भावः ।

केचित्तु वेदजन्यशाब्दबोधे न्यायाधीनतात्पर्यावधारणमेव हेतुः, अतो यत्रन्यायीतात्पर्यमवधार्यते स एव वेदजन्यबोधविषयः, लौकिकस्थलेच न्यायाविषयोप्यर्थः शाब्दबोधे भासते, तत्रायशाब्दबोधे तात्पर्यज्ञानहेतु

वक्ताच परकीय वाक्यार्थ ज्ञानोत्पादनेच्छया वाक्य मुच्चारयति ।

तायां न्यायाधीनत्वाप्रवेशइति प्रघट्टकार्थइत्याहुः; तदसत्, वेदस्थले तात्पर्यज्ञानादिसत्त्वेपि शाब्दबोधापलापे तत्र तात्पर्यज्ञानहेतुतायाः पुनर्निर्युक्तिकत्वापत्तेः । वेदस्य नियतार्थबोधकत्वे तत्तदर्थविषयक शाब्दास्य तद्वाक्यज्ञानजन्यतावच्छेदकत्वेनैवान्यार्थ बोधकताप्रसंगानवकाशात् । नच तात्पर्यज्ञानस्य शाब्दसामान्यकारणतया वेदजन्यबोधस्यापि तात्पर्यधीजन्यत्व मनपवादमिति वाच्यं, तथापि न्यायाधीनतात्पर्यज्ञानस्य विशेषरूपेण हेतुतायाः स्तत्राप्रामाणिकत्वात् । अर्थभेदेन वाक्यभेदेनच तात्पर्यज्ञानहेतुताः भेदात्, लोकवद् साधारणतात्पर्यज्ञानस्य शाब्दसामान्येनुगतकारणत्वासम्भवाच्च । अत्रयथार्थतात्पर्यज्ञानस्य शाब्दबोधहेतुत्वेपि पयसासिंचतीति, लौकिवाक्यार्थस्य पयः करणकत्वविशिष्टसेकत्वादिरूप प्रकृतवाक्यप्रतिपाद्यतावच्छेदकविशेषधर्म मविषयीकृत्य पयः पदार्थकरणत्वविशिष्ट सिचधात्वर्थत्वादिनैवावगाह्य तद्विषयकत्वेन पयःकरणकत्वप्रकारकत्वेसति सेकविशेष्यकत्वेन वा प्रतीतिविषयक तात्पर्यज्ञानाच्छ ब्दबोधोपगमेन लौकिकस्यापिवाक्यस्य नानुवादकता निर्वहति, समानाकारकवाक्यार्थज्ञानस्य शाब्दबोधात्पूर्वमजातत्वात् आवश्यकंच तादृशस्यैव ज्ञानस्य शाब्दानुभवहेतुत्वं, विशिष्य प्रकृतवाक्यार्थस्य नियमतश्शाब्दबोधात्पूर्वं प्रमाणांतरेण दुरवधारणत्वात ; ' अन्यथावेदस्याप्यनुवादकतापत्तेरित्याशंकांनिरासकर्तुं लोक स्थले विशिष्य वाक्यार्थनिश्चयस्यापेक्षां तत्संभवंच दर्शयति " वक्ता " त्यादिना (परकीयवाक्यार्थ ज्ञानोत्पादनेच्छयेति) प्रमाणांतरेण स्वयं वाक्यार्थ ज्ञात्वा तद्वाक्यार्थज्ञानत्वेन स्वीयवाक्यार्थ विषयकार्थ ज्ञानमप्यवगाहमानया समानप्रकारकत्वमात्रा दुत्पन्नया परोपेतात्पर्य

साचेच्छा यदि वक्तुर्यथार्थ वाक्यार्थ ज्ञानपूर्विकाभवति तदैव परं तदुच्चारणस्य पुमभि प्रेत यथार्थ वाक्यार्थज्ञानपरत्वं यथार्थज्ञा[प]नेच्छा

वाक्यार्थं जानतिवतीच्छयेत्यर्थः । " साचेच्छा यदिवक्तु र्यथार्थ ज्ञान पूर्विकाभवति"-तदिच्छाजनकं वक्तृवाक्यार्थज्ञानं यदियथार्थं भवतीत्यर्थः । " तदुच्चारणस्य " - तद्वाक्योच्चारणस्य (पुमभिप्रेतयथार्थ वाक्यार्थ ज्ञानपरत्वमिति) वक्तुरिच्छाविषयीभूतं यत्परकीय यथार्थवाक्यार्थज्ञानं तात्पर्यं, तदुद्देश्यकत्वमित्यर्थः । तद्वाक्यस्य यथार्थवाक्यार्थ प्रतीतीच्छयोच्चरितत्व रूप यथार्थतात्पर्यमितियावत् । निर्वहतीत्यनेनान्वयः । श्रुतइत्याकांक्षायामाह (यथार्थज्ञापनेच्छाव्याप्यमिति) हेतुगर्भ मिदम् । इच्छाविषयोत्पत्ति प्रयोजकयाथार्थ्याधीनमित्यर्थः । वक्तृज्ञा नयाथार्थ्ये तत्समानविषयकस्य तात्पर्यघटकश्रोतृज्ञानस्य यैथार्थस्य संभवात् यथार्थतात्पर्य निर्वाह इतिसमुदितार्थः । इतिहेतौ । तथाचय थार्थ तात्पर्यनिर्वाहकत्वेन यथार्थतात्पर्येण वाक्यप्रयोक्तु र्यथार्थ ज्ञा-नस्यावश्यकत्वादित्यर्थः । एतच्चज्ञातुं नशक्यत इत्यंत नहेतुः, निर्वाह्यविषयक ज्ञाने निर्वाहकविषयक ज्ञानानपेक्षणात् । श्रोत्रधीन निर्वाहक ज्ञानएव निर्वाह्यज्ञानस्य हेतुतयावैपरीत्यात् । नच व्यापकानु पलंभात्तदभावेन व्याप्त्यासिद्धिसंभवात् तन्निवृत्त्यर्थ यथार्थतात्पर्यज्ञाने तद्व्यापकस्य वक्तु र्यथार्थज्ञानमपेक्षितमिति वाच्यम्, तावता सर्वत्र तदपेक्षानुपपत्त्या शब्दप्रामाण्यखण्डना सम्भवात् । श्रोत्रा वक्तु र्यथार्थ ज्ञानानुपलम्भेपि तदभावस्य तत्रानिश्चयतया सर्वत्र यथार्थतात्पर्याभाव निश्चयशक्तेः किन्तु प्रथममित्यादिना वक्ष्यमाणस्यार्थतथात्वानुमान पूर्वकालीनस्य वक्तु र्यथार्थज्ञानानुमानस्य सम्भवप्रयोजकतया वक्तु र्यथार्थे वाक्यार्थज्ञानावश्यकत्व प्रदर्शनपरं, तदनावश्यकत्वे क्वचित् बाधे

व्याप्यं निर्वहतीति वक्तु र्यथार्थं वाक्यार्थ ज्ञान वत्तामविज्ञाय यथार्थ प्रतीति परत्वं ज्ञातुं नशक्यत इति प्रथममाप्तवाक्या द्वक्तृज्ञानानुमानपूर्वक मर्थ तथात्व मनुसंधाय यथार्थ तात्पर्यानिश्चयः ।

मानुमानासम्भवात । वक्तृज्ञानानुमानमेव किमर्थमित्याकांक्षायामाह (वक्तुर्यथार्थं वाक्यार्थज्ञानवत्तामिति) (ज्ञातुं नशक्यत इति) वक्तुर्यथार्थ ज्ञानस्याज्ञाने सेकादौ पयःकरणकत्वादिना संसर्गानुमाने पयः करण कत्वादिप्रकारक यथार्थज्ञानविषयकत्वरूप हेतोरज्ञानेनार्थ तथात्वानुमा नस्य वक्तु र्यथार्थज्ञानसमानविषयकत्वेनैव तत्तात्पर्यघटक स्वकीय ज्ञानस्य श्रोत्रायाथार्थ्यानुमाना द्वक्तृयथार्थज्ञानमज्ञात्वा यथार्थप्रतीत्युद्दे श्यकत्व ग्रहस्यचासम्भवादिति भावः (आप्तवाक्यादिति) भ्रमाद्यजन्य वाक्यप्रयोक्तृत्वरूप वक्ष्यमाणहेतोरित्यर्थः (अर्थतथात्वमनुमायेति) विशेष्यपदार्थे विशेषणपदार्थसंसर्ग वक्ष्यमाणरीत्यानुमायेत्यर्थः ।

अथार्थं तथात्वानुमानं किमर्थं, तद्विनापि यथार्थज्ञानानुमानमात्रेण यथार्थज्ञानेच्छयोच्चरितत्वरूप यथार्थतात्पर्यस्य सुग्रहत्वात; नन्व यथा र्थज्ञानानुमानेपि पयः करणकस्सेकइति विशेषणतावच्छेदक प्रकारक निश्चयं विना तद्विशिष्टवैशिष्ट्यं बोधरूपपयःकरणकत्ववत्सेकप्रतीतीच्छयो च्चरितमिति तात्पर्यज्ञानं नसम्भवती त्यर्थतथात्वानुमाने मपेक्षितमिति वाच्यम्, यथार्थत्वेन वक्तृज्ञानानुमानएव वास्तवपयः करणकत्वादि रूपविशेषणवत्सेकादिविषयकत्वभान तस्यैवोक्तविशेषणतावच्छेदक प्रकारकनिश्चय रूपत्वादिवेत्र; - यथार्थ ज्ञानानुमाने यत्र विशेषणवद्वि शेष्यविषयकत्वरूप याथार्थ्यं साध्यतावच्छेदकघटकं तत्रतत्पयःपयः करणकत्व वत्सेक प्रतीत्युद्देश्यकमिति तात्पर्यग्रहसंभवा दर्थतथात्व

साधकमनुमनांतर मनपेक्षितमेव, यत्र च तादृश यथार्थत्व घटितधर्मप्र कारेण नानुमानावतारः, अपितुभ्रमान्य वृत्तितद्विशेषणीय प्रकारतानि रूपित तद्विशेष्यताकज्ञानत्वरूप याथार्थ्य प्रकारेण स्वविषयतत्तद्विशे ष्यसाकांक्ष तत्तद्विशेषणंविषयक ज्ञानत्वरूप विशिष्टज्ञानत्व प्रकारेणैववा तत्रवक्तृज्ञानानुमितेर्विशेण विशिष्टविशेष्यानवगाहितया तादृशविशेष्या वगाहिनोनुमित्यंतर ज्ञानस्यापेक्षेति तत्स्थलाभि प्रायेणार्थ तथात्वमनु मापेत्यभिधानाद् । अतएवाग्रे 'वक्तृज्ञानावच्छेदकतया तदनुजीवि संसर्गानुमानाद्वा वाक्यार्थस्य प्रतीतेरनुवादकश्शब्द' इत्यपसंहारस्या प्यविरोधः ।

अथैवमपीदं वाक्यं पयःकरणकत्ववत्सिच्धात्वर्थ विषयक प्रती त्युद्देश्यकमिति सामान्यतः पयः करणकत्व प्रकारकैकप्रतीत्युद्देश्य कमिति प्रकारतावच्छेदकतयैव विशेषणविषयकंवा तात्पर्यज्ञानं शा ब्दानुभवहेतु रूपयते, तथाच नानुवादकश्शब्दः, अन्यथा वेदस्या प्यनु वादकतापत्तेरिति पूर्वपक्षोदुरुद्धरएव ।

अत्रमिश्राः -तात्पर्यघटकप्रतीते र्बाधितार्थकत्वसंशयेशाब्दबोधानुद यो दृष्टाधितार्थकत्वेन प्रतीतिविषयक तदुद्देश्यकत्वज्ञानमेव कारणं वा च्यम् । अबाधितार्थकत्वंच न विशेषणवद्विशेष्यविषयकत्वं, वेदस्थले तदर्थस्य प्रमाणांतराग्राह्यतया दुर्ग्रहत्वात् । किन्तु विशेष्यनिष्ठाभावा प्रतियोगिविशेषणकत्वम् । पयः करणत्वादिविशेषणे सेकादिनिष्ठाभाव प्रतियोगित्वं च तत्र तादृशाभावप्रतियोगित्वसंशयसम्भवे दुर्ग्रहमिति तद्बुद्धेर्विशिष्य सेकः पयः करणकइत्यादिज्ञानमपेक्षितम् । तादृशज्ञानेस त्यिपयःकरणकत्वादौ सेकादिवृत्तित्वेन हेतुनोक्त.बाधितत्वग्रहासंभवात । नन्वत्र तादृशाबाधितत्वग्रहे तद्ग्राहकहेतौ च सिच्धात्वर्थत्वेनैव सेकादिज्ञान मुपयन्तव्यम्, ननु सेकवादिनेति नेदमानप्रकारक वाक्यार्थज्ञानापेक्षेति वाच्यम्; लक्षणया सिच्धात्वर्थे दाहादौ पयःकरणकत्वादे र्बाधात्तादृश

धात्वर्थत्वावच्छेदेनच वह्निकरणकत्वादेरपि बाधस्याभावा द्विशिष्यविशे
ष्यतावच्छेदक सेकत्वाद्यवच्छेदेन बाधितत्वस्याभावएव प्रयोजकोवाच्य
इति तद्ग्राहकहेतावपि विशिष्यसेकत्वादिना सेकादेर्निवेशनीयत्वात ।
अन्यथाव्यभिचारात । वेदस्थले च वाक्यार्थस्य प्रमाणान्तराऽगम्यतया
उक्तप्रतीत्या प्रतौ नाबाधितार्थकत्वग्रहसम्भवः, अपितु वेदजन्यज्ञान
त्वादिनैवेति नानुवादकता । येन पुंसा वेदजन्यज्ञानत्वादौ नाबाधितार्थ
कत्व व्याप्तिर्गृहीता तस्य वेदा त्प्रभवत्येव शाब्दधीरिति वदन्ति । तन्न
मनोरमं, विनापिवाक्यार्थस्य विशिष्यग्रहं कथाचिद्गृहीतेपि बाधाज
न्यवाक्यजन्यत्वेनानुमित वक्तृयथार्थज्ञानसमानविषयकत्वादिनाच हेतुना
तात्पर्यघटक लौकिवाक्यार्थविषयक प्रतीते रप्यबाधितार्थावगाहित्व
सम्भवात, तत्र लौकिकस्यप्रमाणताया दुर्वारत्वात ।

वस्तु तस्तु तात्पर्यघटकप्रतीतौ विशिष्यविशेषणवद्विशेष्यविषय
कत्वाभावशंकायां शाब्दबोधानुदयात तद्बुद्धिविरोधि विशिष्य विशेष
णवद्विशेष्यविषयकत्वेन प्रतीतिविषयकं तदुद्देश्यकत्व ज्ञानमेव शाब्दबोध
हेतुरुपेयते, तावतैवच तात्पर्यग्रहे वाक्यार्थज्ञानापेक्षा विशेषणतावच्छेदक
प्रकारकधीविधयाद्गुरुपवादैव । नच पयःकरणकत्ववद्विशेष्यक तात्प्रकारक
सेक प्रतीतीच्छयोच्चारितमित्येव विशेषणांशे निर्धर्मितावच्छेदकतात्पर्य
धीरेवशाब्दबोधहेतुः, तत्रच विशेष्यतावच्छेदकसेकत्वाद्यवच्छेदेन बाध
विशेषणज्ञानमपेक्षितमिति नानुवादकताशब्दस्येतिवाच्यम् ; प्रतीत्यर्थक
पृथक पयःकरणकत्वादिमद्विशेष्यकत्व सेकादिविशेष्यकत्वयो रुभयो
र्ग्रहस्य हेतुतापेक्षया पयःकरणकत्वादिविशिष्ट सेकत्वाद्यवच्छिन्न विष
यकत्वेन प्रतीत्यवगाहिनो ज्ञानस्य हेतुत्वेलाघवात, तादृशज्ञानस्यापि
वक्ष्यमाणप्रणाळ्या वाक्यार्थज्ञानसभवेननिर्वाहात । गौरवसहिष्णुताया
अयुक्तत्वात । वेदस्थलेच तदर्थस्य प्रमाणांतराऽगम्यतया स्वर्गसाधनत्वादि
धर्म प्रकारेणैवयागादिविषयस्य स्वर्गसाधनत्वादिमद्विशेष्यकत्वयागादि

अनुमानञ्च - इदं वाक्यं भ्रमादि विशिष्टज्ञानयो रन्यतरजन्यं, वाक्यत्वादिति ।

विषयकत्वाभ्यां स्वर्गसाधनत्वादि प्रकारक प्रतीतिविषयकस्य तात्पर्य ज्ञानस्य गुरोरप्यगत्या हेतुत्वमुपेयते, अतोनानुवादको वेदइतिमूलाशयः।

विशेषंतोवाक्यार्थस्य तात्पर्यज्ञानविषयत्वे तात्पर्यग्रहमादायापि लौकिकवाक्यजन्यानुभवस्य गृहीतग्राहित्वसंभवात् वक्तृज्ञानानुमानादुपजीवि संसर्गानुमानार्थानां वाक्यार्थानुमिति मादायानुवादकत्वोपपादनं तात्पर्यज्ञानस्याप्युपलक्षकंबोध्यम्। बुबोधयिषार्धीनवाक्य प्रयोक्तृर यथार्थत्वेन विशेषितं वाक्यार्थज्ञानमनुमेयं,तादृशवाक्येवा तादृशज्ञानहेतुकत्वम्, तदनुमानस्यवाक्यार्थसंसर्गानुमान मूलत्वात्, तदनुमाने च वाक्यस्य भ्रमाद्यजन्यत्वे सति भ्रमप्रमासाधारणवाक्यार्थ ज्ञानजन्यत्वं हेतुघटकम् अतः प्रथमं तादृशवाक्यार्थ ज्ञानजन्यत्वसिद्धि रपेक्षितेति तदनुमानं दर्शयति (इदंवाक्यमिति) बाधितार्थक ज्ञानद्वयात्मकभ्रमजन्ये विशिष्टवाक्यार्थज्ञानजन्यत्वाभावा द्व्यभिचारो माभू दिति भ्रमादिरूप दोषस्य साध्येन्तर्भावः। अथाग्रिम परिशेषानुमानसौकर्याय भ्रमनिरास आवश्यकः, पुरुषस्य च कस्मिंश्चदर्थे भ्रान्तत्वनियमेन भ्रमसामान्य निरासो बाधेनासंभवी, अतः प्रकृतवाक्यार्थगोचर भ्रमस्यैव निरसनीयतया प्रकृतवाक्यार्थभ्रमएव साध्येन्तर्भाव्यः. तथाचा बाधित वाक्यार्थगोचर भ्रमाप्रसिद्धया साध्याप्रसिद्धिः; यत्तु प्रकृतविशेष्ये प्रकृतविशेषणभ्रमो नविवक्षितः, अपितु प्रकृतविशेषणभ्रमएव. पयः करणकत्वादिरूपव्यतिरेकि विशेषणस्य च दाहादौ भ्रमप्रसिद्धया न साध्याप्रसिद्धिरिति; तन्न, पयसाम्रुच्चतीत्यादिवाक्यप्रयोक्तुः दाहादौ पयःकरणकत्वादि भ्रमवत्त्वं जानतः प्रकृतविशेषणगोचर भ्रमसामान्यनिरासा संभवेन परिशेषानुमानानिर्वाहात् प्रकृतवाक्ये यथार्थतात्पर्यावधारणासंभवात्; यदपि भ्रमपदं स्वविषयविशेष्यसाकांक्ष प्रकृतविशेषणं विषयकज्ञानपरं, तादृशज्ञानंच कुटालगकानुमितिस्थलीय धूमज्ञानकालीन तत्साकांक्ष तदभावाधिकरणधर्मविषयक ज्ञानांतररूप मत्राभिप्रेत

वाक्यार्थस्थलेपि प्रसिद्ध्यत्येवेति; तदपि न, वक्तरि तादृशज्ञानद्वय वर
दशायां तन्निरासासंभवेन विशिष्टज्ञानासिद्ध्या तात्पर्यावधारणासंभवात्
तद्ग्राहकमपि शाब्दबोधस्यानुभाविकतया तज्ज्ञानस्यावश्यकत्वादिति चेन्न
सामान्यतएव भ्रमस्यनिवेश्यत्वात् । प्रकृतवाक्यार्थ भ्रमनिरासेवक्तरि अन्य
विषयकभ्रमवत्त्वं जानतोपि तज्जन्यत्वस्याबाधितत्वेन भ्रमसामान्यजन्यत्व
प्रकृतवाक्ये सुग्रहं । सामान्यतोभ्रमत्वंच स्वनिरूपितत्व स्ववृत्त्यभाव
प्रतियोगिनिष्ठत्वोभयसम्बन्धेन धर्मिविशिष्टाकांक्षावर्ज्ज्ञानत्वम् । ज्ञानेप्य
कांक्षाया विशेषणतारूपाया विशेषणतासम्बन्धोपगमा तस्य तद्वत्त्व
निर्वाह । नचैवमपि प्रकृतवाक्यार्थभ्रमाप्रसिद्ध्यावक्तरि तन्निरास
दृष्टांत प्रकृतवाक्यार्थज्ञाने भ्रमत्वशंकासम्भवेन प्रकृतवाक्ये भ्रम
जन्यत्वानश्चयासम्भवइति वाच्यम्, वक्तरि तन्निरासासम्भवेपि प्रकृत
वाक्यार्थज्ञाने उक्तभ्रमत्वस्यान्यत्र प्रसिद्धस्य निराससम्भवेन प्रकृत
वाक्ये भ्रमाजन्यत्वस्य सुग्रहत्वेन परिशेषसौकर्यात् ।

अथ प्रकृतवाक्यप्रयोजकस्य वाक्यार्थज्ञानस्य यत्र प्रकृतधर्मिण्य
न्यविशेषणांशे न्यधर्मिणि प्रकृतविशेषणांशे वा भ्रमत्वग्रहः तत्र प्रकृत
वाक्ये भ्रमाजन्यत्वासिद्धिः, तज्जनकज्ञाने भ्रमत्व निरासासम्भवात्,
यद्च परिशेषहेतुघटकं भ्रमाजन्यत्व भ्रमत्वघटकविषयत्वाप्रयोज्यत्वं,
तच्च प्रकृतवाक्य प्रयोज्यविषयतासामान्ये भ्रमत्वघटकत्वनिरासात्सु
ग्रहमित्युच्यते, तदाप्रकृतवाक्यार्थे भ्रान्तत्वनिरासानुपयोगेन "अतएवा
प्रमन्वाक्यार्थैयमभ्रान्तआप्तोक्त ज्ञानुमशक्य" मित्यग्रिमग्रन्थेन वाक्यार्थो
प्रसिद्ध्या भ्रमनिरासानुपपत्त्याशंकाया असंगतिः, एवं वाक्यप्रयोग
का णीभूतवाक्यार्थज्ञानीय किंचिद्विषयांशे यत्र भ्रमत्वग्रहः
तत्र परिशेषासम्भवः एव प्रथमानुमानेन्यतर घटकविशिष्टज्ञानं यदि
यत्किंचिद्धर्मिणि यत्किंचिद्धर्मविशिष्टज्ञानमात्रं विवक्ष्यते तदापरिशेषा
नुमानहेतावपि भ्रमाजन्यत्वेसति तादृशज्ञानभ्रमा ऽन्यतरजन्यत्वमेव
निवेश्यं, तथासति वाक्यार्थान्तरज्ञानजन्य वाक्यान्तरप्रयोक्तरि प्रकृतया

क्यार्थ यथार्थज्ञानरूपसाध्यस्य व्यभिचारः; यदि प्रकृतविशेष्यसाकांक्ष प्रकृतविशेषणज्ञानमेव, व्यभिचारवारणाय परिशेषानुमानहेतौ निवे श्यते तदा तादृशज्ञानत्वेन भ्रमस्यापि परिग्रहा स्पृथक् भ्रमग न्तर्भाव्यान्यतरनिवेशोव्यर्थः, भ्रमाद्यजन्यत्वेसति तादृशज्ञानजन्यत्व निवेशेनैवसामञ्जस्यात्; एवं सति तादृशज्ञानत्वनैव वाक्यार्थज्ञानं निवे श्य तज्जन्यत्वसाधनं परिशेषानुमानहेतुसिद्धयर्थं मचितमिति भ्रमात्मक वाक्यार्थज्ञानं पृथगंतर्भाव्या न्यतरजन्यत्वसाधनविरोधः; नच विशिष्ट ज्ञानपदं प्रकृतविशेष्य विशेषणोभय ज्ञानपरमेवनिराच्यम्, तथासति परिशेषानुमाने तादृशज्ञानस्यैव प्रवेशनीयतया पयःकरणकत्वसमान कालीनस्सेकइत्यादि वाक्यस्यापि भ्रमत्वव्यवहारापत्त्या सेकपयःकरणक त्वोभय विषयक तादृशवाक्यार्थ ज्ञानजन्यतया च तत्प्रयोक्तरि पुं सिहेतुसत्त्वेन, पयःकरणकत्वविशिष्टसेकज्ञानरूपसाध्यस्यचासत्त्वेन व्य भिचारात् ;- मैवं, प्रकृतविशेषणक भ्रमत्वघटकत्व प्रकृतविशेषण विशिष्टज्ञानत्वघटकत्वान्यतररूप वत्प्रकृतविशेष्यनिरूपित विषयता प्रयोज्यत्वमेव भ्रमविशिष्टज्ञानान्यतरजन्यत्वं । भ्रमाद्यजन्यत्वं भ्रमत्व घटकविषयित्वाप्रयोज्यत्वं । वाक्यार्थज्ञानजन्यत्वञ्च स्वबाधितप्रकृतविशेष णक साकांक्ष धर्मिनिरूपितत्वं, स्वधर्मिकप्रकृतविशेषणविषयक ज्ञान विषयतत्साकांक्ष धर्मिनिरूपितत्ववा, तावतापि पयसासिंचतीत्यादिवाक्य जनकस्य कूटलिंगकानुमितिस्थलीय सेकादिरूपधर्मि तद्धर्मपयःकरणक त्वादिविषयक ज्ञानद्वयस्यापि संग्रहः । तदसंग्रहे तज्जन्यवाक्यप्रयोक्त रि पयः करणकत्वविशिष्टसेकज्ञानरूप साध्यासत्त्वेन व्यभिचारात्तत्सं ग्रहआवश्यकः । प्रकृतविशेषण विशिष्टज्ञानत्व घटकत्वं च स्वविष यकज्ञानविषय प्रकृतविशेषण साकांक्ष धर्मिनिरूपितत्वं । अत्रापि स्व धर्मि । एतच्छरीरे सेकादिरूपधर्मिण ससेकत्वादिना नप्रवेशः, अपितु सामान्यरूपेणेवेति एतदन्तर्गततया सेकत्वावच्छिन्ने पयःकरणकत्वा दिविशिष्टज्ञानविषयत्व रूपविशेषणसंसर्गसाधकहेत्वंसिद्धया नपरिशेष

नुमानवैयर्थ्यं । भ्रमविषयतावि शिष्ट तादृशविषयितयो ज्ञानभेदाभेदा वनिवेश्य प्रकृतविशेषण साकांक्ष प्रकृतविशेष्यविषयितात्वेन निवेश सम्भवेपि भ्रमविषयित्वाप्रयोज्यत्वविशिष्टतादृशविषयितात्व विशिष्टज्ञान र्विषयितात्वान्यतरवद्विषयिताप्रयोज्यत्वघटितहेतौ विशिष्टविषयिताघटित साध्यस्य सुग्रहव्याप्तिकतया न्यतरत्वेन विषयिताद्वयप्रवेशः । तादृश व्याप्ते स्सुग्रहत्वं चैकतररूपशून्यस्या न्यतररूपवत्त्वे परविशेषवत्त्व मावश्यकमिति ग्रहस्य झटितिसम्भवात् । वाक्यप्रयोजकज्ञाने प्रकृत विशेष्ये विशेषतः प्रकृतविशेषणसाकांक्षत्वाग्रहदशाया मनुमाननिर्वा हार्थ मप्यन्यतरवत्त्वेन विषयताद्वयनिवेशः । नच शुकादिवाक्ये प्रकृत विशेष्यान्तर्भावेणान्यविशेषणस्य प्रकृतविशेष्यानन्तर्भावेण प्रकृतविशेष णस्य वा प्रत्यायनेच्छया प्रयुक्ते च वाक्ये व्यभिचारवारणाय वाक्यत्वा दिति हेतौ वाक्यपदं प्रकृतविशेषणसाकांक्ष प्रकृतविशेष्यप्रत्यायनेच्छयो च्चरितवाक्यपरं तथाच हेतुप्रसिद्ध्यनुरोधेन प्रकृतविशेष्ये प्रकृतविशेषण साकांक्षतायां विशेषताग्रह. प्रकृतसाध्यकानुमाने प्यपेक्षितइति वाच्यम्, प्रकृतविशेषणसाकांक्षत्वेन प्रकृतविशेष्यं प्रतीतिविशेषणतया वगाहमाने च्छाया हेतुघटकतयातादृशेच्छात्वेनेच्छाभाने वगाहनांशएव साकांक्षत्वे नात्यन्तार्धभानात प्रकृतविशेष्ये साकांक्षतायां हेतुग्रहेणा विषयीकरणात । विशेषणसाकांक्ष यद्विशेष्य तत्प्रतीतीच्छात्वेनेच्छाया हेतुघटकत्वे पयः करणकत्वानुपरक्तपयःकरणकसेकविषयिकाया स्सेकप्रतीति र्भवत्विती च्छाया अपि संग्रहेण तादृशेच्छाया सिंचतीत्यादिवाक्यप्रयोक्तरि पयःकरणकत्व विशिष्टसेकज्ञानशून्ये व्यभिचारस्य दुर्वारत्वात । अस्तुवा भ्रमविशिष्टज्ञानयोः प्रकृतविशेषणसाकांक्ष विशेष्यज्ञानत्वेनोपादानं, वि· शिष्टज्ञानपदमपि तादृशज्ञानपरमेव, भ्रमादिपद मतद्गुणसंविज्ञान बहु व्रीहिणाप्रमादाद्वा त्रयपरमवात ।

अथ प्रकृतवाक्य प्रयोजकसेकादिविषयतायां पयः करणकत्वा दिभ्रमत्वाघटकत्वनिश्चय मंतरेण पयसासिंचतीत्यादिवाक्ये तद्भ्रमत्वघट कत्वविषयित्वाप्रयोज्यत्वस्य दुर्ग्रहतया परिशेषानुमानहेतुग्रहो नसम्भव तीति दर्शितानुगतरूपेण ०सेकादिरूपविशेष्यविषयितायां *भ्रमत्वा घटकत्वनिश्चयापेक्षित [भ्रमनिरासोपि तन्निश्चय] एव, तथा च परि

शेषानुमानं विनापि भ्रमत्वाघटकनिरुक्तसाध्य घटकानुगतरूपवद्विषयिताकत्वस्य सेकातोग्रहेण तेनैवहेतुना पयःकरणकत्वादिसंसर्गसाधनं सम्भवतीति चेत? सत्यम् । तथापि यत्र निरुक्तविषयितायां भ्रमत्वाघटकत्व मगृहीत्वैव प्रकृतवाक्ये शब्दादिना भ्रमत्वघटकविषयित्वा प्रयोज्यत्वग्रह स्तत्र परिशेषानुमानस्योक्तविषयितायां भ्रमत्वाघटकत्व ज्ञानानपेक्षितया तत्स्थलाभिप्रायेण तदादरः । प्रकृतवाक्यार्थमज्ञा त्वापि प्रकृतवाक्य प्रयोजकविषयितात्वादिना वाक्यार्थविषयितायां भ्रम त्वाघटकत्वनिश्चयेन वाक्ये भ्रमत्वघटकविषयित्वाप्रयोज्यत्वनिश्चयसम्भ वेपि प्रकृतवाक्यार्थविषयितात्वेनैव भ्रमत्वाघटकत्वनिश्चयोपेक्षित इत्य भिमानेनापाततोस्मिन्वाक्यार्थ इत्यादिशंकनमिति तद्विरोधो किंचित्करः । अथवा स्वबाधितधर्म साकांक्षधर्मिज्ञानं भ्रमपदार्थः ।

अथ यत्रकूटालिंगक प्रमानुमित्युत्पादस्थानाभिषिक्तबाधित धर्म धर्मिविषयक ज्ञानद्वया द्विशिष्टार्थकवाक्यप्रयोग स्तत्रवाक्ये उक्तान्यतर जन्यत्वाभावाद्व्यभिचारइतिचेन्न; - तत्रामिथस्साकांक्षधर्मधर्मिविषयक ज्ञानजनकव्याप्त्यादिभ्रमप्रयोज्यतयैव निरुक्त साध्यसत्वात् । विशिष्ट ज्ञानपदंवा स्वबाधितधर्मसाकांक्ष धर्मिविषयक ज्ञानपरं, तथात्वंच ज्ञानां तरविषयधर्मसाकाक्षधर्मि ज्ञानसाधारणमपीति सामञ्जस्यात्। तन्मते वर्णानां नित्यतयाजन्यपदं जन्यानुपूर्वीकार्थकंवाच्यम् । प्रतारणस्थलेपि विपरीतविशिष्टार्थ मप्रतीत्यापि वाक्यरचनया तत्र प्रकृतवाक्यार्थज्ञाना जन्यत्वा द्व्यभिचारइति प्रतारणाया आदिपदेन परिग्रहः । नच प्रतारणास्थले आहार्यवाक्यार्थ ज्ञानस्यावश्यकतया न व्यभिचारइति वाच्यम्, स्वप्रतीत विपरीतप्रत्यायनेच्छातो वाक्यार्थज्ञानंविनापि त द्विशेष्यक तत्प्रकारकज्ञानवाक्यार्थज्ञानं ज्ञात्वा तत्प्रतीतीच्छया वाक्य रचनासम्भवात् । नचैवमप्रतारकस्यापिं तादृशरीत्या वाक्यार्थज्ञानंविना वाक्यप्रयोगसम्भवां त्प्रतारणाया आदिपदेन ग्रहणेपि व्यभिचारोदुर्वार एवेति वाच्यम्, यतस्स्वप्रतीतविपरीतार्थप्रत्यायनेच्छा नात्र प्रतारण

ततो भ्रमादिनिरासेसति परिशेषाद्वाक्यार्थज्ञाना

पदेन विवक्षिता, अपितु स्वाप्रतीतार्थप्रत्यायनेच्छैव, एवं च वाक्यार्थ ज्ञानानधीन वाक्यार्थप्रत्यायनेच्छामात्रस्य साध्यघटकतया नोक्तस्थळे व्यभिचारः । एवं प्रमादोप्यादिपदेन ग्राह्यः । प्रमादश्चानुपूर्व्यन्तर निर्वाहकमनवधानम् । यत्र घटोनास्तीति प्रतिपादनेच्छया। घटोनास्तीति वक्तव्ये नकारमनुच्चार्य घटोस्तीति प्रयोगः, प्रमादस्य तादृशसाध्या घटकत्वे तत्र घटासत्वरूपवाक्यार्थप्रतिपादनेच्छाधीन वाक्यत्वरूपालिं गमस्ति नैतु तादृशवाक्यार्थ ज्ञानजन्यत्वं, भिन्नविषयकत्वादिति व्यभि चारस्यात् ; अतस्तत्रसाध्यसत्त्वाय तदुपादानम् । करणापाटवमप्या दिपदग्राह्यम् । तत्र करणस्य कण्ठादिरूपवर्णस्थानस्या पाटवं एकव र्णस्थानस्या परवर्णस्थानत्व भ्रमविषयत्वम् । यत्रपटास्तित्व प्रतिपा दनेच्छया पटोस्तीति वर्णानामुच्चारणे कर्तव्ये कण्ठे ओष्ठ्यपकारस्थानत्व भ्रमेण तदुपादानकप्रयत्नात्तत्रचेष्टोत्पत्त्यातत्संयोगेन घकारोत्पत्तौ घटो स्तीतिवाक्य मुच्चारितं भवति तस्य भिन्नविषयकत्वेन न वक्तृवाक्यार्थ ज्ञानजन्यत्वमिति करणापाटवोपादानादेव तत्रसाध्यसत्वनिर्वाहः। साध्ये हेतौ च प्रकृतविशेष्य विशेषणयो र्यत्तत्पदेनोपादाय सामान्य व्याप्त्या दरान्मद्वाक्यवदिति दृष्टांतसंगतिः (भ्रमादिनिरासेसतीति) वक्तुर्यन्तु मानादिना भ्रमादिरूपदोष चतुष्टयाभावनिर्णये सतीत्यर्थः । प्रकृतवा क्यार्थगोचर भ्रमाभावसिद्धिः प्रकृतवाक्यार्थ विषयितायावा बाधित धर्मवाकांक्ष धर्मिविषयकत्वरूप भ्रमत्वस्य तादृशधर्मिनिरूपि तत्वस्य वा अभावसिद्धिपर्यवसितेति प्रागुक्तम् । तत्सिद्धिप्रयोजकं चायं वक्ता भ्रमत्वशून्यप्रकृतवाक्यार्थ ज्ञानकः, भ्रमत्वाघटकस्वज्ञानीयं प्रकृतवाक्यार्थ विषयिताकोवा निर्दोषलिंगादिना अभ्यासगृहीत प्रकृत वाक्यार्थत्वादित्यनुमानम् । एव मप्रतारकत्वं । एकविशेष्याभाव सहकृत सामान्यघटिता परविशेषसाधकहेतु रेव परिशेषपदार्थः। तादृश

नुमानं – अयं वक्ता स्वप्रयुक्तवाक्यार्थ यथार्थ ज्ञानवान् ,

श्चायं वक्तेति वक्तृपक्षकानुमान हेतुरपि, तस्य भ्रमाद्यजन्यत्वाभाव सहित भ्रमाद्यन्यतरजन्यत्व रूपसामान्यात्मकत्वेपि तदघटितत्वात , वाक्यार्थ यथार्थज्ञान जन्यत्वरूपा परविशेषसाधकत्वविरहेपि वाक्य जनकत्वस्य साध्यतावच्छेदक कोटिप्रवेशेन तादृशविशेषण साधक त्वात । वाक्यार्थज्ञानेत्यस्य यथार्थेत्यादिः । परिशेषानुमान प्रयोगारूढ़ माह (अयमिति) (स्वप्रयुक्तवाक्यार्थ यथार्थज्ञानवानिति) स्वप्रयुक्तं यद्वाक्यं तदर्थगोचरयथार्थ ज्ञानवा नित्यर्थः । यथार्थज्ञानं च तन्मते विशिष्टज्ञानमेव । तदनिवेशे यथार्थज्ञानविषयत्वरूपपदार्थ पक्षकानु मानहेतुः पक्षे नसिद्धयतीति तन्निवेशः ।

अत्र सेकः पयः करणक इत्यादिज्ञानस्य तत्पुरुषप्रयुक्त वाक्यार्थ विषयकत्वेन पयसासिञ्चतीति वाक्यार्थविषयकत्वेन साध्यसिद्धावपि सेकत्वावच्छिन्ने पयःकरणकत्वादि ससर्गसाधक तद्विशिष्टज्ञान विषय त्वात्[वि]ज्ञानेतत्रतत्संसर्गसाधकवक्ष्यमाणानुमाना निर्वाहइतिसेकादिविषय क पयःकरणकत्व विशिष्टज्ञानत्वरूपेण साध्यत्वं विवक्षितम् । तेन रूपेण ज्ञानसिद्धौ च सेकत्वावच्छिन्ने तादृश विशिष्टज्ञान विषयत्वं ज्ञाननिष्ठ तद्विषयकत्व तन्निष्ठज्ञानविषययो स्तुल्यतया सिद्धयति । हेतुः भ्रमाद्यजन्य त्वविशेषित निरुक्तसेकादिविषयता प्रमादाद्यन्यतर प्रयोज्यवाक्यप्रयो क्तृत्वं, अतोन पयःकरणकत्वाविशिष्ट सेकज्ञानशून्ये भ्रमाद्यजन्या न्यार्थकवाक्यप्रयोक्तरि व्यभिचारः । यो भ्रमाद्यजन्य यद्विशेषणविशेष्य घटितोक्तान्यतर प्रयोज्य वाक्यप्रयोक्ता स तद्धर्मविशिष्ट तद्धर्मिविषय क ज्ञानवानिति सामान्यतोव्याप्तिः । अतएववाक्यार्थभ्रमजन्य वह्निनासि

भ्रमाद्यजन्यवाक्यप्रयोक्तृत्वात् , अहमिवेति ।
नत्वाप्तत्वात् , साध्याविशेषात् । ततएतेपदार्था
यथोचित संसर्गवन्तः,

वतीत्यादिवाक्यप्रयोक्तरि तादृशवाक्यार्थगोचर यथार्थ ज्ञाना प्रसिद्धया तद्घटित साध्यवत्त्वा निर्वाहेण प्रसक्तं व्यभिचारं वारयितुं (भ्रमाद्यज न्येति) भ्रमाद्यजन्यत्वं पूर्वानुक्तार्थकम् । आदिपदा त्प्रतारणा प्रमादकर णा पाटवानां परिग्रहः । प्रतरणा जन्यान्यत्वोपादाना त्पूर्वोक्तरीत्या वाक्यार्थज्ञानं ज्ञात्वापिवंचनेच्छारूप प्रतारणया यद्वाक्य प्रयुज्यते तद्वाक्य स्य तद्वाक्यार्थज्ञानाजन्यत्वेपि तद्वाक्यार्थज्ञानप्रतारणान्यतर जन्यत्वसत्वा द्धेतु घटकविशेष्य दळसत्वा त्तत्प्रयोक्तरि तद्वाक्यार्थ ज्ञानाभावेपि न व्यभिचारः । एवं प्रमादकरणापाटवयो रुपादानात् तदन्यतर जन्यत्वत्वावच्छिन्नमेव वाक्येसिद्धं, नतु तद्धर्मसाकांक्ष तद्धर्मज्ञानरूप वाक्यार्थ ज्ञानजन्यत्वत्वावच्छिन्नम् , तादृशज्ञानजन्यत्वस्य साध्यतानव च्छेदकत्वात् । अतोवाक्यार्थज्ञानजन्यत्वमुपेक्ष्य वाक्यार्थज्ञानान्य तम जन्यत्वेनैव वाक्यं विशेषितम् । नचा सिद्धिमात्र वारकत्वेन प्रतार णादि विशेषणवैयर्थ्यम्, यथासन्निवेश अवैयर्थ्यात् (अहमिवेति) भ्रमाद्यजन्यघटमित्यादिवाक्यप्रयोक्ता वाक्यार्थगोचरयथार्थज्ञानवांश्च । अहमिवेत्यनंतरमिति पदं पूरणीयम् । तेनसहानुमानं चेति पूर्वोक्तं संबद्धयते (नत्वाप्तत्वादिति) हेतूकार्यमितिशेषः । (साध्याविशेषा दिति) प्रकृतवाक्यार्थ गोचरयथार्थज्ञानवत्त्वस्याप्तपदार्थत्वादितिभावः । भ्रमादिदोषशून्यत्व रूपाप्तत्वस्य हेतुत्वेच शुकादौ व्यभिचारः, तच्छू न्यत्वेसति प्रकृतवाक्यार्थ ज्ञानवत्वंत्वासिद्धम् , पूर्वानुमानस्य विशिष्यवि शेष्यासाधकत्वात् , एवं सामान्यतो भ्रमाभावः पुरुषेऽसिद्धः, प्रकृतवा क्यार्थभ्रमश्चा प्रसिद्धइति न तच्छून्यत्वस्य हेतुप्रवेशसंभवः, भ्रम त्वाभाववत्प्रकृतवाक्यार्थ ज्ञानवत्वंच साध्यपर्यवसितमेवेतिभावः (एते पदार्थाइति) सैकादयइत्यर्थः (यथोचितसंसर्गवन्तइति) पयः करण

यथार्थज्ञान विषयत्वात्,

कत्वादि प्रतियोगितात्पर्यविषय संसर्गवंत इत्यर्थः । तात्पर्यविषयसंस र्गस्यापि न तत्त्वेन निवेशः, तेन रूपेण तस्य वाक्यार्थावटकत्वात्, अपि तु तात्पर्यविषयतावच्छेदकाधाराधेयतात्वादिरूपेण । तत्तत् संसर्गस्य संसर्गविधयैव वाक्यार्थ घटकतया तत्तत्संबधेन प्रकृतविशेष्ये प्रकृत विशेषणमेव साध्यतयाविवक्षितं (यथार्थज्ञानविषयत्वादिति) तत्तत्सं बंधेन तत्तद्विशेषणकविशिष्ट बुद्धिविषयत्वादित्यर्थः । तत्तत्सम्बन्धेन तत्तद्विशेषणक ज्ञानत्वंच तत्तत्संबंधावच्छिन्न स्वनिरूपिताकांक्षा व त्तद्धर्मिविषयताकत्वम् । आकांक्षाच विशेषणनिष्ठा विशेष्यनिरूपिता विशेषणताख्याविषयतैव । साच तन्मते विशिष्टज्ञानाविषयेणापि संबंधे नावच्छिद्यते । तथाच तत्संबंधावच्छिन्न तद्धर्मनिष्ठविशेषणताख्य स्व· विषयतानिरूपितज्ञानविषयत्व मत्र हेतुः । स्वंज्ञानम् । यत्संबधाव च्छिन्न यन्निष्ठविशेषणताख्य स्वविषयतानिरूपित ज्ञानविषयत्व यत्र तत्र तेनसंबंधेन तद्वत्तित्वमिति सामान्यतोव्याप्तिः । तेनयत्पदार्थस्य यादृशसंबंधः क्वचिदपि येनपुंसा नगृहीत स्तेनसंबन्धेन तद्धर्मविशिष्टज्ञा नविषयत्वंवा तस्यापि प्रकृतविशेष्ये तदीयतादृशसंबन्धरूपंवाक्यार्थ सिद्धिः ।[संबंधविशेषावच्छिन्न स्वाकांक्षायानिवेशात् । साध्यहेत्वोरेक संबन्धनिवेशात् कालिकादिसंबन्धेन पयःकरणकत्वादिविशिष्टबुद्धि विशेष्यदाहादौ दैशिकस्वरूपादिसंबन्धेन पयःकरणकत्वादिविरहेपि न व्यभिचारः । विशेणतारूपाकांक्षाया तज्ज्ञानीयत्वनिवेशा त्तद्धर्म भ्रमविषये तत्संसर्गविरहेपि न व्यभिचारः । विशेषणतारूपाकांक्षा निवेशा द्विशेष्यसंबन्धाननुयोगिनि विशेषणे विशेष्यवत्त्वविरहेपि विशे ष्यतारूपाकांक्षा निरूपितविशेणता रूपविषयत्व सत्वेपि न व्यभि चारः । वक्तृपक्षकानुमाना त्सेकादिविशेष्यकपयः करणकत्वादि प्रका रकयथार्थ ज्ञानसिद्धावपि सेकादौ तादृशज्ञानविशेष्यत्वंरूपहेतु र्न

आप्तोक्त पदस्मारितत्वाद्वा, मदुक्त पदार्थवदिति ।

ननु – वक्तु र्ज्ञानविशेषोनुमेयः, ज्ञाने

सिद्धः, अनुमाने तुल्यवित्तिवेद्यतायां मानाभावादतोहेत्वंतरमाह (आप्तोक्तेति) स्व विशेष्यक तत्संबन्धक तद्विशेषणक ज्ञानविशेष्यत्वा सिद्धावपि सेकादिविशेष्यकविशिष्टज्ञानसिद्धौ तत्रतस्यसुग्रहत्वान्नासिद्धि रितिभावः (मदुक्तपदार्थवदिति) स्वविशेष्यकघटादि विशिष्टज्ञानवता मया प्रयुक्तपदेन स्मारितं घटादिसंसर्गवत् कर्मत्वादिकमित्यर्थः । मदुक्तत्वकथनं आप्तोक्तत्वगर्भहेत्वभिप्रायेण । "इती" त्यनंतरमनुमेयमिति पूरणीयम् । तेनैव समं तदनंतरमित्यर्थकं "तत" इति पूर्वोक्तं संबद्ध्यते ।

अथ वक्तृज्ञानानुमाने प्रकृतवाक्यार्थज्ञानमेव साध्यमुपगंतव्यम्, तस्य च वाक्यांतरार्थ ज्ञानसाधारणरूपेण साध्यत्वे तेनैव रूपेण तस्य प्रकृतवाक्यार्थसाधकहेतौ प्रवेश्यतया दाहादावपि हेतुसत्वेन तत्रपयः करणकत्वादि संसर्गवत्त्वासत्वेन व्यभिचारस्स्यादित्यर्थान्तर ज्ञान व्यावृत्तरूपेण तस्य साध्यता स्वीकार्या, तच्चरूपं प्रकृतवाक्यार्थविषयकत्वमेव, तस्य च वक्तृज्ञानानुमितेः पूर्वं दुर्ज्ञेयतया न व्याप्ति ग्रहसंभवः; नच विशेष्यमनन्तर्भाव्य तत्तद्विशेषण विशिष्टज्ञानत्वेनैव साध्यतास्वीकरणीया, तथाच न साध्यस्य वाक्यार्थ घटितत्वमिति वाच्यं, तथासति वाक्यार्थ साधकानुमानपक्षसेकादिरूप विशेष्यार्थे पयःकरणकत्वादि विशिष्टज्ञानविषयत्वादिरूपहेत्वसिद्धया वाक्यार्थसाधकानुमानानवतरा दित्येतत्सामान्यव्याप्ता अप्रसिद्धसाध्यसिद्धिर्नविचारसहा, एकव्याप्तेः व्याप्यान्तरसाधकत्वेऽति प्रसंगादित्याशयेनशंकते (नन्विति) (वक्तुर्ज्ञानविशेषइति) वाक्यान्तरार्थ ज्ञानत्व

चार्थएवविशेषः,. नत्वर्थाधीनोन्यः, " अर्थेनैव विशेष " इत्यौपचारिकी तृतीया,

---

वृत्तरूपावच्छिन्न मुक्तज्ञानमित्यर्थः । " अर्थएव " - अर्थविशेषविषय कत्वमेव । " विशेषः " - अर्थान्तरज्ञानव्यावर्तकरूपम् । " अर्थाधी नोन्यः " - अर्थाधीनपदार्थान्तरम् । मानाभावादितिशेषः ।

नन्वेवं " अर्थेनैवविशेषोहि निराकारतयाधिया " मित्याचार्यका रिकायां विशेषस्य व्यावर्तकरूपस्य हेतुतृतीयया र्थाधीनत्व•कथनवि रोधइत्यतआह (अर्थेनैवेति) " औपचारिकी "- अभेदलाक्षणिकी । तथाच ' धियां '- बुद्धीनां, ' विशेषः ' - अर्थान्तरज्ञानव्यावर्तकरूपं, ' अर्थेनैव ',- अर्थादर्थविषयकत्वाद्वा अभिन्नएव, नतु तद्भिन्नः । साकारवादिमते विषय विषयिभाव नियामकतया घटादिज्ञानस्य स्वात्मक घटादिविषयकतया विषयभेदकत्वे घटत्वपटादिरेवभेदकः, नतु ज्ञानातिरिक्तो विषयस्तद्भेदकः, बाह्यार्थस्या ळीकत्वादिति तन्म तेर्थस्यैव भेदकत्वमनुपपन्नं, अतस्तन्मतं प्रतिक्षिपति (निराकारतयेति). बाह्यार्थभंगे कदाचिद्घटाकारं कदाचित्पटाकारं ज्ञानमित्यत्र विषयेंद्रिय सन्निकर्षादेर्नियामकत्वासभवा द्बाह्यार्थस्य प्रामाणिकत्वे मानाभावे च ज्ञा नस्य घटपटादिस्वरूपतात्मक तत्तदाकारताविरहेणेत्यर्थः ।[इतिकारि काव्याख्या ।]

नन्वनुशासनिकातिरिक्ते ऽर्थे लक्षणया साधुत्वे कर्तृत्वाद्यर्थे षष्ठ्यादिविभक्ते रनुशासनमफलम्, अनुशासनं विनापि तृतीयाया अभेदार्थकत्वइव कर्तृत्वाद्यर्थे षष्ठ्यादे र्लक्षणया साधुत्वसं भवात्; " सुपां सुलुगि " त्यादिसूत्रे व्यत्ययानुशासन मप्यफलं, तत्फलंहि देहोनस्वादिना देहिनोमादे रुपस्थापने कर्मत्वादिबोधोपपा दनम्, सुब्विभक्तौ लक्षणास्वीकारेचा माऽनुपस्थापनेपि स्वादिना

तथाच वाक्यार्थज्ञानविशेषो ऽनुमेयः, तस्य च प्रसिद्ध्यानव्याप्तिग्रहः, अतएवास्मिन्वाक्यार्थेऽयमभ्रांत आप्तोवेति ज्ञातुमशक्यमिति शब्दएव तमर्थं बोधयेदितिचेन्न;—तात्पर्यावधारणार्थं त्वयाप्य

लक्षणया कर्मत्वादिबोधनसंभवति, एव मनुशासनं विनापि विभक्ते रर्थान्तरसाध्यत्वे "द्व्येकयोर्द्वित्वचैकत्वचने" इत्यनुशासनमप्यफलं, एकं एकत्वं वक्तीत्यन्वर्थैकवचनसंज्ञासामर्थ्या देवैकवचनादे रेकत्वार्थकताज्ञाभाव ।

अत्रकेचित उक्तानुशासनसार्थक्यायैक विभक्ते रपरविभक्त्यर्थ लक्षणानपगमा दभेदस्य विभक्त्यंतरार्थत्वविरहेण तत्रतृतीयालक्षणायां सुब्विकलौ न लक्षणेति प्रवादाविरोध इत्याहुः ।

मिश्रास्तु विशेष इतरव्यावृत्तिः, अर्थस्येतरभेदानुमितौ लिंगत्वेपि लिंगज्ञानमेवानुमितिजनकतया र्थपदमप्यर्थज्ञानलाक्षणिकमित्यौपचारिक पदयोगा त्तृतीयाया औपचारिकत्वमिति व्याचक्रुः ।

(वाक्यार्थज्ञानविशेषइति) प्रकृतवाक्यार्थविशेषितं ज्ञानमित्यर्थः । ' तस्य " - तादृशज्ञानस्य । " अप्रसिद्ध्या " - वाक्यार्थांशेन वस्तुज्ञानानुमज्ञानेन । " अतएव " - वाक्यार्थस्य पूर्वमग्रहादेव (आप्तइति) भ्रमादिरूपदोषरहितइत्यर्थः (इति ज्ञातुमशक्यमिति) सर्वत्रार्थे भ्रांतत्वस्याप्तत्वस्यवा कुत्रापि पुंस्यसत्त्वेन प्रकृतवाक्यार्थं भ्रान्त भाव्य स्वीकरणीय मीदृशज्ञानमशक्यमित्यर्थः (शब्दएवेति) एवकारेण वक्तृज्ञानानुमितिं व्यवच्छेदः । एवं च शब्दस्य नानुवादकत्व मित्या शयः (तात्पर्यावधारणार्थमिति) उक्तयुक्तिभि स्तात्पर्यज्ञानस्य हेतुताय

शाब्द्याएव संसर्गविशेषप्रतीते रवश्याभ्युपेयत्वात् ।
अन्यथा क तात्पर्यनिरूपणं । अतएवाप्तोक्तत्व
भ्रमाद्यजन्यत्व निरूपणमपि सुकरं । शाब्दंतु संसर्ग
ज्ञानं प्रथमं नभवति, ज्ञानांतरंतु भवत्येव । नचैवं

स्तवा प्यावश्यकत्वादिति भावः । " संसर्गविशेषप्रतीतेः " - प्रकृत वाक्यार्थप्रतीतेः (अवश्याभ्युपेयत्वादिति) तथाच तदर्थ वक्तृवाक्यार्थ ज्ञानानुमानस्य भवतापि स्वीकरणीयतया तदुपायानुसरणं द्वयो रेवा वश्यकमिति भावः । " अन्यथा " - शाब्दबोधा त्पूर्व मशाब्दवा- क्यार्थप्रतीत्यनभ्युपगमे (कृतात्पर्यनिरूपणमिति) वाक्यार्थविशेषोपरक्त तात्पर्यज्ञानासम्भव इत्यर्थः । " अत एव " - अशाब्दवाक्यार्थज्ञानस्य प्रागभ्युपेयत्वा देव (आप्तोक्तत्वेति) वाक्य इत्यादिः । " निरू पणं " - निर्णयः (सुकरमिति) वक्तरि प्रकृतवाक्यार्थभ्रमादिनिरास सम्भवादिति भावः । अयं चाभ्युपगमवादः, वाक्यार्थ मज्ञात्वापि स्वयं भ्रमत्वाभाववत्प्रकृतविशेष्यसाकांक्ष प्रकृतविशेषणज्ञानक इत्यादि रीत्या वक्तरि प्रकृतवाक्यार्थभ्रमादिनिराससम्भवेन परिशेषानुमान निर्वाहात् । अन्यथा परिशेषानुमानानन्तर मेव संसर्गानुमानं त्परि शेषानुमान निर्वाहकभ्रमादिनिरासे संसर्गानुमानापेक्षया न्योन्याश्रया पातात । ननु वाक्यार्थज्ञाने तात्पर्यधिर्या हेतुतया तात्पर्यज्ञान मपेक्षणीयं, वाक्यार्थज्ञानं च प्रथमतः कथं भवे दित्याशंक्य निराक- रोति (शाब्दमिति) " प्रथमं " - तात्पर्यज्ञाना त्पूर्वम् । " न भवति" तत्रैव तात्पर्यज्ञानस्य हेतुत्वादिति भावः । " ज्ञानान्तरं " - आनु मानिकसंसर्गज्ञानं (भवत्येवेति) तत्र तात्पर्यज्ञानाहेतुत्वादिति भावः (नचैवमिति) " एवं " - शाब्दा त्पूर्वं तात्पर्यज्ञानानुरोधेना

शब्दोनप्रमाणं, तदर्थस्य प्रागेबसिद्धेरितिवाच्यं;
तवापि तुल्यत्वात् । ननु तथापि कथमर्थविशेष
सिद्धिः, विंशेषेणव्याप्त्यग्रहादिति चेन्न;—यथायो
यत्र प्रवर्तते सतज्जानातीति सामान्यतो व्याप्ति
ज्ञाने पाकादौ प्रवृत्तिदर्शना त्पाकविषयककार्य

शाब्दवाक्यार्थधीस्वीकारे (नप्रमाणमिति) अननुभावक मित्यर्थः । भवेदिति शेषः (प्रागेव सिद्धे रिति) प्रागेवानुमानतः प्रवृत्त्यादि क्षमज्ञाननिष्पत्ते रित्यर्थः (तवापीति) तात्पर्यज्ञानहेतुतायां अनव षादादितिभावः । ननूपायाभावेन प्रकृतवाक्यार्थां सिद्धौ तात्पर्यस्य दुरवधारणतया तज्ज्ञानहेतुतायां बाधकग्रस्तत्वेन युक्तिसहस्रेणापि तत्साधनमशक्यमिति तदहेतुत्वे दर्शितानुपपत्तयोन्य थैव समाधेया इत्याशयेन पृच्छति (नन्विति) (तथापीति) तात्पर्यज्ञाने नियमतो वाक्यार्थज्ञानापेक्षणेपित्यर्थः । "अर्थविशेषसिद्धिः"- विशिष्ट प्रकृतवाक्यार्थसिद्धिः (विशेषेण व्याप्त्यग्रहादिति) प्रकृतवाक्यार्थ ज्ञानस्य प्रागसिद्धया विशेषरूपेण तद्व्याप्त्यग्रहा त्पारिशेष्यानुमानासंभ वा संसर्गानुमानाप्रवृत्तेरित्यर्थः । साध्यहेत्वो रेकपदार्थघटितां प्रकृतहेतुसाध्यसजातीयहेत्वंतर साध्यांतरयो र्व्याप्तिग्रहादपि प्रकृतहेतौ पक्षधर्मता ज्ञाना त्पक्षे प्रकृतसाध्यस्या प्रसिद्धस्यापि सिद्धिः, अन्यथा पाकादिविषयककार्यताज्ञानाद् विशेषतोऽज्ञानेपि स्तन्यपानादिकार्यता ज्ञा तद्बोधर प्रवृत्तौ व्याप्तिग्रहाप्रयोज्यबुद्धादौ पाकादिकार्यताज्ञान देस्सिद्धयनुपपत्तेः व्युत्पत्त्याद्यनिर्वाहादिति समाधत्ते (नयथाहि (जानातीति) कार्यतयादिः । सामान्यतो व्याप्तिग्रहापेक्षा च प्र तद्धेतुजातीये क्वचि त्साध्यजातीयव्यभिचारग्रहे सामान्यव्याप्तिग्रहानुमि नुदयाद । नच पाकरूपपक्षे प्रवृत्तिविषयत्वरूपहेतुना कार्यताज्ञा विषयत्वसाधनेनैव पाकविषयक कार्यता ज्ञानसिद्धया न्यदीयव्या

ता ज्ञानानुमानं, यथाच चेष्टाविशेषदर्शना दृश संख्याभिप्रायंमात्रज्ञाने घटे तच्चेष्टादर्शनाद्घटे दशत्व ज्ञानं, तथा सामान्यतो व्याप्त्यात्रापि विशेषसिद्धिः ।

न्यसिद्धचौपयिकत्व मप्रामाणिकमितिवाच्यं, तावता प्रवृत्तपुरुषीय पाककार्यताज्ञानसिद्धयानिर्वाहा त्पुरुषे कार्यता ज्ञानसंशयानिवृत्तेः, तत्पुरुषीय तत्कालीनकार्यता ज्ञानएव प्रयोज्यवृद्धवाक्यान्वय• व्यति रेकानुविधानग्रहेण शब्दस्यानुभावकतासिद्धे स्तादृशकार्यता ज्ञान सिद्धेरावश्यकत्वाच्च । मिश्रास्तु एतदनुशयस्यैव स्थलांतरानु सरण बीजत्वमाहुः' (चेष्टाविशेषेति) यदीय संख्याविशेष •प्रत्यायनेच्छा धीनं यद्दशांगुळयुत्क्षे पणं त त्तदीयसंख्याविशेषाभिप्रायपूर्वक मिति सहचारदर्शनं घटादिक मनंतर्भाव्य यत्रजातं, तत्र कतिघटास्संतीति प्रश्नानंतरं दशांगुल्युत्क्षेपणं दृष्ट्वा घटविषयक घटीयदशत्व संख्याभि प्रायं ज्ञात्वा घटे तादृशाभिप्रायपूर्वकत्वयो व्याप्त्यादिविषयत्वेन दशत्वशंख्यामनुमिनोति, तत्रघटीयदशत्व संख्याभिप्रायपूर्वकमिति सा मान्यव्याप्तया तादृशचेष्टादर्शना दृशत्वसंख्याभिप्रायस्य सामान्यतएव ग्रहसंभवेपि सामान्यतोव्याप्तयैव घटदशसंख्याभि प्रायविषयत्व ज्ञानमि त्यर्थः । नच तत्रघटं पक्षीकृत्य दशांगुळयुत्क्षेपण प्रयोजकसंख्यावि शेष प्रत्यायनेच्छाविषयत्वेन हेतुना दशसंख्याभि प्रायविषयत्वस्य ताद्रूप्येण व्याप्तयैव संभवादुद्देश्यसिद्धिः, अतएवमिश्राणा •मुक्तानुशये न यथावेत्यादि फाक्किकावतारणमयुक्तमितिवाच्यम् , यन्नोक्तहेतावुक्त साध्यस्य ताद्रूप्येण सहचारज्ञानं नास्ति एवं यत्रद्वयादिसंख्याभि प्रायविषयघटादावेव द्वयादि संख्याभिप्रायक द्वयाद्वयंगुळयुत्क्षेपणं दृष्ट्वा यदीय प्रतीतीच्छाधीनं यत्संख्यांगुळयुत्क्षेपणं तत्तद्विषयक तत्संख्या

यद्वा—इदं वाक्यं साकांक्षैं तदर्थविषय
कैकज्ञानहेतुकं, आप्तोक्तत्वेसत्ये तदर्थप्रतिपा
दकत्वात् . महाक्यवत् ;

भिप्रायपूर्वकमिति सामान्यतोव्याप्तिगृहीता तत्रापि घटेदशांगुळ्युत्क्षेपण दर्शना नर्दायदशावज्ञानस्यानुभाविकतया न्यदीय व्यापत्यान्यसाध्यसिद्ध्युपगमस्यावश्यकत्वात् ।

[" यद्यपीदृशि वाक्यार्थज्ञानस्य संसर्गानुमानमपेक्षितं तत्र विशेष्य तत्तद्विशेषण विशिष्टज्ञानविषयत्व सिद्ध्यैवनिर्वाहात् । अतोभ्रमाद्य जन्यान्यतरवाक्य प्रयोक्तृत्व हेतुकवक्तृपक्षकानुमान मनुकूलमिष्यतएव * वाक्यपक्षकवाक्यार्थज्ञान साध्यकानुमानमाह (यद्यपि) (सोपाकांक्षेति) सेकादिविषयकं यत्सेकादिसाकांक्षं पयः करणकत्वादिविषयकज्ञानं तद्धेतुक मित्यर्थः (आप्तोक्तत्वे सतीति) भ्रमादिशून्यत्व मवाक्यत्वं, तथा च भ्रमाद्यजन्यत्वे सतीत्यर्थः । नदस्थळ वाक्यार्थस्य प्रमाणान्तरानवधार्यतया विलक्षणसाम ग्र्या आवश्यकत्वा ल्लौकिकवाक्यजन्यविलक्षणानुभवोपि सामग्री बळा त्सिद्ध्यत्यत्र । समाधान मतादृश प्रतीतिजनकत्व*शुकादिवाक्य स्यापि तादृश प्रतीति * तादृशानुमानं च भ्रमादिनिरास एवापेक्षितः । नतु प्राथमिकान्यत्वसाधकानुमान मपि, तत्साध्यस्यात्र हेत्वघटकत्वात् । उक्तप्रतीतिच्छयोच्छ्रितत्वं च विशिष्टवाक्यार्थ मज्ञात्वापि प्रकरणा दिना सुग्रहम । प्रथमानुमानेपि शुकादिवाक्ये व्यभिचारवारणाय तत्प्रवेशने हेत्वन्तरस्य * दुरुद्धरत्वेपेक्षिततया तस्यावश्योपेयत्वात्] सामान्यतोपि रत्नविवक्षितत्वान्महावाक्यव दिति दृष्टान्तसंगतिः ।

---

* एतच्चिह्नयुक्ते कुण्टलितग्रन्थभागे तत्र तत्र पाठो स्ति । अत एवानन्विनः प्रतिभाति ।

ततएते पदार्थाः परस्पर संसर्गवंतः, साकांक्षत्वे सत्ये कज्ञानविषयत्वात्, सत्यरजतज्ञानविषयवदिति । एवं वक्तृ र्यथार्थ वाक्यार्थज्ञानेनुमिते प्रकरणादिना वक्तृभिप्रेत यथार्थप्रतीतिपरत्वज्ञानं, ततो वेदतुल्य तया शब्दा दर्थप्रत्यय इत्यनुवादकश्शब्दः; वक्तृज्ञा नावच्छेदकतया तद् [संसर्गज्ञाना] नुमाना त्तदुप जीवि संसर्गानुमानाद्वा वाक्यार्थस्य प्रागेवसिद्धेः ।

तदर्थश्च भ्रमाद्यजन्य कर्मत्वादि साकांक्षवटत्वादिप्रतीतीच्छया श्चरितत्व वत् कर्मत्वादौ घटादिविशिष्टज्ञानजनकं मदीयं घटमित्यादिवाक्य मिवेति । एतदनन्तरं इत्येवानुमेय मिति पूरणीयम् । " ततः " इत्यस्य एवमित्यस्य पूर्वं पूरणीया नुमानमित्यनेन सम्बन्धः । " एतेपदार्था " इत्यादिकं पूर्व वद्वचाख्येयम् ।

(सत्यरजतज्ञानविषयवदिति) रजतत्वविशिष्ट ज्ञानविषयरजत त्वसंसर्गं धर्मिवदित्यर्थः । शब्दस्यानुवादकत्व मुपसंहरति (एव मिति) (वेदतुल्यतयेति) वेदस्थले कल्पनसामग्रीसमवहिततयेत्यर्थः । (तदनुमानादिति) वक्तृज्ञानानुमाने साध्यतावच्छेदकतयेशेषः । " सिद्धे " रित्यग्रिमेणान्वयः । एत द्याथार्थ्यघटितसाध्या भिप्रायेणोक्तम् । याथार्थ्यस्य प्रकृतविशेषणवद्विशेष्यकत्वं रूपतया वाक्यार्थस्य तत्र प्रवेशात् । तदनुमाने विशिष्टज्ञानत्वेन साध्यत्वेतु न तस्सिद्धिरित्याशयेनाह (तदुपजीवीति) नन्वेत्यादिना अभिहि तादित्यादिः (सिद्धेरिति) यथार्थ तज्ज्ञानानुरोधेन नियमतस्स्वीकार्य त्वादितिशेषः । भ्रमाद्यभावानुमानानन्तरं वक्तृज्ञानान्तरमभ्युपगम्यैव

यत्तु तत्संसर्गाग्रहो भ्रमः, तदभावश्च संसर्गाग्रहएवेति भ्रमाभावेनुमीयमाने संसर्गज्ञानमेवानुमितमित्याप्तत्वानुमानांतर्गतमेव वक्तृज्ञानानुमानं, नतु वक्तृज्ञानानुमाने तल्लिङ्गमिति; तन्न, भ्रमोहिज्ञानद्वयमगृहीतभेदं, तदभावश्च गृहीतभेदज्ञानं । नहि ज्ञानाभावे सुषुप्तौ भ्रमव्यवहारः । ततो भ्रमाभावनिश्चयानंतरं वक्तृज्ञानानुमानं ।

निर्वाहयतोमतमुपन्यस्यति (यत्विति) यत्तु तत्संसर्गाग्रहो भ्रमइति पाठः । संसर्गग्रहाभावो भ्रमइत्यर्थः । भ्रमस्य विशिष्टज्ञानात्मकतया भ्रमस्थाने संसर्गग्रहस्यावश्यकतया स एव भ्रम इत्यभिमानः । "यत्वसंसर्गाग्रहोभ्रम" इति क्वाचित्कः पाठः । तत्र यथाश्रुते असंसर्गग्रहाभावस्य संसर्गग्रहात्मकतया तदभावःसंसर्गग्रहएवेत्यसंगतम् , अतो भ्रमपदात्पूर्वं मकारश्लेषेणासंसर्गग्रहाभावः, अभ्रमः-भ्रमाभावः, तदभावः तदात्मकोभावः . असंसर्गग्रहएवेत्यर्थः (आप्तत्वानुमानान्तर्गतमेवेति) अभ्रान्तत्वानुमानात्मकमेवेत्यर्थः । "वक्तृज्ञानानुमानम्"-त्वत्रसंसर्गज्ञानानुमानं (ज्ञानद्वयमगृहीत भेदमिति) असंसर्गाग्रहविशिष्ट धर्मधर्मिविषयक ज्ञानद्वयमित्यर्थः (तदभावश्चेति) विशेष्यभूत ज्ञानद्वयकालीन तादृशविशिष्टाभावश्चेत्यर्थः (गृहीतभेदं ज्ञानमिति) धर्मिणिधर्माभावविषयक ज्ञानरूपज्ञानं, नतु तयो स्संसर्गाग्रह इतिशेषः । संसर्गाग्रहएव कथं भ्रम इत्या काकांक्षायामाह (नहीति) यतः सुषुप्तौ ज्ञानसामान्याभावस्तत्वेन संसर्गज्ञानाभावस्तत्वेपि, नपुंसि भ्रान्तत्व व्यवहार इत्यर्थः (वक्तृज्ञानानुमानमिति) आवश्यक मितिशेषः । आप्तत्वानुमानस्य वक्तृसंसर्गज्ञानानुमानत्वोपगमे प्रथमानुमा

किञ्च यद्याप्तोक्तत्वानुमानमेव वक्तृज्ञानानुमानं, तर्हि यादृशं लिङ्गं तादृशमेव गमकमस्त्विति ॥

इति चिन्तामणौ शब्दखण्डे शब्दप्रामाण्यवाद पूर्वपक्षः ।

न वक्तृज्ञानानुमानाधीन पदार्थज्ञानानुमानंच, व्यर्थमित्याह (किंचेति) लिंगज्ञान यथार्थज्ञानानुमापकमितिशेषः । " तादृशमेव "-तज्ज्ञानमे वेत्यर्थः । " गमकमस्तु " - शाब्दप्रमाजनकमस्तु । तन्मते यद्यार्थज्ञान तात्पर्यस्यैववक्तृयथार्थज्ञानानुमापकत्वादितिभावः ।

अत्रभ्रमाद्यभाव सहितभ्रमादिविशिष्ट ज्ञानान्यतरजन्य वाक्यप्रयो क्तृत्वरूपहेतुज्ञानस्य यथार्थज्ञानानुमापकतया गौरवेणतस्य शाब्दप्रमित्य हेतुतया यथार्थतात्पर्यज्ञानस्यैव च हेतुतया प्रागवृत्तित्वेन तन्निर्वाहाय संसर्गानुमानस्य वक्तृज्ञानानुमानस्यावश्यकतया उक्तहेतुघटकविशेष्य भागसिद्धचर्थ प्रथमानुमानस्य तथात्वमितिभाव ।

केचित्तु-अभ्युपेत्य भ्रमाभावानुमानस्य वक्तृज्ञानानुमानत्वं भ्रमाभा वानुमानानंतरं वक्तृज्ञानानुमानं कर्तव्यमेवेतीष्टापत्तिमाह (किञ्चेत्यादि) (यादृशंलिंगमिति) वक्तृयथार्थज्ञानानुमापक लिंगघटकं यत् भ्रमशून्य त्वमित्यर्थः । इति व्याचक्षते । (?)

इतिमूलगदाधरीय शब्दप्रामाण्यवादपूर्वपक्षरहस्यम

(?) अस्मत्संगृहीतेषु त्रिष्वपि गदाधरीय पुस्तकेष्वेतावानेव गदाधरी य ग्रंथउपलभ्यते । " अत्रोच्यते " इत्यादि मणिग्रंथव्याख्यानभागः पुस्त कत्रयेपि नास्ति ।

" तदवगम संसर्गानुमापकमस्तु । ' यथार्थधीपरत्व ' - यथार्थवाक्यार्थप्रतीतौ च्छयोच्चारितत्वरूपं यथार्थतात्पर्यम् । ' न ज्ञातं प्रयोजकं, - न शाब्दप्रयोजकज्ञानविषयः । एतज्ज्ञानत्वेन न तद्धेतुत्वमितियावत् (गौरवादिति) "

इत्येतावान् ग्रंथः परं सिद्धान्तभागव्याख्यानरूपः पुस्तकेष्वस्ति । एतदुपरिचाकांक्षा ग्रथव्याख्यानमास्ति । मन्यामहे च वयं यत्रकुत्रचिदुपरितनग्रथेपि स्यादेवेति । येषांनिकटे स भागोस्ति तैः प्रेषणीयस्स भाग इत्यर्थयामहे । लब्धे च ग्रथशेषे खण्डान्तरे तंभागं प्रकाशयिष्यामः । अन्यथाचाकांक्षाग्रंथमव मुद्रयिष्यामः । इति (संपादकः)